अखिलभारतीय–प्राच्यविद्यासम्मेलनम्

शतवर्षमहोत्सवग्रन्थमाला–२८

संस्कृतेऽनूदितं समकालिकं कथासाहित्यम्

डॉ. नारायणदाशः

प्रधानसंपादकः

आचार्यः श्रीनिवासः वरखेडी

कुलगुरु

संपादकः

आचार्यः मधुसूदनः पेन्ना

संचालकः संशोधन–प्रकाशनविभागः



राष्ट्रहिताय संस्कृतम्

कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः

रामटेकम्, जि. नागपुरम् (महाराष्ट्रम्)

तथा

न्यू भारतीय बुक कॉर्पोरेशन, नव देहली

2020

अखिलभारतीय–प्राच्यविद्यासम्मेलनम्
शतवर्षमहोत्सवग्रन्थमाला – 28

संस्कृतेऽनूदितं समकालिकं कथासाहित्यम्

डॉ. नारायणदाशः

प्रधानसंपादकः
आचार्यः श्रीनिवासः वरखेडी
कुलगुरु

संपादकः
आचार्यः मधुसूदनः पेन्ना
संचालकः संशोधन–प्रकाशनविभागः



कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः
रामटेकम्, जि. नागपुरम् (महाराष्ट्रम्)

2020

शीर्षकम् — संस्कृतेऽनूदितं समकालिकं कथासाहित्यम्

लेखकः — डॉ. नारायणदाशः

प्रधानसंपादकः — आचार्यः श्रीनिवासः वरखेडी
कुलगुरु, क.का.सं.वि., रामटेकम्

संपादकः — आचार्यः मधुसूदनः पेन्ना
संचालकः संशोधन–प्रकाशनविभागः
क.का.सं.वि., रामटेकम्

संपादकमण्डलम् — डॉ. दिनकर मराठे, क.का.सं.वि., रामटेक
डॉ. वीना गाणु, नागपुर.

प्रकाशनवर्षम् — **2020**

आवृत्तिः — प्रथमा

मूल्यम् — **225.00**

आय.एस.बी.एन. — 978-8183-153997

मुखपृष्ठम् — श्री. उमेश पाटील, क.का.सं.वि., रामटेकम्

मुद्रकः — एस.के.प्रिन्टर्स, दिल्ली

प्रकाशकः — कुलसचिवः,
कविकुलगुरु–कालिदास–संस्कृत–विश्वविद्यालयः,
प्रशासकीयभवनम्, मौदामार्गस्य, रामटेकम्.
तथा
न्यु भारतीय बुक कार्पोरेशन, नवी दिल्ली

PREFACE

It is indeed a matter of great pleasure and pride for Kavikulaguru Kalidas Sanskrit University, Ramtek to have this rarest opportunity of hosting the 50th session of All India Oriental Conference at Nagpur. This AIOC-50th session at Nagpur will be forever remembered by all as the year 2019 also happens to be the year of Centenary Celebration of AIOC. The premier objective with which the great scholars of yester years had contemplated and established this national academic event called All India Oriental Conference has been achieved through these years with scores of young scholars contributing significantly to the treasure house of knowledge through their valuable research work.

The research of yore and of the present should be properly recorded so as to make it easily available to all lovers of knowledge and wisdom in the years to come. With this objective, we have contemplated to commemorate the 100th year of this grand event of 50th session of AIOC by way of publishing 100 monographs on different subjects in four languages viz., Sanskrit, Hindi, Marathi and English. It is no doubt a herculean task but still worth of it, for the reason that these 100 monographs will inspire many young scholars to take upon a fresh study and research of the oriental subjects with more vigour and zeal.

The AIOC Centenary Publication Series includes wide variety of subjects like Literature, Language, Veda, Indian Philosophy, Sanskrit Grammar, Law, Children Literature, Yoga, Astronomy and Astrology, Ayurveda, Pali, Prakrit, Jain, Buddhism, Education, Library Science, Poetics, Aesthetics, and Indology. It also includes reprint of some rare texts of academic importance which have gone out of print are not easily available. We wish to mark this centenary celebrations with this series that connects the glory of the past and aspirations of future. I place on record my sincere gratitude to all the authors of these monographs who have kindly contributed to the richness of this

series.

I am confident that the books published in these series will definitely inspire the lovers of Oriental Learning in general and of Sanskrit Language and Literature in particular.

On this occasion, we have published a memorable book of all the speeches of Section-Presidents of all previous sessions of AIOC. It is indeed a very capacious addition to any collection. I with all respect thank two eminent scholars of our times - Prof. Gautam Patel, President and Prof. Saroja Bhate, General Secretary, the torch bearers of AIOC who have not only encouraged us in this venture but also made all efforts to provide these valuable historical speeches for us. I thank all executive members of AIOC and my colleagues of the varsity for making this event a grand success. My words fall short in describing the painstaking efforts and scholarly commitment of my esteemed colleague Prof. Madhusudan Penna, local secretary of this session in bringing out this series.

I also take this opportunity to profusely thank Shri. Subhash Jain and Shri Dipak Jain, the proprietors of New Bharatiya Book Corporation, New Delhi for their enthusiastic approach and timely work with all precision and grace.

Let us all sanctify ourselves in the eternal flow of wisdom by reading these books and recommending these to others also!

सरस्वती श्रुतिमहती महीयताम्

Ramtek
10th January 2020

Prof. Srinivasa Varakhedi
Vice Chancellor, KKSU

Kavikulaguru Kalidas Sanskrit University
All India Oriental Conference

100th Year 50th Session
10th-12th January, 2020

Chief Patron
Hon'ble Nitin Gadkari
Minister of Road, Transport & Highways of India

Patron
Prof. Srinivasa Varakhedi
Vice Chancellor, KKSU, Ramtek

AIOC President
Prof. Gautam Patel
Chairman, Sanskrit Seva Samiti, Ahmedabad.

AIOC General Secretary
Prof. Saroja Bhate
Professor of Sanskrit (Retd.), Pune University, Pune

AIOC Local Secretary
Prof. Penna Madhusudan
Dean, KKSU, Ramtek

Additional Local Secretary
Dr. Harekrishna Agasti
Dr. Kalapini Agasti
Dr. Dinakar Marathe
Dr. Parag Joshi

Organising Committee
Prof. C.G. Vijayakumar, Registrar (I/c) & Dean, KKSU, Ramtek
Prof. Nanda Puri, Dean, KKSU, Ramtek
Prof. Krishnakumar Pandey, Dean, KKSU, Ramtek
Prof. Laita Chandratre, Dean, KKSU, Ramtek
Dr. Ramachandra Joshi, Finance Officer, KKSU, Ramtek
Dr. Umesh Shivahare, Controller of Examination, KKSU, Ramtek
Dr. Dipak Kapade, Librarian, KKSU, Ramtek
Dr. Renuka Bokare, PRO, KKSU, Ramtek

Shri. Rajivranjan Mishra, Technical Head, KKSU, Ramtek
Shri. Pravin Kalambe, Security Officer, KKSU, Ramtek

Reception Committee

Prof. Srinivasa Varakhedi, Chairperson Reception Committee & VC, KKSU
Parampujya Govindagiri Swamiji, Rishikesh
Prof. P.T. Chande, Former VC, KKSU
Prof. Uma Vaidya, Former VC, KKSU
Prof. Vijendra Kumar, VC, National Law University, Nagpur
Prof. Rajnish Shukla, VC, National Hindi University, Wardha
Prof. Vinayak Kane, VC, RTM Nagpur University, Nagpur
Shri. Krupal Tumane, Member of Parliament
Shri. Girishji Vyas, Member of Legislative Council
Shri. Chandrashekhar Bawankule, Guardian Minister, Nagpur
Prof. Vishram Jamdar, Director, VNIT, Nagpur
Dr. Bhushankumar Upadhyay, Commissioner of Police, Nagpur
Shri. Vijay Phanshikar, Editor, The Hitavada, Nagpur
Shri. Rajkumar Tirpude, Tirpude Group of Insitutions, Nagpur
Shri. Mohabbat Singh, Tuli International, Nagpur.
Shri. Chandragupta Varnekar, Principal Retd., Nagpur
Shri. Suresh Sharma, Baidyanath, Nagpur
Shri. Prabhakar Rao Mundle, Dharampeth Educational Institutions, Nagpur

Executive Committee

Prof. G. U. Thite,
Vice President

Dr. Brijeshkumar Shukla,
Treasurer

Members

Dr. Rajni Satish Chandra Jha
Prof. Shukla Ramakant
Dr. Behera Ranjit
Dr. Meena Shukla
Dr. Nirmala Kulkarni
Dr. Roy Gauri Nath
Dr. Tripathi Uma Rani
Dr. Pushpa Jha
Dr. Basu Ratna
Dr. Mithilesh Kumar
Prof. Singh Prasoon Dutta
Shri. Mishra Arun Ranjan
Dr. Mishra Baidyanath
Dr. Tripathi Rajendra Rasraj
Shri. Harshdev Madhav
Dr. Kamdev Jha
Dr. Parinita Deshpande
Dr. Jha Udayanath (Ashok)

सूचीपत्रम्



प्रथमोऽध्यायः

भूमिका

1.1. उपक्रमः

एकविंशशतकस्य प्रारम्भकालीनं परिवर्तनं संस्कृतसाहित्ये अपि आगतमस्ति। यतो हि धाराप्रवाहो धर्मोऽस्ति समयस्य साहित्यस्यापि। इदानीं संस्कृतसाहित्यस्य समृद्धिस्तु नूतनयुगबोधैः सह तान्का-हायकू-ग़ज़ल-प्रभृतिकाव्यविधाभिः सह उपन्यास-स्पशकथा-त्रासदकथा-टुप्कथा-ललितकथादिभिश्च वर्द्धतेतराम्। संस्कृतेऽनूदितसाहित्यस्यापि महाप्रस्थानं समारब्धम्। विगतशतके नैकानां प्रसिद्धग्रन्थानां संस्कृतानुवादस्तु जात एव, किन्तु तेषां क्रमेण अनुशीलनं न जातमिति, तस्य सम्पूर्णाभिलेखः अस्माकं पार्श्वे नास्ति।

अपि च एकत्र यदा शेक्सपियरस्य नाटकानां पञ्चषोऽनुवादो जातः, अपरत्र प्रसिद्धकवीनां कृतयोऽस्पृष्टा एव स्थिताः। इदानीं यावत् के.एम्.मून्शीवर्यस्य कृष्णावतारदिग्रन्थाः, नरेन्द्रकोहलीवर्यस्य रामायणकथा, तस्लिमायाः फेरा-लज्जा-द्विखण्डितादयुपन्यासाः वा अस्पृष्टाः एव सन्ति। इतः किञ्चिद् अग्रेसरन् भारतमुद्रा-सम्भाषणसन्देश-कथासरित्-संस्कृतमञ्जरी-सम्पादकाः धारावाहिनीरूपेण दीर्घग्रन्थान् प्रकाशयन्ति। ततोऽप्यग्रे केचन सम्पादकाः प्रसिद्धवैदेशिककथाः, भारतीयकथाः, उपन्यासान् च सङ्गृह्यानूद्य सम्पादयन्ति। एवं प्रतीतिर्जायते विंशशतकोत्तरसंस्कृतस्य अनूदितसाहित्ये कस्यचन नवीनोपक्रमस्य महाप्रस्थानस्य वा प्रारम्भो भवति।

1.2. संस्कृते अनुवादपरम्परा[1]

न केवलं शतं समाभ्यः अपि तु सहस्रसमाभ्यः आवैदिककालात् ऋग्वेदस्य प्रप्रथमायाः ऋचः भारतीयसाहित्यं सुसमृद्धमस्ति एव। परस्परसंवादेन सुसमृद्धाः आधुनिकभारतीयभाषाः अपि केनापि गुणेन ततः न्यूनाः न सन्ति। यथा मौलिकं साहित्यमधुना सर्वतोभावेन सहृदयान्

[1] केन्द्रसाहित्येकादम्याः अनुवादपुरस्कारप्राप्त्यवसरे ४.९.२०१५ दिनाङ्के मया प्रदत्तं भाषणम्।

प्रभावयति तथैव अनूदितसाहित्यमिति जानीमो वयम्। अनूदितसंस्कृतसाहित्यस्य परम्परामत्र किञ्चिद् विचारयामः तावत्।

क्रान्तदर्शिभिः ऋषिभिः यद्दृष्टं तच्छब्दैः प्रकाशयितुं प्रयतितं केवलम्। अयमर्थः अस्मिन् अर्थे बोधव्यः इति ईश्वरेच्छासङ्कल्पस्य अनुकीर्तनम् अनुवादत्मकं वा वर्तते मानवीयं वाङ्मयम्। मानवानां चतुषष्टिकलात्मकं समस्तशिल्पनुवादात्मकमिति अभिप्रैति ऐतरेयमहीदासः। किञ्चिदभव्यभाषया तदेव प्रतिपादितं क्षेमेन्द्रेण- नास्त्यचौरो वणिग्जनो नास्त्यचौरः कविजन इति।

यद्यपि पाश्चात्यमतेन भाषान्तरमात्रम् अनुवादेन बोध्यते, तथापि वेदकालादद्यावधि संस्कृतपरम्परायाम् अनुवादस्य काचिद् भव्यपरम्परा वर्तते। तदर्थं रूपप्रतिरूपे, बिम्बप्रतिबिम्बौ, आभासः इत्यादिशब्दाः प्रयुक्ताः। शास्त्राणां भाष्य-समीक्षा-चूर्णिका-वार्तिक-टीका-पञ्जिका-सारसङ्ग्रह-सङ्ग्रहादिषु प्रमुखतः अनुवादप्रक्रिया एव वर्तते। कालिदासेन तु शुकस्य अनुकरणमपि अनुवादरूपेण स्वीकरोति। ध्वनिकारः आनन्दवर्धनः टीकाकारः अभिनवगुप्तस्तु वाच्यार्थस्य विविधनिरूपणप्रकारम् अनुवादरूपेण निरूपयतः।

1.2.1. श्रीमद्भगवद्गीता, उपनिषदश्च

कलिकातायां गवर्नरपदे नियुक्तस्य वारेनहास्टिंगसस्य प्रेरणया प्रेरितः चार्ल्सविल्किसः वाराणास्यां संस्कृतं पठित्वा १७८५सं. गीतायाः अनुवादमकरोत्। दाराशिकोहः प्रप्रथमतया सिर्र-ए-अकबर नाम्ना ५२ उपनिषदामनुवादमकरोत् पारसीकभाषया। तदनुसरणेन एङ्केटिवदुपरों फ्रेञ्चभाषया अनूद्य १८०१-१८०२ वर्षयोः पेरिस् तः प्राकाशयत्। १८०८ सं. रिक्सनर् जर्मनभाषया अन्ववदत्। तदानीन्तनाः पाश्चात्याः दार्शनिकाः शापेनहार-शेलिंग-इमर्सन-थारोप्रभृतयः एभिरनुवादैः नितरां प्रभविताः सन्तः भारतस्य महिमानं स्व्यकुर्वन् इति जानन्त्येव सुधियः।

1.2.2.पञ्चतन्त्रम्

ईशापूर्वद्वितीयशतकात् खीष्टियतृतीयशतकाभ्यन्तरे पञ्चतन्त्रं रचितमिति अनुमीयते। अत्र अधुनातने संस्करणे पञ्चतन्त्राणि सन्ति, तथा च मूलतः ५ महाकथाभिः सह अनुस्यूततया ५८ उपकथाः सन्ति, १०१४ श्लोकाश्च विलसन्ति।

मूलपञ्चतन्त्रस्य प्रथमानुवादः अभवत् पहलवीभाषया षष्ठशतकस्य प्रथमार्द्धे। किन्तु मूलेन सह अनुवादोऽपि विलुप्तः। इदं निश्चयेन लिखितरूपेण कथितरूपेण च उत्तरतिब्बत-चीनादिदेश-दक्षिणपूर्व-एशियादेशान् प्राप्तं तीर्थयात्रावसरे बौद्धभिक्षुभिः। एवमेव एतत् परिव्याप्तं जातं दक्षिणपूर्वदेशेषु तब्बत-चीन-मङ्गोलिया-जाभा-लाओदेशेषु।

1.2.3.**बड्डकहा(बृहत्कथा)**

पञ्चमशतके पैशाचीभाषायां गुणाढ्यलिखिता बड्डकहा(बृहत्कथा) तथा प्रसिद्धिं गता, येन तस्य चत्वारः संस्कृतानुवादाः, एकः प्राकृतानुवादः, एकः तामिलानुवादश्च जाताः। पैशाचीभाषायाः प्रसाराभावात् अनुवादस्य प्रभावाद् वा अनुवादाः तथा प्रसिद्धा जाताः, येन मूलग्रन्थ एव विलुप्तः। इतरभाषाभ्यः अयं प्रथमतः संस्कृतानुवादो जातः इति वक्तुं शक्यते।

1.2.4.**अभिज्ञानशाकुन्तलम्, मेघदूतम् च**

सर् उलियम् जोन्स कृत अभिज्ञानशाकुन्तलस्य आङ्ग्लानुवाद एव मूलकारणं पाश्चात्यरङ्गमञ्चे तस्य साफल्यकारणम्। तथैव मेघदूतस्य बहुधा अनुवादो जातः। अद्यावधि केवलं वङ्गभाषया ८४ अनुवादाः लभ्यन्ते अस्य। अस्य आङ्ग्लानुवादं बहुधा प्रशंसस हिलव्राण्टमहोदयः।

कालिदासस्य विशेषतः मेघदूतस्य अन्धः स्तावकः आसीत् विश्वकविः रवीन्द्रनाथः। मेघदूतमधिकृत्य तेन शताधिकाः कविताः काश्चन कथाश्च विरचिताः, याभिः कालिदासभावना इतोऽपि प्रत्यग्रीकृता।

1.2.5. **गीताञ्जलिः**

कालिदासात् परम् आपामरचाण्डालं यावत् परिव्याप्तः काव्यसंसारः रवीन्द्रनाथस्येव इति जानीमो वयम्। तत्काव्यकुतुकिनः संस्कृतकवयः तदा तदा रवीन्द्रनाथस्य काव्यानि अनूदितवन्तः। केवलं संस्कृते गीताञ्जलेः पञ्चविंशत्यधिकाः अनुवादाः राराजन्ते इति अहोभाग्यं भाषाकवेरस्य। एतदपि जानीमो वयं यद्गीताञ्जलिरिति काव्यसङ्ग्रहस्तस्य १९१४ क्रैस्ताब्दे नोबेलप्रशस्त्या सभाजितः। तत्रापि अनुवाद एव कारणम्।एका कलैव , यां परिचिनोति सहृदयः कविरनुवादको वा। यदर्थं विश्वकवेरनुवादं न्यक्कृत्य परिष्कारो कृतः कविना इयेटवर्येण समकालिकेन उइलियमराडिकेवर्येण।अतःकाचिदस्माकमास्था वर्तते अनुवादपरम्परायाम्।

जानीमो वयं यत्, विश्वेऽस्मिन् भाषाणां सङ्ख्या अगणिता। प्रत्येकस्यां भाषायां च विरच्यते साहित्यं तत्तद्युगानुरोधेन। तेषां ज्ञानार्थमनुवाद एव

शरणम्। संस्कृते पूर्वकालादेव सुसमृद्धा अनुवादपरम्परा नवजागरणकाले विंशशतके च परां काष्ठां प्राप। कश्मीरराज-जैनुलब्दीनस्य मोगलराजअकबरस्य च समये नैके संस्कृतग्रन्थाः पारसीकभाषया अनूदिताः। इतरभाषाभ्यः अनुवादे प्रथमं स्थानं वाइवेलग्रन्थस्य, यस्य चतुर्दशः अनुवादाः जाताः। कुराणस्य द्वौ अनुवादौ।

1.3. अभिनन्दनीयाः प्रयासाः

संस्कृतस्य कृते एकविंशसहस्राब्दं शुभलक्षणान्वितं जातम्। 2011 ईशवीयसंवत्सरे जनवरीमासस्य 6-11 तारिकासु दक्षिणभारतस्य वैङ्गलूरनगरे यशस्वितया आयोजितासीत् प्रथमविश्वसंस्कृतपुस्तकमेला। ऐतम्प्राथम्येन आयोजितायामस्यां पुस्तकमेलायां पञ्जीकृतरूपेण 125 प्रकाशकानां 154 आपणेषु प्रायः 4 कोटिरूप्यकैः 12लक्षपुस्तकानि विक्रीतानि। एतदतिरिच्य आपणाद् बहिः पत्रिकाणां सम्पादाकाः, लघुसम्पादकाः न्यूनातिन्यूनं पञ्च पञ्च सहस्रमर्जितवन्तः। केवलं संस्कृतभारत्या प्रकाशिताः सार्धशताधिकाः ग्रन्थाः लोकार्पितास्तत्र।

तथैव 2013 संवत्सरे फरवरीमासस्य 22-24 दिनाङ्केषु मध्यप्रदेशस्य उज्जयिनीनगरे प्रथमः संस्कृतसाहित्योत्सवः महता वैभवेन पालितः। अत्रापि आयोजितायां पुस्तकमेलायां नैके अनूदितग्रन्थाः लोकाय अर्पिताः। अत्रापि पृष्ठभूमिकायां संस्कृतभारतीसंस्था एव राष्ट्रिय-संस्कृत-संस्थानस्य विशेषानुदानेन कार्यक्रमं निर्व्यूढवती।

केन्द्रसर्वकारस्य केन्द्रसाहित्याकादमी अस्मिन् सहस्राब्दे प्रथमतया भारतीयभाषया अनूदितकृतीनां कृते पुरस्कारान् अघोषयत्। येनानुसर्जनस्य नव्या भव्या च परम्परा पुनराविष्कृता।

अधुना प्राच्यविद्यासम्मेलनस्यायोजनावेसरे कविकुलगुरुकालिदास-संस्कृतविश्वविद्यालयः शतस्य शोधग्रन्थानां प्रकाशनायोजनां विधाय सत्यमेव प्राच्यविद्यायाः प्रोत्सहनं पुनस्थापनां च करोति। तदर्थं योग्याः कुलपतयः श्रीनिवासवरखेडिमहोदयास्तत्पदपद्धतिमनुगच्छन्तः सर्वे अपि सहयोगिनः आचार्याः शाघ्यतमप्रयासेन आत्मानं पुनानाः सन्ति, ते सर्वे प्रणतिप्रणयपुरस्सरं पुरस्क्रियन्ते। विशेषतः आचार्याः मधुसूदनपेन्नामहोदयाः अस्माकं लघीयांसमपि कार्यं बहुमन्यमानाः प्रकाशनाय स्वीकुर्वन्तीति सर्वथा अस्माकं प्रणयपरिसरमलङ्करिष्यन्ति। प्राच्यविद्यायाः प्रचुरप्रचारेण भारतीयाः इतः अपि प्रचुरीभवन्त्विति मदीया मतिः।

द्वितीयोऽध्यायः

संस्कृतेऽनूदितं कथासाहित्यम्

2.0. उपक्रमः

संस्कृते यथा काव्यानि अनूदितानि, तथा कथाग्रन्थाः यद्यपि नानूदिताः तथापि वसुदेव-चन्द्रगुप्त-पर्व-ऊर्मिला-भगवान् परशुरामः-उल्लङ्घन-सार्थ-धर्मश्री-याज्ञसेनीत्यादिविशालकायाः कथाग्रन्था अनूदिता इत्यस्माकं सन्तोषः। आधुनिकयुगे उपन्यासपदवाच्याः क्वचित् कादम्बरीति अभिधानेन प्रसिद्धाः दीर्घकथाग्रन्थाः एव अस्मिन् अध्याये स्थानिताः सन्ति। किं तावत् कथायाः लक्षणमिति किञ्चिद्विचारयाश्चेदयं भेदः स्पष्टो भवति।

प्राचीनानां काव्यशास्त्रिणां कथालक्षणेषु कथावस्तुनः क्रमशो विश्लेषणं लक्ष्यते। भरतात् स्वीकृते वस्तुनि धनञ्जयेन उत्पाद्यत्वं योजितं, भामहेन कथावस्तुनो व्यापकत्वं प्रकाशितं, दण्डिना गद्यप्राधान्यं स्वीकृतं, वामनस्य काव्यगुणैः कथावस्तु संस्कृतं, रुद्रटेन महा-लघु-भेदैर्विभक्तम्, आनन्दवर्धनेन रसभावेन रसानुगुण्यं कल्पितं, तत्र कथाप्रकारा योजिताः, अग्निपुराणे ते परिवर्धिताः, हेमचन्द्रेण विकसिताः। विश्वनाथेन चात्र वस्तुप्रधानत्वं रसवद्वस्तुत्वं योजितम्। परन्तु एते सर्वे गुणाः कथायाः सन्ति एव। परन्तु कोऽपि कथायाः सर्वाङ्गीणं लक्षणं न लक्षितवान्। कदाचिद् भरतस्य नाट्यप्रधानत्वं परवर्तिकाले काव्यप्राधान्येन पर्यवसितं, न कदापि कथाप्राधान्यं जातम्। अतः कथायाः विकासाय लक्षणाय वा न कस्यापि प्रयत्नो दृश्यते। अतः आकृत्या टुप्कथा-पत्रकथा-लघुकथा-कथा-दीर्घकथा-लघूपन्यास-उपन्यासाद्यसङ्ख्यभेदैरुपवृंहितस्य कथासाहित्यस्य उपन्यासापरपर्यायाः कथाग्रन्था एवात्र विचारिताः।

अत्र वस्तुदृष्ट्या विचारयामश्चेत् अहल्योर्मिलावसुदेवादीनां पौराणिकं चरित्राणामाधारेण लिखिता उपन्यासा यथा विमृष्टाः तथैव आनन्दमठ-युगावतार-चन्द्रगुप्तादीनामैतिहासिकोपन्यासाः तथा वीक्षिताः, क्वचित् अमीना-सिद्धार्थ-देशहत्यादीनां सामयिकसमाजसमस्याधारिताः नेत्रातिथ्यं गताः, कुत्रचित् चन्द्रयसः मृत्युः इत्यादिवैज्ञानिककथाः अनूदिताः अपरत्र चन्द्रमसः पर्वतः इत्यादिसाहसिकयात्राकथाः प्रकटिताः। एतेषां

वर्णाढ्यवस्तुसम्भारेण संस्कृतसाहित्यमपि सुसमृद्धं, तत्तत् शून्यस्थानमपि पूरितमिति कथनं सुशकमेव।

विंशशतकस्य प्रारम्भकाले कलिकाता भारतस्य प्राणकेन्द्रमासीदिति कलिकातातः प्रकाशितं सर्वमाभारतं शीघ्रं व्याप्नोति स्म। हिन्द्यां तेषामनुवादो भवति स्म। तदैव काशीविद्यासुधानिधि-संस्कृतचन्द्रिका-विद्योदय-सुनृतवादिनीत्यादयः संस्कृतपत्रिकाः शासनस्य विरोधं कुर्वत्यः अपि यथा मौलिकं साहित्यं प्रकाशयन्ति स्म तथा अनूदितसाहित्यम्। तासु वङ्किमचन्द्रस्य शरच्चन्द्रस्य च उपन्यासाः अनूदिताः सत्यः प्रकाशिताः आसन्। यथाकालं तासां करावलम्बनेन एव संस्कृते अनूदितं साहित्यं विकसितमिति कथनं साहसमात्रम्। अस्मिन् ग्रन्थे सुसमृद्धानूदित-संस्कृतकथासाहित्ये प्रसिद्धानां केषाञ्चन ग्रन्थानामत्र परिचयात्मिका लघुसमीक्षा करिष्यते।

2.1. अङ्कुशः

अङ्कुशः इति ग्रन्थे पञ्च दीर्घकथाः स्थानिताः याभ्यः चतस्रः पूर्वं सन्देशे धारावाहिनीरूपेण प्रकाशितचराः आसन्। तथैव अङ्कुशः 2009 संवत्सरे जुनतः अक्टोवरपर्यन्तं धारावाहिनीरूपेण प्रकाशितायाः अस्याः कथायाः कन्नडमूललेखकः वर्तते मनुः। जनार्दनहेगडेवर्येण अनूदितेयं कथा भ्रष्टाचारविरुद्धं साधारणजनेन किं कर्तुं शक्यते, कुत्र कुत्र तस्य मितिः वर्तते इति सम्यक् निरूपयति। देशे वर्धमानस्य भ्रष्टाचारस्य निग्रहणाय अत्युच्चपदे स्थितेन राष्ट्रनायकेन अवलम्बितं किञ्चन तन्त्रमत्र प्रकाश्यते। यथा प्रथमतः एव भ्रष्टाचारस्य विश्वतोमुखत्वं विस्तारयति यथा- भ्रष्टाचाररूपस्य कीटस्य कारणतः आधारः एव नितरां शिथिलः दृश्यते। यदि एतत् एवमेव अनुवर्तेत तर्हि महान् एव विनिपातः सम्भवेत्।... एतस्य वृत्तस्य परिशिष्टरूपेण स्विवित्तकोषे धनंसंरक्षितवतां राजनीतिनेतृ-वणिक्-सचिवादीनां नामानि, वित्तकोषीयसंख्या, तत्रत्यस्य धनस्य परिमाणम् इत्यादिकं सर्वं विवृतम् अस्ति। एषा आवली बहुविस्तृता आश्चर्यावहा च। भवतां मनसि प्रश्नः उद्भवेत्-महत् एतत्रहस्यं वयं कथं ज्ञातुं शक्तवन्तः इति। अस्माकं विश्वासार्हताविषये सन्देहः उत्पद्येत अपि। एतस्य अवबोधनाय भवन्तः कूटसंख्याम् उपयुज्य कस्यचित् जनस्य लेखातः धनस्वीकरणं धनस्थापनं वा यदि प्रयोगरूपेण कुर्युः तर्हि अस्माकं वचनस्य सत्यासत्यता प्रमाणिता भवेत्। अन्येषु स्थलेषु इव स्विस्वित्तकोषेषु अपि भ्रष्टाचारः न अस्ति इति न।

अन्यच्च, अस्मदनुकूलाः जनाः तत्रापि केचन सन्ति। अतः एव रहस्यविवरणम् अपि प्राप्तुं शक्तम् अस्माभिः। भवदपेक्षानुगुणं विस्तृतं परिष्कृतं विवरणं तु अचिरात् एव प्रापयिष्यामः वयम्। लेखरूपः प्रथमः वृत्तभागः एषः। (सम्भाषणसन्देशः-जून्-२००९, पृ.20-21)

मूललेखकस्योत्तमभावैः जनार्दनवर्यस्य सरला समर्था चानुवादः परस्परं स्पृहणीयशोभं चकास्तीत्यलं विस्तरेण।

2.2. अपूर्णगाथा

पण्डितनारायणरथेन अनूदितोऽयं ग्रन्थः त्रयोदशशतकदेशीयस्य नारायणानन्दावधूतस्वामिनः समृद्ध-ओडिया-गद्यग्रन्थस्य रुद्रसुधानिधिः इत्यस्य अनुवादरूपो वर्तते। वस्तुतः अत्र प्रतिपदानुवादो नास्ति।

इतः ज्ञायते यदनुवादकः चतुस्त्रिंशत्पृष्ठतः आरब्धेन परिशिष्टेन अपूर्णां कथां पूरितवान्, अतः अपूर्णगाथामिति नामकरणं कृतवान्। (मूलग्रन्थकर्तुः गौरवरक्षणाय कन्यारूपवर्णनानन्तरं कथाशेषं यावद्विषयः परिशिष्टत्वेनावगन्तव्य एव। तस्माद् गुणचिह्नप्रदानेन विभागः कृतः, तत्रैव)

अत्र काचिद् अपूर्वैव गाथा वर्णिता। कामानन्दः विवाहात्परं पत्या सह निर्गतां मृतसञ्जिवनीम् अपहर्तुमिच्छति। कृष्णमृगचर्मेण अमृततरङ्गिणीं नदीं तीर्त्वा अनङ्गपद्माकरस्य राज्यं प्राप्य रुद्रसुधानिधिना सह मित्रतां स्थापयति। राजकुमार्याः मृतसञ्जिवन्याः अनिन्द्यं रूपलावण्यमेवं निरूपयति- "राजकन्यां तरुणमणिं मध्ये सङ्कीर्णां शशिवदनां पिकवदनां मृगनयनां लीलामत्तकरिगमनां जनमनोहारिणीं मन्मथकलाप्रवर्द्धिनीं कनकसौदामिनीं कामिनीम् ईषद्धासिनीं यां वर्णयितुं शेषनागोऽप्यनलं सर्पत्वान्निद्रालूत्वात्, चन्द्रश्च क्षयवृद्धिहेतोः। एवं कामोऽपि लावण्यद्रवणात्। पवनः स्तनवसनाभिलीनत्वात्, सरस्वती भर्तुः पुरतः वीणावादनात्। सनत्कुमारो बालत्वात्, बृहस्पतिः ज्योतिःशास्त्राभिलीनत्वात्, वासुकिः पृथ्वीवाहकत्वात्, हिमपर्वतः शीतलत्वात्, क्षीरसागरः मन्थनकष्टात् तस्याः शोभावर्णनेऽसमर्थाः जाताः।" पृ.31।

2.3. अभयार्थिनः

अभयार्थिनः इति एस्.महादेवन् तम्बिवर्यस्य मलयाळमूलकथायाः अनुवादरूपः विश्वजिता अनूदितः, अङ्कुशः इतिग्रन्थे (99-124 पुटेषु) स्थानितं 2011 संवत्सरे। स्वजन्मभूमितः निर्वासितानां काश्मीरपण्डितानां जीवनस्य निरूपणमत्र दृश्यते। काश्मीरप्रदेशे कथमनुदिनं देशद्रोहकार्यजातं

प्रवृत्तमित्यस्य विवरणमप्यत्र दृश्यते। कथाकारस्य कथाकौशलमत्र द्रष्टुं शक्यम्- जन्मभूमितः एव एते निर्दोषाः जनाः एवम् अपसार्यमाणाः सन्ति चेदपि भवन्तः किमर्थं मौनम् आश्रितवन्तः सन्ति? सहस्रशः काश्मीरीयपण्डिताः निर्वास्यमानाः सन्ति चेदपि योग्या रक्षणव्यवस्था किमर्थं न परिकल्प्यते? अपसारणकार्ये निरतानां विरोधः न शोभावहः इति किं शासनर तेनपक्षेणनिर्णीतम्? अथवा अल्पसङ्ख्याकानां पण्डितानां पक्षस्य आश्रयणात् अपि तद्विरोधिनां पक्षस्य आश्रयणेन अधिकानि मतानि प्राप्येरन् इति भवतां राष्ट्रनायकाः किं भावितवन्तः?" –ह्यारिः सरोषम् अपृच्छत्।(सम्भाषणसन्देशः-नवम्बर्-२००९, पृ.6)

कथाम् एवं विस्तरेण निवेदयन्परमानन्दः नितरां श्रान्तः इव परिलक्षितः। स्नुषा शिवानी किञ्चित् जलम् आनीय तस्मै दत्तवती। तत्पीत्वा निद्रितयोः पौत्रयोः शिरः आमृशन् सः स्वगतम् इव अवदत्- ''मया यः स्वार्थः चिन्तितः तस्य फलम् एतत्। मम ग्रामे तिष्ठामि अहम् एकः एव' इति उक्त्वा क्षणं विरम्य सः कथनम् अनुवर्तितवान्- ''अन्येषु अपि ग्रामेषु मादृशाः कियन्तः सन्ति इति न ज्ञायते। काश्मीरखाते पूर्वं ये पण्डितकुलीयाः भूस्वामिनः इव स्थिताः आसन्तेषु न जाने, अद्य कियन्तः निःस्वाः सन्तः भिक्षायाचनदशाम् आपन्नाः इति। गृहं भूमिः इत्यादिकं सर्वं परित्यक्तव्यम् अभवत् तैः। तेषु अन्यतमत्वस्य प्राप्तौ नास्ति मम लज्जा कापि। किन्तु पुत्रस्नुषापौत्रादीनां भविष्यतः विषये चिन्तनं ममैव दायित्वम्। तेषां भविष्यम् अन्धकारमयं दृश्यते। किं ते आजीवनम् एवम् अभयार्थिनः सन्तः एव जीवेयुः? कस्य पापस्य कारणतः वयं जन्मभूमितः निर्वासिताः अभवाम? अस्माकं रक्षकः किं कोऽपि नास्ति? कः रक्षेत् अस्मान्?"... तमेव प्रश्नं पुनः पुनः पृच्छन् आकाशं पश्यन् सः मौनम् अवलम्बितवान्। ततः पार्श्वपरिवर्तनं कृत्वा कम्बलेन मुखम् आच्छाद्य सगद्गदं रोदनम् आरब्धं तेन। एतस्य सर्वस्य दर्शनात्श्रवणात्च मया ह्यारिणा च महत्दुःखं प्राप्तम्। परमानन्दं शयितं दृष्ट्वा ह्यारिः स्वस्य चित्रग्राहकं स्थगयित्वा माम् उद्दिश्य अवदत्- ''एकस्मात् देशात् निर्वासिताः सन्तः ये अन्यदेशम् आश्रयेयुः ते उच्यन्ते- 'अभयार्थिनः' इति। एते तु भारतस्य (सम्भाषणसन्देशः-जनवरी-२०१०, पृ.22]

2.4. अमीना

अयमुपन्यासः मोहम्मदकबीरउमरमहोदयेन मूलतः आङ्ग्लभाषया लिखितः, न्यूजर्सीस्थ-अफ्रीकावर्ल्डमुद्रणालयात् प्रकाशितः।

अधुना संस्कृतभाषया पण्डितरमाकान्तशुक्लेन अनूदितोऽयमुन्यासः। आफ्रिकीयसमाजे नारीजीवनस्य चित्रमनेन उपस्थाप्यते।

प्रेरकगाथायामनुसर्जकः स्वात्माभिव्यक्तिमित्थं प्रस्तौति- अमीना एकस्या एतादृश्याः स्त्रियः प्रेरकगाथास्ति या स्वजीवने भारभूतानि जन्मना बन्धनानि तर्जयति। प्रतिरोधस्य अस्यां प्रक्रियायाम् उपन्यासस्य नायिका कमपि तादृशं परिवर्तनमानेतुं सफला जायते यस्य प्रभावस्तस्या निजं जीवनं यावदेव सीमितं न भवति। इयं कृतिरेतादृशेषु विषयेषु प्रकाशं प्रक्षिपति, येषु प्रायः कथासाहित्ये चर्चा न क्रियते, परं येषां कारणात् असङ्ख्यानां स्त्रीणां जीवनं प्रभावितं भवति। एते विषयाः सन्ति- मोहम्मदीयानां स्त्रीणां वैधानिकः स्तरः, पारम्परिकाभिः धार्मिकाभिश्च प्रथाभिः तासु आरोपिताः प्रतिबन्धाः, वैयक्तिकसम्बन्धेषु पुरुषसत्तया प्रायः क्रियमाणा निर्द्वन्द्वमवमानना ...। परमियं कृतिः एकः सामाजिकोऽभिलेख एव नास्ति। अयमुपन्यासः न केवलमस्माकं युगस्य एकस्या असाधारणायाः स्त्रियः विश्वसनीयेन चरित्रेण अस्माकं सहानुभूतिमर्जयति, अपितु समानान्तरमतिकुशलतया षोडशशताब्द्याः वीराङ्गनाया राज्ञ्याः जाज्जाऊ-वास्तव्यायाः अमीनाया अपि कथामुपन्यस्यति। अनुभवस्य प्रामाणिकताया उद्भूतेन आवेगन विरचिता, एकस्याः स्त्रियो दृष्टिकोणेन व्यक्ता किञ्च उत्तरनाइजीरियाजातलेखकस्य लेखन्या निःसृतेयं कथा भविष्यं प्रति आशायाः सन्देशं ददाति।

अनुवादकस्य कष्टं विवृणोति प्राग्वाचिके- कस्या अपि साहित्यिकरचनाया भाषान्तरेणानुवादः सरलो नास्ति। यत्तत्त्वं यथा मूलरचनाकारः प्रतिपिपादयिषति तत्तत्त्वं तथैव पुनः प्रस्तोतुम् अनुवादकर्ता प्रायो न प्रभवति। तथापि मूलकृतेः स्वरूपरक्षां कुर्वाणः स तस्या आस्वादं सहृदयेभ्य उपायनीकर्तुं प्रयतत एव। मयापि यथाशक्ति प्रयतितम्।

संस्कृतभाषायाः प्रकृतिमनुसृत्य उपन्यासस्य पात्राणि क्वचित् मनाक् परिवर्त्य संस्कृतीकृतानि। यथा- बटूरा क्वचित् बटूरः भवति, राबी उसमान क्वचित् उसमानराबी अथवा राबी उसमाना भवति। अत्र आदर्शरूपेण मूलाङ्ग्लपाठः स्वीकृतः। ... सन्धयः क्वचिदेव पालिताः। प्रायोऽसन्धीनां पदानां प्रयोगः कृतः। सामान्यसंस्कृतज्ञोऽपि प्रवाहेन यथा पठितुमवबोद्धुं च प्रभवेत् तथाकांक्षितम्। संयुक्ताक्षरेषु वर्गीयपञ्चमाक्षरस्थाने अनुस्वारस्य प्रयोगः अभ्यनुमतः।

यद्यपि उमरवर्यस्य इदं पुस्तकं प्रथमं वर्तते तथापि लेखकस्य स्फूर्त्तिरत्र द्रष्टुं शक्या। इदं पुस्तकं मोहम्मदीयजगतः सर्वाभ्यः उत्पीडिताभ्यः स्त्रिभ्यः आशाया दीपशिखेव भाति। विषमतां, भेदभावं, पूर्वाग्रहम् अत्याचारम्, अवमाननाञ्च विरुध्य आसां स्त्रीणां सङ्घर्षः प्रबलतया अत्र स्थानितः। पूर्णप्रातिभयुक्ता प्रत्यग्ररचनेयं सकारात्मिका प्रेरणादात्री चास्ति। अमीना नाइझीरियाया राजनीतिकप्रणाल्यामेका टिप्पणी अस्ति। अस्यां भ्रष्टां पितृसत्तात्मिकां शोषिकां च पद्धतिं विरुध्य सङ्घर्षगाथा वर्तते। सत्यमेवोक्तं फातिमामेरनिसीमहोदयया- अमीनायाः प्रारम्भः मन्दमधुरसङ्गीतवत् भवति। कठोरघटनानां मध्येऽपि सा स्वकीयं रागं न त्यजति। मद्विचारेण इदमेवास्य पुस्तकस्य सर्वाधिकं वैशिष्ट्यं यद् आक्रोशस्य उच्चस्वरेण सहापि कोमलसङ्गीतं वाद्यते।(अन्तिमपुटे)

अस्य ग्रन्थस्य आरम्भे एव नगरस्य तथा जीवनस्य घनघटा प्रारभ्यते। ततः अनुसर्जकस्य अनुवादकला संस्कृतभाषा मर्यादापि द्रष्टुं शक्या- मध्याह्नवेला संवृत्ता सूर्यश्च ललाटन्तपो जातः। विश्वविद्यालयस्य महिलाछात्रावासात् द्वे युवत्यौ स्वैरं स्वैरं बहिरायाते। बहिरागत्य कारयान-विरामारामे ते एकं मर्सिडीकारयानमवलम्ब्य किञ्चित्कालं वार्तालापमग्ने अभूताम्। तदनु एकया आस्कन्धं लम्बमानेषु स्वकेशेषु धारिता रक्तवर्णा टोपिका सुस्थिरीकृता अपरया च स्वशीर्षपटः पुनः सुस्थापितः। ...

अमीना स्व(कार)यानस्य पृष्ठासने उपविष्टा। यथैव यानं विश्वविद्यालयान्निर्गतं नगराभिमुखं च प्रस्थितं, अमीना स्वगृहे आयोज्यमानमुत्सवम् अवलम्ब्य चिन्तयितुं प्रवृत्ता। इयं सुहृद्गोष्ठी तस्याः पत्या आयोजिताभ्यः अन्याभ्यः सुहृद्गोष्ठीभ्यो विशिष्टा वर्तते। विधानसभाया निर्वाचने तस्य प्रत्यग्रं विजयं सोल्लासं सम्मानयितुं नगरस्योच्चवर्गीया महिला आमन्त्रयिष्यन्ते। एतास्वन्तर्भविष्यन्ति विधायकानां, राजपुरुषाधिकारिणां च पत्न्यः, स्वयं व्यापारशीलाश्च महिलाः, एतासां च मध्ये भविष्यति तस्य नवपरिणीता पत्नी अमीना। समासेन, तस्याः पतिरिमां गोष्ठीं सर्वाभिर्महिलाभिः सह तां परिचाययितुम् आयोजयति स्म। पृ. 1।

2.5. अर्धकथानकम्

हिन्दीभाषया वनारसीदासेन १५८६ खीष्टाब्दे लिखिता प्रथमा आत्मकथा वर्तते अरध कथान इति। जैनमते पुरुषायुषं दशाधिकशतं वर्तते। अतः ५५ वयसि लिखितेयमात्मकथा अर्धकथानकमुच्यते।

वनानसीदासः संस्कृतेन सह ब्रज-उर्दु-पारसीबहुलां भाषां व्यवहरति। सत्यनिष्ठा अत्रत्या अपरा विशेषता। पद्यमयस्यास्य गद्येन मूलं रक्षितुं प्रायतत अनुसर्जकः आचार्यः राधावल्लभत्रिपाठी।

जिनस्तुतिपूर्वकं मूलकविः वाराणस्याः महत्वं प्रतिपाद्य स्वकाव्यप्रणयनप्रयोजनं समकालिकेन तुलसीदासेन प्रतिपादितमिव स्वान्तःसुखाय मनुते। तस्यानुवादो यथा- इयं जिनानां जन्मस्थली वाराणसी। अस्या नाम येन मुद्रिकेव निरन्तरं विधृतं सोऽयं वनारसीदासः स्वीयामात्मकथाम् आत्मनैवात्मना निगदति। अयं जैनधर्ममतावलम्बी वनारसीति अस्य अभिधानम्। अनेन स्वमनसि एतद् विचारितं यत् स्वीयां विख्याताम् आत्मकथां (स्वस्य कृते) कथयिष्ये। यथा मया श्रुतं यथा मया दृष्टं तत्सर्वं स्वमुखेन शब्दशः कथेयम्। मर्यादां रक्षन् अतीतान् दोषान् गुणांश्चोद्घाटयिष्यामि। भाविनीं दशां तु ज्ञानिनो जानीयुः। मदीयमनसि एतदागतं यत् स्थूलरूपेण अतीतस्य वर्णनं कुर्याम्। मध्यदेशीयभाषया हृदयमुद्घाट्य गोपनमपि वृत्तं प्रकाशयेयम्, स्वकीयस्य पूर्वचरित्रस्य वर्णनं कुर्याम्। हे मम मित्राणि, कर्णं दत्वा श्रृण्वन्तु। (पृ.५)।

कुत्र पूर्ववंशावलीं कुत्र सामाजिकान् कुत्र तात्कालिकान् शासकान् कुत्र विविधजातिवर्णधर्माणां तत्त्वानि सरसं सुन्दरं वर्णयति कविः। यथा २९ पद्ये ३६ प्रकारान् शूद्रान् वर्णयति, यत् खलू समाजस्य साहित्यस्य च प्रौढिमानं प्रख्यापयति। केषाञ्चन पद्यानां यथार्थानुवादाः यथा-

गयौ काल बीते दिन घने। संवत सोलह सै बावने।

माघमास सितपख बारसी। चले विवाहन बानारसी।१०५-६।

(कथञ्चित्) अकालकालो व्यतीतः। दुःखघनानि दिनानि अतीतानि। १६५४तमे (५२भवेत्) संवत्सरे माघमासे शुक्लपक्षे द्वादश्यां तिथौ वनारसीदासो विवाहार्थं प्रास्थात्।पृ.१४।।

एसे कुकवि बनारसी भए, मिथ्याग्रन्थ बनाए नये।१७९।

(एतादृशः) कुकविर्बनारसीस्तदानीं जातः, यत् स नैकान् मिथ्याग्रन्थान् अरचयत्।पृ.२१।

युद्धावरोधस्य वर्णनमित्थं वर्तते- नैके पदातिनः अश्वारोहिणश्च नियोजिताः, प्रहरिणः चतसृष्वपि दिक्षु प्रहरकं विदधति स्म। प्राकारे कपिशीर्षकेषु च महाभुशुण्ड्यः स्थापिताः, सर्वत्र विद्रवो दरीदृश्यते स्म। दुर्गे अन्या अपि नूरुमसुलतानेन बह्व्यो व्यवस्थाः कारिताः अन्नं वस्त्राणि जलं च

प्रचुरं सञ्चितम्। (सैनिकानां कृते) कवचाः, अश्वानां कृते पर्याणानि, भुशुण्ड्यः, पर्याप्ता मदिरा, विविधानि चास्त्राणि सङ्गृहीतानि। .. प्रजाजनाः व्याकुला आसन्। ते इतस्ततो विकीर्णाश्च विद्रुताश्च। पृ.१८।

अत्र युगपदेव आकबर-जाहाङ्गीर-शाहाजाहनेति पुरुषत्रयव्यापिनो मोगलशासनस्य साहित्यिकसाक्ष्यं ग्रहीतुं योग्यं वर्तते। कदाचित् मूलानुसारी काव्यानुवादः सुकरो नास्तीति अत्र गद्यानुवादेनापि मूलादुत्कृष्टं प्रतिभाति इदं जीवनचरितम्। मध्ये मध्ये काव्यानुवादोऽपि वर्तते। तात्कालिकलोकव्यवहाराध्ययनाय काले काले एवं सत्याधृताः जीवनीग्रन्थाः एव सहायकाः भविष्यन्ति। यद्यपि क्वचित् मूलपदानां संरक्षणे अनुसर्जनभाषा असमर्था तथापि तेनैव वयं मूलभावं यावद्गन्तुं शक्ता इति पुनर्वक्तव्यं नास्ति।

2.6. अहल्या

हिन्दीसाहित्ये 'महाकाव्यात्मक-उपन्यास' विधायाः प्रारम्भं कृतवतः नरेन्द्रकोहलीवर्यस्य पौराणिकानाम् ऐतिहासिकानां च चरित्राणां ग्रन्थिभेदने तथा आधुनिकसामाजस्य समस्यासमाधाने वैशिष्ट्यं वर्तते। कोहलीवर्यः सांस्कृतिकः राष्ट्रवादी साहित्यकारः अस्ति, यः स्वरचनामाध्यमेन भारतीयजीवनशैल्याः दर्शनस्य च सम्यक् परिचयं कारितवान्। नवदशोपन्यासान् स्वीकृत्य तस्य महाकाव्यात्मकोपन्यासश्रृङ्खला 'महासमर' (अष्टौ उपन्यासाः), 'तोड़ो, कारा तोड़ो' (षड् उपन्यासाः), 'अभ्युदय' (दीक्षादयः पञ्च उपन्यासाः) तस्य प्रतिभां प्रगुणीकुर्वन्ति। दीक्षाग्रन्थस्य अहल्याविषयिणी कथा जनार्दनहेगडेवर्येण अनूदिता सम्भाषणसन्देशे २००१संवत्सरे फेरवरीतः जुलैपर्यन्तं प्रकाशिता, अनन्तरम् अङ्कुशः इतिग्रन्थे (1-28 पुटेषु) स्थानिता 2011 संवत्सरे। कथाकारस्य कथाश्रावणकौशलमत्र द्रष्टुं शक्या-

सिद्धाश्रमात्प्रस्थितस्य विश्वामित्रस्य मनः प्रवृत्ताः घटनाः पौनःपुन्येन चिन्तयति स्म। सद्यः प्रवृत्ताः इव ताः घटनाः स्मृतिपटले हरितायमानाः आसन्। ...विश्वामित्रस्य दृष्टिः बहिर्मुखा जाता। रामस्य उपरि पतिता सा। रामः आत्मनि एव लीनः इव बाह्यप्रपञ्चस्य ज्ञानात्विरहितः इव तमेव अनुसरन् आसीत्। किन्तु लक्ष्मणः तु निर्द्वन्द्वः सन्प्राकृतिकसौन्दर्यं पश्यन् आगच्छन् आसीत्। ... विश्वामित्रः रामं पश्यन् उक्तवान्- 'राम! प्राचीना काचित् कथा मम स्मृतिपथम् आयाति।

"का सा?" - कुतूहलेन पृष्टवन्तौ रामलक्ष्मणौ। ततः विश्वामित्रः कथनम् आरब्धवान्-''गौतमस्य दीर्घकालिकी आशा पूर्णतां गच्छन्ती आसीत्।..

(सम्भाषणसन्देशः-फेबवरी-२००१, पृ. 20)

कथां श्रुत्वा यदा तत्र गन्तुं श्रीरामः विश्वामित्रस्य अनुज्ञामिष्टवान् तत्र विश्वामित्रस्य क्षोभः द्रष्टुं शक्यः। यथा-

''राघव! किं भवता अपि अनुज्ञा प्रार्थ्यते? सीरध्वजः, शतानन्दः, गौतमः च अनुज्ञां प्रतीक्षमाणाः स्थितवन्तः। किं तेषां पङ्क्तौ तिष्ठति भवान्? तर्हि किम् अवशिष्टं भवतः वैशिष्ट्यम्? ये दायित्वभारात्भीताः, ये च परिणामघोरतां सम्भाव्य त्रस्यन्ति, ये च दुर्बलाः ते अनुज्ञाम् अपेक्षन्ते। धीराः तत्र न मुह्यन्ति। यथा योग्यं निर्णयं कर्तुं भवान्समर्थः अस्ति एव!'

(सम्भाषणसन्देशः-जून्-२००१,पृ.२२)

अहल्यायाः नाम कस्याश्चित् समाजघोषितपतितायाः(न प्रकृतं) किं किं दुःखं भवेत्, सत्यप्रतिष्ठार्थं तया किं किं सोढं स्यादिति सम्यक् लक्षितं कथाकारेण, अनूदितमपि अनुसर्जकेन-

''तत्सर्वं कथं वर्णयेयम्? कानिचन दिनानि अहं कुटीरं परित्यज्य कुत्रापि न गता एव। शय्यायां शयाना अश्रूणि स्रावयामि स्म। यदा रोदनात्श्रान्तिः भवति स्म तदा पिपासाबुभुक्षादयः स्मृतिपथम् आयान्ति स्म। कुटीरे पञ्चषाः धेनवः आसन्। कुटीरपरिसरे आरोपितानि कानिचन सस्यानि आसन्। सर्वेषां पोषणं मया करणीयम् आसीत्। अतः तादृशेषु कार्येषु अहम् आत्मानं नियोजयामि स्म। विरामसमये बान्धवाः स्मृताः भवन्ति स्म। देवम्ध्यायन्ती तत्स्मरणं दूरीकरोमि स्म। आश्रमात् बहिः कुत्रापि न गच्छामि स्म।

वत्स! कदाचित् एकवारं तथा गतवती आसम्। सप्ताहं यावत्कदाचित् अस्वस्था, महान् ज्वरः मां बाधते स्म। वेदनया शिरः भिन्नीभवति स्म इव। तापं वेदनां च सोढुम् अशक्नुवती अहं कश्चित्वैद्यं द्रष्टुम् इच्छन्ती ग्रामाभिमुखं गतवती। शरीरे शक्तिः न आसीत्। कुत्र गन्तव्यम् इति स्पष्टता न आसीत्। तथापि कष्टेन पदं निदधती सुदूरं गतवती।

कश्चित्ग्रामं प्राप्य प्रथमगृहस्य पुरतः स्थित्वा शब्दं कृतवती। कश्चन प्रौढः बहिः आगतः। सः माम् अभिज्ञातवान्। प्रेतदर्शनं प्राप्तवान् इव सः उच्चैः आक्रोशनं कृतवान्। अन्येऽपि क्षणाभ्यन्तरे तत्र आगताः। केचन मां ताडयितुम् उद्युक्ताः। अहं भीत्या धावितवती। तेमाम् अनुसृतवन्तः। केचन

माम् उद्दिश्य शिलाखण्डान्क्षिप्तवन्तः। ते शिरसि पतिताः। व्रणःजातः। रक्तधारा निर्गता। तथापि अहं धावितवती। ते पुनरपि शिलाखण्डान् क्षिप्तवन्तः....।

"शिलाखण्डैः ताडनम्! अमानवीयः व्यवहारः तेषाम्। दुष्टाः ते" - लक्ष्मणः उक्तवान्।

''किं तेषां दूषणेन? ते तु अज्ञाः। अन्येषां वचनेषु विश्वासं कृतवन्तः ते। मां पतितां घोषितवन्तः सर्वे समाजस्य गण्याः एव। आचार्याः, विद्वांसः, मुनयः, समाजोद्धारकाः चैव तथा कृतवन्तः। एवंस्थिते किं ग्रामीणानां निन्दनेन? (सम्भाषणसन्देशः- जुलै-२००१, पृ.21-22)

आधुनिकसमाजं संलक्ष्य कथाकारः नारीणां स्वरक्षणजागरूकतां निरूपयति। एवमत्र परमरमणीया रामायणी कथा अनुवादसौन्दर्येण महीयते इत्येव वक्तुं शक्यते।

2.7. आनन्दमठः

आनन्दमठ इति वङ्गीयोपन्यासः वङ्किमचन्द्रचट्टोपाध्यायेन लिखितः 1882 ईशवीयसंवत्सरे प्रकाशितो वर्तते। राजस्थानवास्तव्येन शिवचरणेन शर्मणा आनन्दमठः(1911) अनूदितः संस्कृतभारत्या प्रकाशितः। विंशशतकस्य प्रथमभागे संस्कृते अनूदिताः पुरातनाः उपन्यासा अधुना सुलभतया न लभ्यन्ते।

आनन्दमठः उपन्यासः मुख्यतया तत्रत्येन प्रसिद्धेन जातीयगानेन प्रसिद्ध्यति वन्दे मातरम् इत्यनेन। काल्पनिककथावस्तु गृहीत्वापि लेखकः वङ्किमचन्द्रः मठस्य पृष्ठभूमिकायां देशोद्धारकाणां, सङ्ग्रामकारिणां, सन्तानसेनायाः च कार्यावलीं वर्णयति। अत्र तात्कालिकसमाजस्य वैदिशिकात्याचारस्य देशभक्तेश्च कापि अपूर्वाभिख्या विद्योतते। वन्दे मातरम् इति गानं गायन्तः कति कति योद्धारः सहर्षं देशमातृकायाः कृते जीवनार्पणमकुर्वन् को नाम जानातु। यद्यपि इदं प्रसिद्धं गीतं तत्सम-तद्भवबहुलैः वङ्गीयशब्दैः लिखितमासीत्, तथापि आभारतं सर्वत्र जातीयगानस्य मर्यादां प्राप्तमासीत्।

आनन्दमठे एकविंशतिभागाः सन्ति। प्रथमभागादेव औपन्यासिकः 1774-1778 संवत्सरेषु वङ्गेषु व्याप्तस्य दुर्भिक्षस्य चित्रणं करोति। क्षुधातृषापीडिताः साधारणजनाः राजस्वदानाय बाध्याः आसन्। शासकानां पीडनेन बहवः मृताः, गृहत्यक्ताः पलायिताः वा। तस्य चित्रमेवमस्ति-

अष्टसप्तत्यधिकसप्तशताधिकैकसहस्रतमस्य ईशवीयवर्षस्य एकस्मिन् दिने पदचिह्ननामके ग्रामे भयङ्करः आतपः प्रसृतः आसीत्। ग्रामे मनुष्याः दृष्टिगोचराः न भवन्ति स्म। आपणे विपणिकाः, राजमार्गाः, वीथिकाः, गृहाणि, उच्चावच्चाः अट्टालिकाः, सर्वाः अपि नीरवं भान्ति स्म। अन्यस्य का वार्त्ता कश्चन भिक्षुकः अपि दृष्टिगोचरः न भवति स्म। राजमार्गे सम्मर्दः न आसीत्। सरोवरे, गृहद्वारेषु मनुष्याः दृष्टिविषयाः न भवन्ति स्म। पृ.1।

जनाः भिक्षाचरणं प्रारब्धवन्तः, परन्तु भिक्षां कः वा दद्यात्। उपवासः समारब्धः। जनता रोगग्रस्ता अभवत्। ग्रामाः निर्जनाः अभवन्। पशवः अपि बुभुक्षया व्याकुलाः आसन्। धान्यस्य अभावे जनाः वृक्षाणां पत्राणि अभक्षयन्। निम्नवर्गीयाः जनाः कुक्कुरान्, मार्जारीः, मूषकान् चापि भक्षितवन्तः। ये पलायिताः ते अन्यदेशं गत्वा बुभुक्षया व्याकुलाः अभवन्। ये न पलायिताः ते तत्र एव विनाशोन्मुखाः अभवन्। ज्वर-विसूचिका-क्षय-शीतलाज्वरादयः रोगाः प्रसृताः। शीतलाज्वरस्य महान् प्रकोपः आसीत्। जनाः महामार्या मरणोन्मुखाः अभवन्। कश्चित् कस्यचित् चिकित्सां कर्तुं न अशक्नोत्। जनेषु मृतेषु सत्सु शवानाम् आहरणाय कश्चित् अपि न आसीत्। शीर्यमाणेभ्यः शवेभ्यः दुर्गन्धस्य प्रसारः भवति स्म। येषु गृहेषु शीतलाज्वरः प्रसृतः, तेषां गृहाणां निवासिनः जनाः रोगिणः त्यक्त्वा पलायनम् अकुर्वन्।पृ.2।

भवानन्दः महेन्द्रं देशभक्त्या सम्पूरयन् गायति-

वन्दे मातरम्,
सुजलां सुफलां मलयजशीतलाम्, शस्यश्यामलां मातरम्।
शुभ्रज्योत्स्नापुलकितयामिनीम्
फुल्लकुसुमितद्रुमदलशोभिनीम्
सुहासिनीं सुमधुरभाषिणीम्
सुखदां वरदां मातरम्।

वयम् अपरां मातरं न अङ्गीकुर्मः। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। अस्माकं माता जन्मभूमिः एव अस्ति, अस्माकं माता, पिता, भ्राता किमपि न, स्त्री न हि, गृहं न हि, भवनं न हि, यदि अस्माकं काचित् अस्ति तर्हि इयम् एव ...। पृ.11-12।

परन्तु अनुवादकः अत्र मूलगानस्य प्रसिद्धिहेतोः पुनः संस्कृतानुवादमविधाय यथावत् स्थापितवान् अत्र।

कल्याणी-महेन्द्रसिंहयोः, तत्पुत्र्याः सुकुमार्याः परोक्षजीवनेन सह भवानन्द-हीरानन्द-सत्यानन्द-धीरानन्द-जीवानन्द-शान्ति-नवीनानन्दादि-सन्तानसैनिकानां कथा, टामस्-वाहिन्या सह तेषां वीरत्वपूर्णयद्धकथा चात्र वर्णिता। अन्ततो शान्ति-जीवानन्दयोः हिमालयप्रस्थानेन उपन्यासः समाप्तः।

2.8. आर्यावर्तहृदयम्

जानन्त्येव सुधियो यद् वङ्गविभाजनात् परं वङ्गीयतरुणैर्ज्ञातमेव आङ्ग्ल्या कामं ज्ञानविज्ञानस्य प्रतीचीद्वारेण प्रवेशो भवेत् परन्तु आङ्ग्लेयैः प्रशासकैर्देशस्य किमपि न भविष्यति। अतः सर्वत्र भारतीययुवसमाजे तद्विरुद्धस्वरः अश्रूयत। केचन कपटचातुर्येण वाचोयुक्त्या परस्परं विवदमानाः स्थिताः। आ सुभाषवसोः आ अरविन्दघोषात् वङ्किम-विवेकानन्द-रवीन्द्रनाथादीनां सर्वेषां कार्यकलापान् असहमानास्ते तानि कार्याणि देशद्रोहरूपेण राजद्रोहरूपेण च प्रमाणयितुं वचोविन्यासजालं विस्तारितवन्तः। तेषु अन्यतमो महात्मा वर्तते जेट्लाण्डाख्यो लर्ड रोनाल्डशे। तत्पत्रेषु तद्ग्रन्थेषु सः कपटाचारो यत्र तत्र समुपलभ्यते। निन्दापूर्णेन नास्तिवाचकेन चिन्तनेन स ग्रन्थं पूरितवान्। परन्तु तात्कालिकाय निन्दनाय अतीतप्रशंसनं सोपानरूपेण गृहीतवान्। तदेव अस्माकं कांक्षितं वर्तते। बहुकालादस्य ग्रन्थस्य मम कर्णयोः कण्डूतिं जनयति स्म। ग्रन्थप्रकाशननस्य प्रायः शतं समाभ्यः परं प्राप्य आमूलचूडं पठित्वा सामान्यपरिचयमेवात्र कारयामि।

अत्र उपोद्घातं प्रस्तावनाम् उपसंहारं च परित्यज्य विंशोल्लासाः सन्ति। तेषाम् उपशीर्षकाः अपि सन्तीत्थम्- अप्रतिरूपं किञ्चन परीक्षणम्, रीतेरुत्पत्तिरुपचितिश्च, कस्याश्चिद् भारतीयभाषाया विकाशः, नवद्वीपस्तत्साहचर्यञ्च, प्रतीच्यस्य नवीना मदिरा, शृङ्गाटकेषु, लक्ष्यस्य पुनः प्राच्यतापादनम्, विकृता स्वदेशप्रीतिः, व्यतीतप्रशंसा, आनन्दमठः, भगवद्गीता, भारतीयकलानां वैशिष्ट्यम्, धर्मस्य यौनप्रतीकतावादः, भारतीयानामभिनवोभ्युदयः, भारतीयाद्वैतवादः, पण्डितानां विवादविषयः, वेदान्तस्य वाणी, वेदान्तस्य तत्त्वम् इति।

प्रस्तावनायां भारतीयलेखकस्य जातीयतावादलेखस्य विश्वामित्रकथायाश्च उद्धृतिपुरस्सरं लेखकः गान्धिवर्यस्य महासङ्गरस्य समक्षं

राउलट् एक्ट तुच्छमिति प्रतिपाद्य हिन्दूनां त्यागे नितरां विश्वास इति प्रतिपादयति।

अप्रतिरूपं किञ्चन परीक्षणम् इति प्रथमोल्लासे आङ्ग्लशिक्षणस्य भारतीयैः स्वीकरणीयमिति भृशं विचारितं वर्तते। रीतेरुत्पत्तिरुपचितिश्चेति द्वितीयोल्लासे कालकाटामाड्रासा-श्रीरामपुरकलेज-हिन्दुकलेज-स्कटीशचार्चेसकलेज-मेकलेशिक्षानीति-कालकाटामेडिकालकलेज-प्रतिष्ठामूलं विवृत्य कथं प्रतीच्यशिक्षा वर्धिता, तया मध्यमवर्गीयाः कथं समाजच्युताः जाताः, पारम्परिकाश्च इतोपि रक्षणशीलाः जाताः इति वर्णयति। कस्याश्चिद् भारतीयभाषाया विकाशः इति अध्याये वङ्गभाषायाः प्रगतिं, वेङ्गलगेजेटतः वङ्गदर्शनपर्यन्तं पत्रिकाप्रकाशनेतिहासं, राजेन्द्रलालमित्र-के.एम्.वन्द्योपाध्याय-रामकमलसेन-वङ्किमचन्द्र-रवीन्द्रनाथादीनां भाषाविकासे योगदानं सम्यक् वर्णितम्। तात्कालिकमानन्दमित्थं वर्णयति ग्रन्थकारः- या ह्यस्माकं स्वदेशस्य भाषा, यया च जल्पितमस्माभिर्बाल्ये, यया पुनर्निविडम् अद्यापि सम्बन्धा न आद्या भावाः संसर्गाश्च, तस्या वङ्गभाषाया आवश्यकत्वं गौरवञ्च नूनं नातिचिरादेव सर्वे प्रत्यभिज्ञास्यन्ति जनाः।(पृ,39)। पारम्परिकशिक्षायाः विषये टिप्पणं तेन नवद्वीपस्तत्साहचर्यञ्च इत्यध्याये युयोज। तत्स्थानमाहात्मं निरूपयति पूर्वप्रसङ्गे- अग्रे तावत् कथयितुमिच्छामि किञ्चन तेषां विषये। प्रथमं तावन्नयामि वाचकमहोदयान् स्वदेशीयशिक्षायाः प्रसिद्धं केन्द्रं यत्राधुनापि ज्वलति सुप्राचीनतमस्य प्राच्यभावस्य पवित्रो वह्निः। (पृ,42)। तदानीन्तनीं शिक्षादानपद्धतिमैतिह्यपुरस्सरं प्रख्याप्य श्रीरघुनन्दनशिरोमणेः श्रीचैतन्यस्य रासनृत्यानां च भव्यं वर्णनं विहितम्। एतदेव सर्वं विविधघातप्रतिघातेष्वपि भारतीयसंस्कृतिं वहति इति तन्मतम्- आसादितमस्माभिर्मुहूर्तदर्शनं तथाविधस्य कस्यचिद् भावजलाशयस्य यस्त्वप्रकट एव तिष्ठेत् परं नियतं न शुष्येद् विदेशीयशिल्पकौशलस्य बाह्यसौन्दर्यप्रभावेणैव।(पृ,50)।

प्रतीच्यस्य नवीना मदिरा इत्यध्याये धार्मिकरूढिभञ्जनतत्पराणां युक्तिवादिनां वङ्गीयतरुणानां, विशिष्य केशवचन्द्रसेनस्य कथा वर्णिता

शृङ्गाटकेषु इति संज्ञप्ते षष्ठोल्लासे चतुष्पाठी-पाठशाला-माद्रासा-मक्ताव-प्रभृतीनां तात्कालिकीं स्थितिं विचारयन् लेखकः पारम्परिकवैद्यानामादरम् आधुनिकचिकित्साशास्त्रपठने निरादरं प्रख्याप्य वैदेशिकवस्तुवर्जनपुरस्सरं मातृभाषया अध्यापनाग्रहम्, ओसमानिया-

आलिगढ-हिन्दुविश्वविद्यालयानां हिन्दुएकाडेमी-आर्यसमाजविद्यालयानां स्थापनां च विषयीकरोति।

लक्ष्यस्य पुनः प्राच्यतापादनम् इति सप्तमोल्लासे दौलतपुरस्य हिन्दुएकाडेम्याः युगपत् चतुष्पाठी-महाविद्यालययोः चालनं, प्रतीच्यस्योपरि प्राच्यप्रभावं च विशदीकृत्य लेखकः पुस्तकालयस्य वर्णनं करोति- महाविद्यालयस्योपरि चतुष्पाठ्या देवायतनेन च पातितः प्राच्यसम्प्रदायानुगः प्रभावोऽनायासेनापीति ज्ञातुं शक्यते। पुस्तकागारस्य पुस्तकाधारेषु एन्साइक्लोपिडिया ब्रिटानिका-ग्रन्थेन समं शब्दकल्पद्रुमः, रासायनिकसभायाः पत्रिकाभिः समम् ऋग्वेदसंहिताश्च सर्वेषामेव दृष्टिं स्वत एव समाकर्षेयुः। प्रातः षष्ठहोरातो दशमहोरां यावत्, माध्यन्दिनं दीर्घं समयं वर्जयित्वा पुनरपराह्णे च महाविद्यालयष्वध्यापनं युरोपरीतिविरुद्धं सर्वथैव प्राच्यरीत्यनुगश्च। .. देवायतनस्य छायायां स्थित्वा प्रतिष्ठानस्यास्यैकायनैः कर्मिभिः सह संलापं कुर्वता मया, पर्वतेभ्यो विनिर्गत्य सागराभिमुखं चिराय प्रवहतो भैरवनदस्य कलस्वनैर्दूरीक्रियमाणां माध्यन्दिनस्तब्धतामवधार्य, समीक्ष्य च सूक्ष्मवसनावृतायां मूर्त्तिमय्यां यामिन्यामिवोन्मुक्तद्वारस्य देवायतनस्यान्तःस्थितायां तमिस्रायां सहकर्मिभिः पण्डितैः सममालिखितामिवाऽऽचार्यस्य शान्तां मूर्त्तिं सहसैवानुभूतं नूनं सफलतां गताऽत्र प्रतिष्ठातृ..णामाशेति। (पृ. 74-75)। ततः आर्यसमाजस्य प्रतिष्ठायाः इतिहासं विवृत्य दयानन्द-एङ्ग्लो-वेदिक-कलेज- हरिद्वारस्थगुरुकुलयोश्च वर्णनं करोति।

विकृता स्वदेशप्रीतिः इति अध्यायः अस्य ग्रन्थस्य मुख्यः परिलक्ष्यते। यत्र नामग्राहमेव तारस्वरेण स्वतन्त्रतासङ्ग्रामयोद्धृभिः कृतान् अपराधान् हननानि च गणयन् तेषां देशप्रीतिरेव विकृतेति, अयं साक्षाद् राजद्रोहः इति प्रतिपादयितुं बलाद् यतते। विप्लविनः कथम् अध्यात्मवादनाम्मा देशभक्तिनाम्ना जनान् राजद्रोहाय प्ररोचयन्ति इति- दारुणं हि स्वरूपमेवंविधराजद्रोहात्मककार्येषु प्रवर्तनक्षमायाः प्रणोदनायाः। (पृ.87)। अत्र जर्मानसाहय्य-अनुशीलनसमिति-देशेर कथा- पत्रावली- आनन्दमठ-माध्यमेन जनाः विपथीकृताः इति लेखकस्य आशयः। अग्रिमाध्यायेषु एतदेव विशदीकृतं वर्तते। व्यतीतप्रशंसाध्याये भारतीयजातीयमहासभा-स्वदेशीयान्दोलन-विपिनचन्द्रपाल-अरविन्दघोष- वारीन्द्रकुमारघोष-दीनेशचन्द्रसेन-वङ्किमचन्द्र-सी.आर्.दासादीनां कार्यं

विनिन्दन् व्याख्यानपद्धतिं प्रशंसति। भवानीभारतीकारस्य प्रत्युत्तरेण लेखको वदति- किं नाधिगता तया भारतभुवा कदाचित् प्राच्यभुभागस्य प्रधानाचार्यायाः पदवी? किं न वितता भारतेन तस्य शिष्टिः एशियामहादेशस्य चरमसीमास्वपि? आधुनिकस्य जगतोऽशिष्टताया अतितृष्णा यं नाम भावं नित्यं नाशयितुं यतते, स एव भावो रक्ष्यते साम्प्रतमपि भारतेन? ... भारतमेव केवलमद्यापि जनयति तादृशान् महापुरुषान्, ये तावद् विहाय श्रेष्ठानपि पार्थिवान् भोगान् जीवितस्य मूलतत्त्वमनुसन्धातुं सततं प्रवर्तन्ते। ऊनविंशशताब्द्यां भारतं विना कोऽन्यो देशो दक्षिणेश्वरस्य सन्न्यासिनोऽनुरूपस्य कस्याचनापरस्य सन्न्यासिनो निर्माणेऽभूद् अलम्। .पृ)96।(... प्राचीनासु वेदिकासु संस्थापित एव वह्निः केनचिज् जातीयेन सिद्धेन। कृत एव वङ्किमेन मातृभूमौ मातृत्वस्याऽऽरोपः। समग्रामेव जातिं समामन्त्र्य तेनाभाणि- सुजलां सुफलां मलयजशीतलां शस्यश्यामलां मातरं वन्दस्व, स्थापय च तां स्वेषु भवनेष्वपि।.पृ)105।(एवमेते कथासु गीतेषु प्रवचनेषु मातृभूमेः मूर्तरूपकल्पनेन तदा देशसेवकान् युवकान् नितरां प्रभावितवन्तः, क्वचित् ओङ्कारस्य वन्दे मातरम् ध्वनेश्च भिन्नमेव भावसमुदायो गृहीतः। ढाका-अनुशीलनसमितेः यतीन्द्रनाथमुखोपाध्यायस्य वैप्लविकदलस्य वा संघटनम् आनन्दमठस्य आधारेण जातम्। केचन भगवद्गीतायाः आत्मनः अमरत्वं पुनर्जन्मवादं च बोधयित्वा अन्तः अपूर्वां शक्तिं जागरयित्वा तान् मारणहननादिकार्ये नियोजितवन्तः इति लेखतस्य वाचोयुक्तिः। आनन्दमठाध्याये तद्विषयं विवृत्य भगवद्गीता इति अध्याये उपर्युक्तं विषयं वर्णयति। --केषाञ्चिद्गीताश्लोकानामुपदेशा विकृतायाः स्वदेशप्रीतेः कृते सापराधान्यपि कर्माणि समर्थयन्त.. मानुषस्य जीवने तस्यापरिहार्येण क्षणभङ्गुरत्वेन यद्धि नामाऽपेक्षिकगौरवं न्यस्यते, तदेवाऽऽपेक्षिकमगौरवमलब्धपाटवैर्जनैः स्वप्राणविसर्जने परप्राणघातने चाऽऽरोप्यते। ... हतो वा प्राप्स्यसि स्वर्गं ... इत्यादिभ्यः श्लोकेभ्यः कीदृशोऽर्थो ग्रहीतुं शक्यते, स त्वकथितोऽपि ज्ञायत एव। ... यथा तथा वा भवतु तेषामुपदेशानां समुद्देश्यम्, परम् अयत्नेनैव प्रभावयितुं शक्येषु वङ्गीयेषु तरुणेषु तैरुपदेशैर्यत् फलं प्रदर्शितं तत्तु वैप्लविकदलानां ब्राह्मणवधरूपभीषणतमपापस्यानुष्ठानेऽयनौदासीन्यप्रदर्शनादेव सम्यक्तया प्रकाशीभूयते।पृ130-131।

उपसंहारे मज्झिनपंथा इति बुद्धदेवस्योक्तिं प्रतिपाद्य विश्वभारत्याः शिक्षणपद्धतिं प्रशंस्य महीशूरराज्यस्य स्वदेशितन्त्रग्रहणं स्वागतीकृत्यं शिक्षाक्षेत्रे सार् आशुतोषमुखोपाध्यायस्य मतमुद्धरति- न हि सर्वमेव विदेशीयं वस्तु निन्दनीयमिति शिक्षाक्षेत्राद् दूरीकरणीयमस्माभिर्न वा पुनः सर्वमेव भारतीयं वस्तु श्रेष्ठत्वेनास्माभिर्ग्रहणीयम्, यतस्तेनास्माकं मूर्खताऽतिविश्वासश्च प्रतिपादितौ स्यातामिति। ... शिक्षाविषये सार्वलौकिकप्रयोजनीयतापेक्षिणो विषया एव समधिकं गौरवं समुद्वहन्ति। वास्तवं प्रतिरूपं गतः सार्वलौकिकविषय एवास्माभिः पूर्णत्वेन बुध्यते। अतः प्रतीच्यसंस्कृतेः शर्मदो विषयोऽस्माभिः श्रयणीयः, रक्षणीये वर्धनीये च जातीयशिष्टिसंस्कृती।.पृ)235।(अन्तिमे भारतीयवैज्ञानिकानां सार् जगदीशचन्द्रवसु-सार् पि.सि.राय-जे.सि.घोषादीनां कृतित्वं प्रतीच्यज्ञानसंस्पर्शेण इति प्रतिपाद्य नन्दलालवसोः अन्धकारं प्रत्यदिशन्तं तीक्ष्णाग्रसम्पन्नं कल्पनासहचरं वर्णयित्व जगदीशवसोः मुखात् ऐकीभावापन्नं वाक्यं श्रावयन् विरमति-

एकत्वं येऽनुपश्यन्ति विश्वेऽस्मिन् बहुधा स्थिते।
ते विदुः शाश्वतं तत्त्वं नेतरे खलू नेतरे॥ पृ 339।

नवद्वीपस्य वर्णनं कृत्वा वदति- पूते भागीरथीस्रोतसि पोतसहयोगेन प्लवमानैर्वगतवर्षस्य आगष्टमासस्य कस्मिंशिदपराह्ने नद्या दक्षिणतटं निकषा कुत्रापि पातितमस्माभिः पोतबन्धनकीलकम्, शाद्वलस्थल्यामनुविद्धं हीरकखण्डमिव यत्रावतिष्ठते प्राचीनं नवद्वीपाभिधानं नगरम्।(पृ,43)। ... जनाकीर्णा आसन्नवितता विचित्राश्च मार्गाः, प्रायेणानुच्छ्रितानामिष्टकालयानां शीर्षेषु च समदृश्यन्त समुज्ज्वलवेशा योषितः। मन्दं मन्दं नगरमार्गेण सञ्चरमाणेष्वस्मासु ताः प्रसूनैराचारलाजैश्चास्मानवाकिरन् अभ्यनन्दंश्चाश्रुत-चरैर्हुलहुलीध्वनिभिः। विवृतमुखगह्वरे रसनाया द्रुतं पार्श्वात् पार्श्वान्तर-सञ्चालनजनितेन प्रकम्पेन युक्तश्चिरायितो ध्वनिविशेषो हुलहुली नाम।सर्वतो निविडं घनीभूता आनीला जनाः नः स्वागतमुदीरयांबभूवुः। (44)।

2.9. आवरणम्

आवरणमिति उपन्यासः कथाग्रन्थो वा सन्तोशिवर-लिङ्गण्णय्यभैरप्पवर्यस्य सद्यः प्रकाशितः कन्नडोपन्यासः, यः सद्यः विश्वासवर्येण अनूद्य संस्कृतभारत्या प्रकाशितः। भैरप्पवर्यस्य सिद्धा सरस्वती, आकर्षिका निरूपणशैली, जीवनानुभवाः, समसामयिकाः विषयाश्च

विलसन्ति तस्य प्रतिग्रन्थम्। चरित्रचित्रणमाध्यमेन कथायाः वेगं वर्धयन् सः आन्तं यावत् पाठकान् वन्दीकरोति स्वकीयचरित्रेषु, कथाप्रवाहे, वर्णनानैपुण्ये च। "साहित्यस्य वस्तु, भवतु नाम तत् ऐतिहासिकं, समकालिकं वा, लेखकस्य निष्ठा तु भवेत् सत्यविषये" (पृ.102) इति तस्य वचनं तस्मिन्नेव शतप्रतिशतमन्वेतीति कथनं दुःसाहसो न भवेत्।

अस्मिन् उपन्यासे अमीर-लक्ष्मी(रजिया) इत्यनयोः अन्तर्जातीयविवाहेन प्रारब्धमस्य कथावस्तु तयोः मिलनघट्टे समाप्तम्। उभावपि स्वस्वधर्मस्य मौलवादान् त्यक्त्वा परस्परं स्निहित्वा निकटीभवितुं प्रतिज्ञां कृत्वापि अमीरो धर्मीयप्रभावात् कामिनीकाञ्चनमोहात् न रक्षितः, न वा लक्ष्मीः सनातनधर्मीयधारायाः प्रभावेण सत्यान्वेषणात् सत्यप्रकाशनात् सत्य-शिव- सुन्दर-प्रभावात् च्युता, न वा कथमपि च्याविता।

उभावपि पुणे-फिल्मइन्स्टिट्युट्इत्यत्र चलनचित्रनिर्माणकलायाः पठनावसरे परिचितौ प्रेमाबद्धौ जातौ आजीवनं सत्यस्य सम्मुखीकरणाय प्रकाशनाय रूपप्रदानाय च। केन्द्रसर्वकारस्य हेरिटेज्विभागेन प्रदत्तेनार्थेन हक्कवुक्काभ्यामुषितस्य राजधानीरूपेण विपरिणमितस्य तुङ्गभद्रा-जलबन्धसमीपस्थ-हम्पिक्षेत्रस्य साक्ष्यचित्रनिर्माणाय गतयोस्तयोः भावगत-वैमनस्याद् आरब्धोऽयमुपन्यासः। तदा लक्ष्म्याः वयः आसीत् चतुःपञ्चाशत् (54)। तदा हम्पिक्षेत्रे विनष्टानि भञ्जितानि मन्दिराणि, देवविग्रहान् च दृष्ट्वा साक्ष्यचित्रं निर्मातव्यमासीत्। तस्याः कार्यविषये लक्ष्म्याः वक्तव्यं यथा- मानुषनेत्रात् चित्रग्राहकस्य नेत्रं सहस्रगुणं सामर्थ्ययुतं भवति, यदि एतद् परिहर्तव्यं तर्हि वास्तविकाः विषयाः एव परित्यक्तव्याः। परं तानेव परित्यज्य हम्पिविषये कीदृशं वा साक्ष्यचित्रं निर्मातुं शक्यम्? (पृ.4) प्रथमाध्याये जलबन्धस्य समीपे एव उपविश्य अतीतं स्मरन्ती रजिया (लक्ष्मीः) फ्यास्-वैक्-रूपेण 28 वर्षाणां पूर्वतनीं स्थितिं स्मरति। पितुः वचनानि, प्रेमोन्मादं, विवाहाग्रहे ऊहापोहात्यागं, परवर्तिजीवनं च विभावयन्ती सा अमीरस्य, श्वसुरस्य, मौलवादिनां च रूक्षव्यवहारान् स्मरति। दण्डनं शासनं तलाक् इत्यादिक्रममयं जीवनं धारयन्ती सा अधुना पुनः पुनरपि मातृधर्मस्य, सनातनविश्वासस्य, सत्यस्य च निकटवर्तिनी भवति। मन्दिरेषु विग्रहेषु देवस्थानेषु मुसलिमानां क्रूरमाक्रमणं सा स्मरति स्म।

अत्रान्तरे पितुः मरणवार्तां श्रुत्वा तत्र प्राप्य लक्ष्मीः पितुः स्थावरास्थावरसम्पदा सह तेन सङ्गृहीतानि पुस्तकान्यपि स्व्यकरोत्।

तत्रासीत् अक्सफोर्डनिघण्टोः आरभ्य विविधधर्मविषयकान् निबन्धान्, सानुवादं कुराणग्रन्थं यावत्सर्वं किमपि। सर्वेऽपि ग्रन्थाः अधीताः इति प्रमाणीकुर्वन्ति स्म प्रतिपंक्ति रेखाङ्कनम्, प्रतिपुस्तकं कन्नडभाषया आङ्ग्लभाषया वा सज्जीकृताः टिप्पण्यः। ततः सा प्रायश्चितं कृत्वा पितुः चिताभस्मनः विसर्जनं कृतवती।

ततः साग्रहं पितुः पुस्तकानि, टिप्पणीश्च पठित्वा, पितृनिर्दिष्ट-पुस्तकानि पुस्तकालये परिशील्य, हम्पिक्षेत्रे स्वयं संशोधनं कृत्वा सा ज्ञातवती यत्, तत्र यत् किमपि प्रवृत्तं सर्वं किमपि मुसलिमैरेव कृतमिति। पितामहपितामहीभ्यां प्रायशः लालितः तस्याः पुत्रः नजीरः आमेरिकायां पेट्रोकेमिकलविषये अभियान्त्रिकविषये एम्.एस्.कृत्वा सौदि-देशे प्रवृद्धः मुसलिममौलवादी एव जातः। ऐतिहासिकचित्रनाट्यानां निर्माणे मुसलिमानां कुकृत्यं त्याज्यं वा ग्रहणीयं वेति दम्पत्योरुत्पन्नो विवादः क्रमशः प्रवृद्धः प्रथमतलाक्-यावत् गतः। तदा पितृगृहे प्रायश्चितादिकं कृत्वा लक्ष्मीः गोमांसाहारं त्यक्तवती। ततः पितुः आदर्शेन सा आमिषाहारमेव त्यक्त्वा शाकाहारिणी जाता। अमीरः क्रमशस्तस्यां हेयभावं वहति स्म। क्वचिदागतायै तस्यै स्वागतं न वदति स्म। दैहिकसम्पर्कस्तु नासीदेव। क्रमशः मनोमालिन्यं जातम्। अमीरो द्वितीयविवाहं कृतवान्। पुत्रं सा शास्त्रिवर्यस्य कन्यया अरुणया सह विवाहितवती। बहुदिनेभ्यः परमेकस्यां कार्यशालायां सा अमीरं दृष्ट्वापि हेलया न्यवर्तयत्। ततः हम्पि-टिपु-मुसलमानवादशाहानां विषये विस्तरशः अध्ययनं कृत्वा सा एकमैतिहासिकमुपन्यासं प्रणीतवती यस्य विरोधः कृतः अज्ञातनामलेखकेन। तेन उत्क्षिप्ता मौलवादिनो विरोधं प्रदर्शितवन्तः। आरक्षकाः तदुपज्ञं ग्रन्थं पित्रा सङ्गृहीतान् ग्रन्थान् च वशीकृतवन्तः। देशस्य प्रजाप्रभुत्वनाम्ना हीनाचरणं यत्र तत्र विरोधं कृत्वा अवसन्ना लक्ष्मीश्चिन्तयति- संशोधनस्वातन्त्र्यरहितमभिव्यक्तिस्वातन्त्र्य-विरहितं माध्यमस्वातन्त्र्यविहीनं च एतत् कीदृशं प्रजाप्रभुत्वम्? पृ.261।

तदा वा प्रकृतमवगत्य अमीरः पुनः सहयोगं कृत्वा पुस्तकानामुद्धारार्थं सूचीं निर्मापयितुमुक्त्वा न्यायालये वादं प्रवर्तितवान्। एवं मौलवादमुत्तेजको ग्रन्थो वशीकृतश्चेत् सदर्भरूपेण प्रदत्ताः शताधिका ग्रन्था अपि वशीकर्तव्याः किल!!! अत्रैव अयमुपन्यासः समाप्तिं गतः।

कार्यशालायामपि एस्.नारायणशास्त्री परोक्षेण विरोधं कृतवान् लक्ष्म्याः। वस्तुतः तथाकथितानां क्रान्तिकारिणां बुद्धिजीविनामेव कश्चन गण

इदानीं सज्जः, भारते सवंर्धितोऽपि भारततत्त्वविघातकानामसङ्ख्यानां टिपूनां महम्मदघोरी- अकबर-औरङ्गजेवानां निर्दुष्टत्वं प्रमाणयितुमितिहासस्य विकृतिकरणाय च। पण्डितम्मन्यानां तेषां चटुलमुपवर्णनं क्षणं हासमुखरं करोत्येव वाचकान्- चिबुके तीक्ष्णश्मश्रुधराः, तीक्ष्णबुद्धयः, कपोलयोः चिबुके चापि अङ्गुलमितं श्मश्रु धरन्तः बुद्धिजीविनः, फारसीविद्वत्ताम् अरबीविद्वत्तां च प्रकाशयत् दीर्घं श्वेतश्मश्रु धरन्तः विद्वांसः, खादीवेष्टिं करांशुकं च धृतवन्तः समन्वयसिद्धान्तिनः, कर्तितकेशानां मध्ये गोपादमितां शिखां धरन्तौ ललाटे तिलके च धरन्तौ द्वौ पण्डितप्राध्यापकौ ... पृ.243। किन्तु ते न जानन्त्येव मुसलिमा ऐतिहासिकाः सडिण्डिमघोषमेव सङ्ख्यानिर्देशपुरस्सरं मन्दिरनाशादि -जेहादापरनाम्नां कुकृत्यानां विवरणं प्रस्तुतवन्तः। इदानीन्तना इतिहासविदो विपरीतभावं वहन्तः सर्वकारीयनिर्देशेन अपरं किमपि रचयितुं यतमानाः सन्ति। तादृशानां नायक आसीदयं शास्त्रिवर्यः। अन्ततोगत्वा समग्रतया इतिहासग्रन्थान् परिशील्य क्षेत्राणि परिभ्रम्य अन्तिमपर्याये लक्ष्मीः यमैतिहासिकमुपन्यासं लिखितवती, तस्यापि विरोधं कृतवान् अयमेव छद्मनाम्ना। इदानीन्तनसमाजस्य बुद्धिजीविनां क्रान्तिकारिणाञ्च सफलतया प्रातिनिध्यं करोति एस्.एन्.एस्.वर्यः।

इयमस्ति आवरणमित्युपन्यासस्य मूलकथा। तया सह एका अन्तःसलिला फल्गुधारा इव कथाधारा प्रवहति यत्र मोगलकालीनभारतस्य, मुसलिमानां वर्वराक्रमणस्य, मन्दिरनाशनस्य, धर्मान्तरीकरणस्य, मुष्कच्छेदनस्य, नपुंसकीकरणस्य च व्यथाकथाः प्रवर्तन्ते। कश्चन सप्तदशवर्षदेशीयो राजकुमारो वन्दिरूपेण गृहीतः। राजप्रासादस्य महिलाः जीवहरमाचर्य्य अग्निप्रवेशं कृतवत्यः। हर हर महादेवघोषेण युद्धं कुर्वन्तः पुरुषाः स्वर्गगतिं प्राप्तवन्तः। अनन्यगतिकतया स मुसलिमधर्मं स्वीकृत्य दासभावेन पुनः जीवनमारब्धवान्। धर्मान्तरग्रहणसमये, परवर्तिजीवनघट्टेषु च तस्य ऊहापोहा एवात्र मुख्यविषयाः सन्ति।

अत्र लेखकः 1669 संवत्सरे विश्वनाथमन्दिरनाशस्य पूर्णं विवरणमितिहासं च प्रतिपादितवान्। तेन सह राममन्दिर-मथुरामन्दिरादीनां ध्वंसनसूचनां दत्तवान्। तदा एवमेव प्रायः 20000/30000 मन्दिराणि ध्वंस्तानि इति मुसलिमैतिहासिकाः अभिप्रयन्ति। तानि मन्दिराणि अनन्तरकाले कथानायिका लक्ष्मीः पर्यटति, मर्माहता च भवति इतिहासं विज्ञाय। अतीतेन सह वर्तमानस्य सुमधुरं तोलनं समञ्जनं संयोजनं

विद्धात्ययं लेखकः। काश्याः प्रथमदर्शनेन लक्ष्म्याः प्रतिक्रियायां हिन्दुमात्रस्य मर्मदारणमनुभवं पुरस्करोति साफल्येन सह- अहो तत्र! काशी दृश्यते। ज्वलति आकाशे कोटिप्रभायुक्तः करदीपः इव प्रकाशम् उद्वमन्ती, सूर्यस्य अधः परिस्फुरन्ती सा एव किं काशी? .. .. सकलामपि काशीं स्वीयशक्तमुष्ट्या गृहीत्वा अहमेव काशी इति बहुदूरपर्यन्तमपि उद्घोषयत् इव स्थितं मस्जिदम्। .. दक्षिणतः अन्यदपि मस्जिदं दृश्यते, यच्च यद्यपि न तथा आकारेण महत् तथापि औन्नत्येन दृष्टिं हरति। भो शर्मन्, मस्जिदानि एव दृश्यन्ते। विश्वनाथमन्दिरं कुत्र अस्ति? पृ.183।

भारते प्रसिद्धस्य अस्य औपन्यासिकस्य विषये कथनीयमेव नावशिष्यते। सार्थे शङ्करयुगस्य हिन्दूनां, धर्मश्रियां धर्मान्तरितखीष्टानाम् ऐतिहासिकं कथाग्रन्थं विरचय्य अधुना मुसलमानाक्रमणस्य विस्तृतमितिहासमेव निरूपितवान्। अस्य वैशिष्ट्यत्रयं यथा-

साक्ष्यप्रदानम्- सः पात्रमुखेन कथामेवं निरूपयति यथा प्रतीयते स्वयं लेखकः पाठकान् पश्यन्नस्ति इति। हम्पि-टिप्पु-औरङ्गजेवादीनां वर्णनं सः पूर्वाग्रहं विना सत्याधारेण निरूपयति। विश्वनाथध्वंसनस्य साक्ष्यचित्रमुपस्थापयति, मुसलिमानां परम्परायाः ग्रन्थानां च विशेषाध्ययनं प्रमाणीकरोति कथाकारः। अस्मिन् प्रसङ्गे अनेन उपन्यासेन कदाचित् तसलिमानासरिनमहोदयायाः ''लज्जा'' तुलनीया वर्तते। तत्रापि सत्यघटना, मुसलिममौलवादिनामाक्रमणं,बाब्रीमस्जिदध्वंसात्परं प्रतिक्रियाश्च निरूपिताः सन्ति। अत्रापि तथा घटनाः, आक्रमणं, मन्दिरध्वंसनविवरणानि विशिष्य विश्वनाथमन्दिरध्वंसनं तत्प्रतिक्रियाश्च वर्णिताः सन्ति। किन्तु लज्जायाः अपेक्षया क्वचिदयमुपन्यासः अधिकसुखपाठ्यः सहृदयग्राही च वर्तते।

बन्धादेशस्य विरोधः- लेखकः पात्राणि कथावस्तु च तथा सज्जीकरोति, येन अन्तिमभागे उपन्यासेऽपि एकां ग्रन्थसूचीं, तस्याः अपि सूचीं तस्याः विवरणमपि योजयति। पात्रमुखेन लेखकः स्वयं मन्त्रयते- न केवलमस्माकम् एतेषां सर्वेषां ग्रन्थानामाधारः अस्ति। यदि उपन्यासस्य प्रतिकृतिवशीकरणं न्याय्यं भवति, तर्हि तस्य आधारग्रन्थानां सर्वेषामपि प्रतिकृतिवशीकरणं कर्तव्यम्। पृ.269। ततः लेखकः स्वस्मृत्याधारेण आधारग्रन्थानामेकचतुर्थांशमेव लिखति। तेन 51 ग्रन्थकाराणां 106 ग्रन्थानां विब्लोग्राफी एव प्रदत्तास्ति। इतः ज्ञायते पुस्तके तसलिमायाः लज्जा इव

वशीकृतं भविष्यति इति शङ्का औपन्यासिकं प्रतिपदं बाधते स्म, येन तदर्थमपि उपायस्तेन कृत एव आसीत्।

विश्वासवर्यस्य सरलमनुवादः सर्वोपरि ग्रन्थस्वारस्यं वर्धयति। नवनिर्मितया शब्दसंपदा पुष्कलीकरोति संस्कृतभारतीम्। दिङ्मात्रमुदाह्रियन्ते अधस्तात्- काचमयाः स्खलद्द्वारकपाटाः (पृ.35), जीवहरम्- जौहर्(पृ.69), बन्धनादेशः(पृ.265), निरीक्षणप्रतिभूत्वं (पृ.265)। वरं गान्धिकेन सह हस्ताहस्ति, न गोमयवाहकेन सह सरससंलापः (पृ.245) यथा लौकिकसूक्तिमपि सम्यक् अनुवदति। शवशुरौ (पृ.15), दशयते (पृ.28), काचित् जन्मग्रामः (पृ.45), भवयुः(पृ.104), इत्याद्यनिच्छाकृतमुद्रास्खलनेषु मार्गावरोधकेषु स्थितेष्वपि लेखकेन सह सहृदयवेदनो भूत्वा भणितुकाम एवास्मि- काव्यं नाम कस्यचिदपि जनसमुदायस्य संस्कृतेः अत्युत्कृष्टा अभिव्यक्तिः। (पृ.75)

2.10. उत्तिष्ठत जागृत

मूलग्रन्थस्य "उत्तिष्ठत जागृत" इत्यस्य प्रारम्भे सङ्ग्राहक एकनाथरानडेवर्यः स्वीयमुद्देश्यं विवृत्य वदति, "सद्यः अतीतेषु शतकेषु सनातनधर्मस्य जीवनसन्देशं समग्रं प्रपञ्चं प्रापयितुं प्रयासं कृतवत्सु हिन्दुधर्मप्रसारकेषु गुरुदेवस्य रामकृष्णस्य वरशिष्यः विवेकानन्दः एव अग्रगण्यः। सः आसीत् कश्चन अपूर्वः देशभक्तः। ...... वीरभोग्या वसुन्धरा इत्येतत् शास्त्रवचनं स्मारयता तेन, पराक्रमेण जीवत इति सन्दिष्टम्। ...... कालस्य एताम् आवश्यकतां पूरयितुम् एव एतत् पुस्तकं सज्जीकृतम् अस्ति। स्वामिनः विवेकानन्दस्य विचाराः सर्वतोमुखाः। ...... अतः प्राचीनवैभवं विवृण्वतः, राष्ट्रस्य अद्यतनपतनस्य कारणं विवेचयतः, उज्ज्वलभविष्यतः निमित्तम् अस्मान् उत्स्फूर्त्तियुतान् कुर्वतः भागान् एव चित्वा .... संयोज्य नूतनम् अखण्डं स्वरूपं यथा सिध्येत् तथा प्रयासः कृतः अस्ति। ...... मूलभागात् पृथक्करणानन्तरम् अपि येषाम् अर्थः विकृतिं न प्राप्नुयात् ते एव सार्वकालिकाः सार्वदेशिकाः च अंशाः अत्र योजिताः। ...... सङ्ग्राहकः विषयशः तानि विभज्य शीर्षकं दत्तवान् अस्ति, तावदेव।"(पृ.११)

अनुवादिका नागरत्नाहेगडेवेर्या स्वक्लेशं वदति, "वैचारिकसाहित्यस्य अनुवादः न सुकरः। यत्र विचाराः जटिलाः भवन्ति तत्र तु अनुवादे विशेषावधानं भवेत्। क्वचित् मूलस्थस्य अनुच्छेदस्य तात्पर्यस्य अवगमने एव अस्पष्टता। तदा तु अनुवादे भवति महान् क्लेशः। ...... क्वचित् भावस्पष्टतार्थं

दीर्घवाक्यस्यानुवादः खण्डवाक्यैः कृतः अपि। मूलस्य आशयः अनुवादे अन्यथा व्याख्यातः यथा न भवेत् तथा विशेषप्रयासः कृतः।" (पृ.७)।

अत्र भागचतुष्टयेन स्वामिनो वचनानि सङ्गृहीतानि सन्ति। सन्देशः इति प्रथमभागे सप्त उपभागाः सन्ति – अस्माकं पुण्यभूमिः तस्याः उज्ज्वलः इतिहासश्च, आदिकालतः अद्यपर्यन्तम्, धर्मः – भारतस्य आत्मा, पुनरुत्थानकार्यम् – आधारस्तम्भः दिग्दर्शनं च, भारतस्य पुनरुत्थानम्, पुनरुत्थानमहाकार्यम्-१, पुनरुत्थानमहाकार्यम्-२। सम्भाषणप्रवचनलेखेभ्यः उद्धृतम् इति द्वितीयभागे षड् उपविभागाः सन्ति – हिन्दुधर्मस्य व्याप्तिः, स्वधर्मरक्षणार्थं सन्नद्धाः भवन्तु, भारतीयस्त्री – भूते, वर्तमाने, भविष्यति च, भारतपाश्चात्त्यदेशयोः स्त्रियः, आर्यनागरिकताः ऐरोप्यनागरिकताः च, भाविभारतस्य सङ्केतदीपः – शिवच्छत्रपतिः। तृतीयभागे उपभागद्वयेन भावनास्फुरणं वाग्दण्डनं च सङ्गृहीते। मनुष्यनिर्मितिः अथवा कार्यकर्तॄणां प्रशिक्षणमिति तुरीयभागे सङ्घटनं, नायकत्वं, वास्तविकः गुरुः, यशस्विजीवनस्य रहस्यं, कर्मकुशलता इति चत्वार उपविभागाः सन्ति।

यः सन्देशः प्रथमतो निरूपितः स तु हिन्दूनां कृते स्वामिनः सर्वश्रेष्ठः सन्देशः आसीत् – हिन्दुपदस्य उच्चारणमात्रेण एव भवतः शरीरे शक्तिरूपायाः विद्युतः सञ्चारः भवेत्। तदा एव, तथा भवति चेदेव, भवान् हिन्दुः। हिन्दुनामकस्य एकैकस्य अपि मातृभूमिः अन्या चेदपि भाषा अपि अन्या स्यात् चेदपि, सः भवतः प्रियबन्धुः एव स्यात्। तदा एव, तथा भवति चेदेव, भवान् हिन्दुः।एकैकस्य अपि हिन्दोः याः विपदः सन्ति, ताः भवदीयाः एव इति चिन्तनं भवेत्।तदा एव, तथा भवति चेदेव, भवान् हिन्दुः। (पृ.१)।

स्वामिवर्यः देशस्य यूरोपीयैः लिखितं विकृतमितिहासं प्रतिवदन् गौरवोज्ज्वलमितिहासं स्मारितवान्, आर्याणां भारतीयमूलत्वमेव साधितवान्, कटुवचनैः अशिष्टान् तान्, सवंशान् भर्त्सितवान् च। यथा- "किन्तु भारतस्य राशिरूपेण स्थितस्य धार्मिकवाङ्मयस्य, काव्यसागरस्य, दर्शनानां, विविधवैज्ञानिकग्रन्थानां च एकैका पङ्क्तिः अपि अस्माकं प्राचीनजीवनस्य सत्यसुन्दरस्थितिं निरूपयति। नागरिकतायाः उदयात् अपि बहुपूर्वमेव बुभुक्षां, दाहं, भोगलालसा-सौन्दर्यतृष्णादीनि च तृणीकृत्य अदम्यमनोबलेन भावनाशीलतारूपाम् आधारशिलाम् आरुह्य विविधविधिविधानैः वैभवस्य महोन्नतस्थाने प्रतिवसतः तस्याः महाजनसमूहस्य एकैकं पदचिह्नम् अपि प्राचीनेतिहासं द्योतयति।" (पृ.४)। "...... किन्तु एकं तु सत्यम्। आदौ

प्रगाढचिन्तनं यत्र आविर्भूतं, तादृशनागरिकतायाः उषारश्मिः ऐदम्प्राथम्येन यत्र दृष्टं, तस्य प्राचीनभारतस्य वंशे जाताः कोटिशः पुत्राः अद्यापि भारते सन्ति। तस्य वंशस्य मानसपुत्राः सन्तः ते अद्यापि जीवन्ति।" (पृ.५)।

युरोपदेशस्य सर्वसङ्घटनानाम् अपि एष उद्देशः अस्ति– स्वस्य रक्षणार्थम् इतरेषां नाशः इति। किन्तु आर्याणां लक्ष्यमस्ति – न केवलम् इतरेषां प्रगतिसाधनम्, अपि तु इतोऽपि उत्तमस्थितिं प्रति तेषां नयनम्। यूरोपसंस्कृतेः साधनं खड्गः। आर्याणां तु विविधवर्णरूपेण विभागः। विभिन्नवर्णेषु जनानां विभागरूपिणी एषा व्यवस्था एव संस्कृतेः प्रथमं सोपानम्। एतस्मात् मानवः स्वविद्यासंस्कृत्यनुगुणं प्रगतिमार्गे गच्छति। युरोपदेशे सर्वत्रापि शक्तितः एव जयः, अशक्तानां मृत्युः। भारते तु सर्वेऽपि सामाजिकनियमाः दुर्बलानां रक्षणार्थम् एव। (पृ.१२३-१२४)।

अनुवादिकायाः संस्कृतशब्दसौन्दर्येण स्वामिनो वाणी इतोऽपि मधुरा भाति– हे वीरात्मन्! धीरो भव, निर्भीको भव, भारतीयः अहम् इति अभिमानं वद। अहं भारतीयः। सर्वेऽपि भारतीयाः मम भ्रातरः इति साभिमानं वद। अज्ञः भारतीयः, निर्धनः नर्गतिकः भारतीयः, ब्राह्मणभारतीयः, चण्डालभारतीयः इत्यादयः सर्वे अपि मम भ्रातरः एव इति वारं वारं वद। भवतः शरीरे केवलं कौपीनम् एव स्यात् नाम, तथापि चिन्ता नास्ति, परन्तु अशनिरवेण गर्जन् वदतु- एकैकोऽपि भारतीयः मम सहोदरः। भारतीयता एव मम प्राणाः। भारतस्य देवदेवताः एव मम आराध्यदेवताः। भारतस्य समाजः एव मम शैशवावस्थायाः प्रेङ्खा, मम तारुण्यस्य विहारोद्यानं, वार्धक्यस्य वाराणसी इति। (पृ.३३-३४)।

2.11. उल्लङ्घनम्-1

उल्लङ्घनमिति उपन्यासः कथाग्रन्थो वा सन्तेशिवर-लिङ्गण्णय्यभैरप्पवर्यस्य सद्यः प्रकाशितः कन्नडोपन्यासः(दाटु, 1973), यः 1975तमे वर्षे साहित्येकादमीप्रशस्त्या अपि सभाजितः, सद्यः विश्वासवर्येण अनूदितः, संस्कृतभारत्या 2015 संवत्सरे प्रकाशितः। भैरप्पवर्यस्य सिद्धा सरस्वती, आकर्षिका निरूपणशैली, जीवनानुभवाः, समसामयिकाः विषयाश्च विलसन्ति तस्य प्रतिग्रन्थम्।

जातिसमस्यामधिकृत्य भारतीयभाषासु प्रकाशितेषु सर्वेषु अपि उपन्यासेषु उल्लङ्घनम् अतिविशिष्टं उपन्यासः इति गौरवास्पदमस्ति। पाश्चात्यान् समकालिकराजनैतिकतीव्रतायाः समुत्पन्नान् वा सिद्धान्तान्

अनवलम्ब्य सान्द्रैः जीवनानुभवैः युक्तेन सता भारतीयजीवनपरम्परायाः तलस्पर्शिविश्लेषणं कुर्वन् अयमुपन्यासः दलितविचाराणां मूलस्थानभूते महाराष्ट्रे अपि मान्यतामलभत। जीवन्ति पात्राणि, समग्रम् इतिहासम् अभिव्यञ्जयन्तीनां मिथ्-संज्ञकानां पौराणिककल्पनानां कलात्मकः प्रयोगः, परम्पराम् अत्यजन्त्याः क्रान्तदृष्टेः आविष्कारः अस्य मुख्यगुणाः सन्ति। अत्र सप्तदशाध्यायाः सन्ति, प्रथमाध्यायं विहाय अन्यत्र प्रत्यध्यायं एकाधिकाः भागाः सन्ति। आहत्य 479 पुटाः सन्ति। मूललेखकः 1970 संवत्सरे जनवरी-फरवरीमासयोः इमं ग्रन्थं पूरितवान्। प्रायः सर्वाभिः भारतीयभाषाभिः आङ्ग्लभाषया चापि अस्यानुवादः जातः। प्रथमाध्याये एव स्मार्तानां श्रीवैष्णवानां लिङ्गायतानां वैशिष्टपुरस्सरं विरोधं, क्रैस्तानामपि प्रवेशं च निर्भीकतया प्रस्तौति। उदाहरणरूपेण किञ्चित् प्रस्तूयते-

तिरुमलापुरम् इति नाम तेन ग्रामेण कथं सम्प्राप्तम् इति अवगमने कष्टं किमपि नास्ति। तिरुमलस्य, तन्नाम तिरुपतेः श्रीनिवासस्य देवस्थानम् अस्ति इत्यतः ग्रामेण तदभिधानं प्राप्तम् अस्ति। आन्ध्रदेशस्थं तिरुपतिं गन्तुम् अशक्ताः भक्त्या एतस्य श्रीनिवासस्य पूजां कारयन्ति चेदपि इष्टार्थः सिध्यति। अरसीकेरेनगरस्य पार्श्वस्थस्य मालेकल्लु तिरुपति- क्षेत्रविषयेऽपि अयमेव विश्वासः अस्ति। भेदस्तु एतावान्- मालेकल्लु कश्चन पर्वतः, सः मूलं तिरुपतिमेव अनुहरति। परन्तु तिरुमलापुरे तु मन्दिरम् अस्ति न पर्वतोपरि, न वा साधारणे समतलस्थाने। अपि कासारतीरस्य अधस्तात् वर्तमानस्य खातस्य पार्श्वे। ग्रामस्य बहिर्भागे भवति तत्।

विष्णोः देवालयः ग्रामस्य अन्तः भवति। स्थितिपालकस्य विष्णोः जनानां मध्ये वासः सहजः, आवश्यकोऽपि। लयकर्ता ईश्वरस्तु ग्रामात् बहिः भवति। अयं तिरुमलापुरग्रामस्तु अस्ति देवालयात् उपरितने भागे। तन्नाम उन्नते भूभागे देवालयात् नातिदूरे। एकस्मिन् पार्श्वे महान् ग्रामः। ग्रामपार्श्वे उपरितने भागे शब्दं कुर्वन् विशालः कासारः। कासारस्य अधस्तात् जलनिर्गमपथस्य तटे, कासारक्षेत्रात् फर्लाङ्ग्मते दूरे अधस्तात् तिरुमलदेवस्थानम्। देवस्थानमार्गम् उभयतः नारिकेलक्षेत्रम्, धान्यक्षेत्राणि च। पार्श्वस्थां निम्नभूमिम् अतिक्रम्य गम्यते चेत् तत्रापि सन्ति क्षेत्राणि वाटिकाश्च। तदनन्तरं वर्तमाने उन्नतभूभागे स्तः ग्रामस्य अन्त्यजानां वसतिः मादिगानां वसतिश्च।

अन्त्यजानां वसतिः मादिगानां वसतिश्च ग्रामस्यैव भागौ इति यदि परिभाव्येत तर्हि इदं विष्णुमन्दिरं ग्रामस्य मध्यभागे एव अस्ति इति वक्तुं शक्यते। किन्तु ग्रामं परितः शिथिलावस्थाम् आपन्नाः दुर्गभित्तयः सन्ति। एवं सति एतावद्दूरे स्थिते एते वसती ग्रामस्य भागभूते एव इति कथं वा वक्तुं शक्येत? किन्तु यदि तथा न निर्दिश्येत तर्हि अनयोः वसत्योः नाम्नः गौरवमेव न भवति खलु। इयम् अमुकस्य ग्रामस्य अन्त्यजवसतिः, अमुकस्य ग्रामस्य मादिगवसतिः इति निर्देष्टुं शक्येत, तत्स्थाने केवलम् अन्त्यजवसतिः, मादिगवसतिः इति यदि निर्दिश्येत तर्हि तस्य अर्थोऽपि पूर्णतां न याति। एषु दिनेषु कदाचित् अनयोः वसत्योः निवसन्तः केचन "वयम् अस्य ग्रामस्य भागभूताः नैव, अस्माकम् अस्य ग्रामस्य च कोऽपि सम्बन्धः नास्ति। वयं यत्र निवसामः तस्य हरिपुरम् इति नामान्तरमेव करिष्यामः" इति वदन्तः तदर्थं प्रयत्नमपि कृतवन्तः आसन्। पृथक् नाम इत्युक्ते अन्यस्यैव नूतनस्य ग्रामस्य प्रादुर्भावः जातः इव। कस्यचित् नूतनस्य देशस्य उदयः यथा अतीव कष्टकरः, तस्य उदयमेव निरोद्धुं गर्भपातं कारयितुं च मूलवेशः यथा सर्वविधं प्रयत्नं कुर्वन् भवति च तथैव अनयोः वसत्योः स्वतन्त्रग्रामत्वेन उद्घोषणं विरुध्य तिरुमलापुरस्य जनाः सन्नद्धाः अभवन्। परितोगतानां ग्रामाणां जनाः अपि अस्य विरोधम् अकुर्वन्। दृढं जनाभिप्रायं विरुध्य शासने स्थितैः अपि किमपि कर्तुं न शक्यते। शासनमपि बहुजनाभिप्रायं विरुध्य वृथा किमर्थं व्यवहरेत्? अतः शासकीयगणनायाम्, आर्थिकव्यवहारे, दैनन्दिनजीवने च एते वसती तिरुमलापुरस्य भागभूते एव स्तः, अन्त्यज-मादिग-विशेषणाभ्यां सहिते। किन्तु एषु दिनेषु तत्र निवसतां हरिजनशब्देन निर्देशः रूढिम् आगतः अस्ति। देवालयस्य मुख्यस्य तिरुमलेगौडस्य भाषायां तु 'हरिः' इत्येतत् नाम अपवित्रम् अभवत्। अनयोः वसत्योः जनास्तु हरिसम्बन्धिनः नैव अभवन्।

भैरप्पवर्यस्य भाषासिद्धिरपूर्वा एव। अस्मिन् उपन्यासे ग्राम्यजीवनसम्बन्धाः विविधाः सूक्तयः, आभाणकाः, वाक्यप्रकाराश्च प्रयुक्ताः सन्ति। प्रायः प्रतिपात्रं भाषाशैली भिद्यते। कुत्रचित् ग्राम्या, कुत्रचित् अर्धग्राम्या, कुत्र च नागरी भाषा। अतः मर्यादितसंस्कृते सर्वं समानं भवति। जातिवाचकां शब्दानां प्रयोगबाहुल्यमत्र दृश्यते। न केवलं जातिगताः अपि तु सम्प्रदायगताः रूढयश्चाप्यत्र निर्दुष्टतया प्रयुक्ताः सन्ति। ततः लेखकस्य गभीराध्ययनं सूक्ष्मनिरीक्षणं च प्रमाणितं भवति। अत्र ब्राह्मणपुत्रस्य श्रीनिवासस्य मादिग-कन्यायां मीरायां प्रीतिः विवाहपर्यायं गच्छति, तत्रत्या

जातिगता बाधा, जातित्यागेन रेजिष्ट्रेशन-विवाहे ऊहापोहा, लाभक्षतयः विचारिताः सन्ति। एकदा समाजे ये पतिताः आसन् अद्य ते सर्वकारीयसाहाय्येन वर्धिताः अन्त्यजाः कथम् उद्धताः सन्ति, मन्दिरे प्रवेशाय सन्नद्धाः सन्ति इत्यपि सम्यक् निरूपितं कथाकारेण-

श्रीनिवासस्य मनसि तुलना आरब्धा। तस्मात् मादिगात् अपि अहं नीचतरः किम्। स्वस्य तस्य च आरम्भतः अपि सम्पर्कः एव न आसीत्। समाने मार्गे तस्मिन् पार्श्वे तस्य पादरक्षापणः अस्ति, अस्मिन् पार्श्वे मम कार्यालयः। कदाचित् सः एतेन मार्गेण एव अटन् भवति। किन्तु कदापि परस्परं न आभाषितम्। सः पिता इव न। महान् अहङ्कारी अस्ति। तादृशं श्मश्रु वहति येन मुखे भागः अनुभूयते।

स्वेनापि इतिहासः पठितः अस्ति। एते अन्त्यजाः मादिगाः सर्वे के। सदा ग्रामात् बहिः कुटीरं निर्माय निवसन्तः, मृतानां धेनूनां मांसं भक्षयन्तः सुरां पिबन्तः पतिताः भवन्ति स्म। इदानीं सर्वकारेण तेभ्यः आवासगृहाणि निर्माय दत्तानि। छात्रवृत्तिः दीयते। मोहनदाससदृशाः अतः किञ्चित् क्रियाशीलाः दृश्यन्ते। तथापि सः मया समानः भवेत् किम्। समानः एव न, मत्तोऽपि उच्चतरः भवेत् किम्। ... ... स्वस्य तु दीर्घस्य मुखस्य, कृशयोः भ्रुवोः, नेत्रगल्लकर्णानां वा वर्णः क्व, तस्य मादिगस्य मुखस्य अवलक्षणं क्व। तस्य गल्ले अपि उत्फुल्ले स्तः। किन्तु कृष्णवर्णः महिषनेत्रसदृशे नेत्रे। उन्नतं प्रवृद्धं च गात्रं स्यात् तस्य, किन्तु महिषस्य इव गात्रम्। किन्तु महिषस्य इव अक्रमेण प्रवृद्धे विशाणे तु न स्तः। तस्य कर्णौ कथं स्तः इति मया कदापि सम्यक् न दृष्टम्। तस्य अनुरूपौ एव स्याताम्। एवं सत्यपि सा किमर्थं तम् अङ्गीकृतवती।.. किन्तु मत्तोऽपि नीचजातीयस्य सर्वेषु अपि विषयेषु हीनस्य तस्य पाणिग्रहणरूपं हीनकार्यं कुर्यात् किम्। ..... पार्श्वे एव कृष्णवर्णं विकारश्मश्रूपेतं, महिषनेत्रनासिकोपेतं मोहनदासस्य मुखम्। किन्तु तत्र विषाणे दीर्घौ कर्णौ च स्पष्टतया न दृश्यन्ते। एकदृष्ट्या वीक्ष्यते चेत् तेऽपि दृश्यन्ते। सः महिषः एव। अन्यथा तज्जातीयानां मारिकोत्सवे महिषं किमर्थं बलिं यच्छन्ति। महिषः नाम मादिगः एव। अहं तां कथाम् ..।(पृ.419-421)

प्रवृद्धानां लेखकानां ग्रन्थेषु मिथ-प्रतीक-विम्बानां सादृश्यं द्रष्टुं शक्यते। अवक्षयोन्मुखसमाजस्य ध्वसनम् आधुनिकयन्त्राणां प्रयोगेण स्थितिशीलसमाजस्य क्षयिष्णु गलनं प्रवहणं वा रवीन्द्रनाथस्य मुक्तधारा-नाटके मनोजदासस्य वुलड्रोजर-नाटके अत्रापि च द्रष्टुं शक्यम्। मुक्तधारायां

निर्मितस्य बन्धस्य स्फोटनं करोति जनता स्वप्राणान् अविगणय्य। अत्र अन्तिमे तथैव डिनामाइट-स्फोटनेन जलप्रवाहेन प्लावितं जगत् .. महाप्रलयं सूचयति यत्र नामरूपजातिवर्णनिर्विशेषेण सर्वं नष्टं भवति, अवशिष्यते वटस्य पत्रस्य पुटे शयानः – प्रणवपुरुषः। अत्रापि सर्वं नश्यति .. सर्वं त्यक्त्वा सत्या महाप्रलयापरपर्यायं जलस्य महापूरं पश्यन्ती ऊर्ध्वोर्ध्वमारोहन्ती परमं पवित्रमपि यज्ञोपवीतं क्षिपन्ती यत् एकदा तस्याः अभिमानधनमासीत्। यथा-

तदैव अङ्गुल्या चोलस्य अन्तः निहितं यज्ञोपवीतं स्पृष्टम् अभवत्। सा यज्ञोपवीतम् अङ्गुलीभिः गृहीत्वा स्थितवती। पित्रा उक्तं वचनं पुनः स्मृतिपथे अवतरितुम् आरभत। प्रवाहः। प्रलयः। सर्वत्रापि जलम्। वटपत्रम्। नूतनः संस्कारः। इदं यज्ञोपवीतं पित्रा धारितम् इति स्मरणे आगतम्। यज्ञोपवीतं परमं पवित्रम्। जन्मना शूद्रायाः स्त्रियाः अपि यज्ञोपवीतम्। तत् मया मीरया धारितं यत् तस्य स्मरणम् आगतम्। अहम् अन्यां शूद्रां तत्रापि शूद्रातिशूद्रत्वेन मतां ब्राह्मणीं कृतवती। किन्तु जले निपतनात् पूर्वं मीरा यज्ञोपवीतं निष्कास्य स्थापितवती आसीत् खलु। तस्य अर्थः कः।

मनः निर्वेदग्रस्तम् अभूत्। शरीरे जुम् इति अनुभूतम्। कस्य अर्थस्य स्फुरणेन एवम् अनुभूयते इति तया नावगतम्। ... दक्षिणहस्तः अकस्मात् इव यज्ञोपवीतं दृढम् अगृह्णात्। बलात् आकर्षत् च। फट् इति छिन्नं सत् हस्ते आगतं यज्ञोपवीतम् आवेष्ट्य पिण्डीकृत्य सा हस्तेन गृहीतवती। जलम् इतोपि उद्गच्छत् आसीत्। सा अधः अवतीर्य तत् पिण्डीभूतं यज्ञोपवीतं जले क्षिप्त्वा उपरिभागे परिवृत्ता अभवत्। ... अनतिकालेन धियो यो नः प्रचोदयात् इत्येतत् वाक्यं तस्याः मनसः अधोभागात् प्लवमानम् इव आगत्य नर्दतः जलस्य मध्ये अपि स्पष्टतया श्रवणगोचरतां गच्छत् आसीत्। तदेव जिह्वा ओष्ठौ चापि उच्चारयन्तः आसन्। (पृ. 478-479)

2.12. उल्लङ्घनम्-2

उल्लङ्घनम् इति अनूदितकथासङ्ग्रहस्य मूलकथाकथयित्री डॉ.प्रतिभारायमहोदया न केवलम् उत्कलेषु अपि तु देशे विदेशे चापि नितरां प्रसिद्धा स्वसाहित्यसृजननिमित्तम्। अयं कथासङ्ग्रहः भागीरथिनन्देन 2015 संवत्सरे अनूदितो वर्तते। अनुवादविषये स्वयमनुवादको वदति- प्राकरणिकेऽस्मिन् कथासङ्ग्रहे स्वसूक्ष्मकल्पनया रचयित्री सामाजिकजीवनस्य समस्यान्तर्द्वन्द्वमनोविज्ञानानां पटं वयति। मयात्रानुभूतं यत् प्रत्येकं कथाया

अन्ते कथाकारेयं पाठकं तस्मिन् चिन्तनचतुष्पथे स्थापयति, यत्र स्वयं पाठकोऽपि स्वकल्पनयाऽन्यामपि नानाविचारभूमिं सृजेत्। अस्य सङ्ग्रहस्य कथानां परिवेशः पार्वत्य-ग्राम्य-नागरिकसमाजजीवनम्। पात्रचित्रणे साहित्यिकेयं सामाजिकमनुभूतेरन्तःस्थलं प्रविश्य तद्गतचित्तविकल्पाननुसन्दधाति। परिवेशे सञ्जायमानानां वास्तवानामन्तराले नैकाः सम्भावना अन्विष्यति काव्यसङ्ग्रहोऽयम्। (पृ.7)।

अस्मिन् सङ्ग्रहे एकविंशतिः कथाः सन्ति- उल्लङ्घन-एण्टिक्-गान्धी उवाच-निरुत्तर-रुद्धावतार-पादुकापूजा-व्याघ्र-घुण-भोजनोत्सव-दुहिता-कपटद्युत-तात्त्विक-अनामधेय-भगिनीभाग-मानरक्षाकेतकीवन-पादुकायुगल-अमृतनैवेद्य-निजसङ्केत-अनुक्तं वृत्तं-मातृविभाजनम् इति। 236 पुटेभ्यः प्रथमपुटाष्टकं विहाय अत्र 228 पुटेषु कथाः विस्तृताः सन्ति। प्रायः एकादशपुटेषु व्याप्ता एका। अतः कथमपि एताः लघुकथास्तु न सन्त्येव। अत्रत्या दीर्घतमा कथा तात्त्विकः इति 16 पुटेषु व्याप्ता, लघुतमा कथा भोजनोत्सवः इति 4 पुटेषु व्याप्ता वर्तते। आकारदृष्ट्या विचार्यते चेत् अत्र भोजनोत्सव-पादुकायुगल-व्याघ्रादिद्वित्रकथाः एव कष्टकल्पनया लघुकथापदवीमारूढाः भवेयुः।

उल्लङ्घनम् इति कथायां यौवने विधुरस्य श्वशुरस्य वध्वां कथं दृष्टिरिति निरूपिता, अन्ततो समग्रं जीवनं श्वशुरं सेवमानापि वधूः कथं श्वशुरस्य मर्यादां संरक्ष्य लोकापवादमविगणय्य समाजं विलङ्घ्य अनागतेऽपि तत्पुत्रे स्वयं पित्रालयं पलायते। व्याघ्रः इति कथायां प्रभुः सेवककन्यायाः उपरि अत्याचारं कृत्वा तां मारयित्वापि न्यायालयात् मुक्तः, स एव सेवकः अगण्यः(अगणि) इच्छन्नपि स्वहस्तपालितायाः प्रभुकन्यायाः उपरि अत्याचारार्थं गतोऽपि केवलं प्रहर्तुं समर्थो भवति, तदर्थं कारावासं स्वीकरोति, परन्तु ग्रामीणाः प्रस्तराघातैः तं मारयन्ति। अत्र व्याघ्रस्य प्रतीकं सम्यक् व्यवहरति लेखिका यदा मनुष्यो निष्ठुरो भूत्वा किमपि कार्यं विदधाति। अपरं च व्याघ्रः मनुष्यं खादित्वा जीर्णं करोति, परन्तु कृतकव्याघ्रः तु मरति। - अगण्यस्य मानुष्यं शनैः शनैर्लोपं याति। तस्य हस्तचरणा व्याघ्रस्यैवावस्थान्तरिताः। तस्यापि दन्ता नखाश्चाङ्कुरिताः। सम्प्रति स पूर्णतो वन्यः शार्दूलः। मीनानयनाभ्यामगण्यो व्याघ्रमुखो दृश्यते। किन्तु अगण्ये वर्तमानो मनुष्यः स्वदेहं सहसा त्यक्तुं न प्रस्तुतः। (पृ.86)। परन्तु ग्रामप्रवेशे तदुपरि लोष्टवृष्टिरारब्धा। ग्रामे तथाभूतस्य पापकर्मणः स्थानमेव नास्ति।

वास्तविकव्याघ्रा घ्नन्ति, मृषाव्याघ्रास्तु म्रियन्ते- इत्येव प्रकृतिनियमः।(पृ.88)।

भोजनोत्सवः इति तस्य गौरवमेवमभिदधाति- भोजनोत्सवः, स पुनर्विशिष्टानां, सोऽपि विवाहस्य, यावद् भुज्यते, ततोऽधिकं पत्रे त्यज्यते। स एवानन्दः।(पृ.103)। सायं भोजनोत्सवः। प्रातःकालादेव पाकपरिसराद् धूमसञ्चयो विनिर्गच्छति।... धनवन्तो जनाः कपाटं पिधाय, चन्द्रातपान्तराले वा रम्याणि भोज्यानि सेवन्ते। तत्सुगन्धं तु दरिद्रान् पीडयितुं कस्मात् पवनेन प्रवाहयन्ति।(पृ.104)। कथायां कर्मणि कर्मकरबालकस्य आदरः न तु भोजने इति सतथ्यं प्रतिपादितं लेखिकया। उच्छिष्टं भोक्तुकामोऽपि तन्न लभते, अपितु मुष्ट्याघातं प्राप्य निद्राति। प्रातः तु कुक्कुरमुखात् किमपि नावशिष्यते। यथा- स बालकश्चन्द्रातपं परितो रशनालुब्धो मार्जार इव भ्रमति। चिरान्मुखाय स्वादिष्टं किञ्चिदुपलभ्येत। तदस्तु नामोच्छिष्टम्। उच्छिष्टादपि भोज्यात् स्वादो न दूरीभवति। पायसान्माधुर्यं न ह्रसते, न चाम्लिकादम्लता। तत उच्छिष्टे क्व बत दोषः। वीथीश्वानो बिडालाश्चोच्छिष्टं न गणयन्ति, मनुष्यो वा तत् कुतो विचारयेत्। वीथीकुक्कुरात् परिचयहीना मानवशिशवः केन गुणेनाधिकतरा हन्त।(पृ.104)। ... गालिर्दरिद्रं न बाधते, प्रहारोऽपि न बाधेत तं चेद् वरं स्यात्। बुभुक्षाविकलोदरः क्रन्दन् बालकोऽवसन्नोऽचिन्तयत् अर्धं तु व्यतीतं निशायाः। प्रातरेवोच्छिष्टमन्विष्य भक्षयिष्यति। अस्वपत् सः। स्वप्नेऽपश्यत्- भोजनोत्सवस्योच्छिष्टं भुङ्क्ते। ... प्रातर्निद्राभङ्गात् पूर्वमेव दुष्टैरुच्छिष्टलोलूपैः कुक्कुरैः सर्वाण्येव तत्पत्राणि परिष्कृतानि। भोजनोत्सवः समाप्तः।(पृ.106)।

पादुकायुगलम् इति कथायां नवम्यां काचिद् भक्ता कथं स्वयाचनासूचीं विस्मृत्य नवीनक्रीतां बाटाद्योगनिर्मितं पादुकायुगलं स्मरति, येन तदेव सुरक्षितं तिष्ठति देवीमन्दिरस्य महासम्मर्दे जनानां महापूरे। क्षुल्लकवस्तुनः अभिलाषेण कथं लक्ष्यभ्रष्टो भवति मानवः इति कथायाः अस्याः सारः।

तात्त्विकः इति कथायाः प्रारम्भः एवं भवति संसारे सर्वे शिशवो - :नानाथा, सर्वे वृद्धास्त्वनाथा एव। यतोहि कस्यचिद् वृद्धवयसि तस्य पितरौ, पितृव्यः, पितृव्याः, मातुलदम्पती, ज्येष्ठाश्च सर्वे स्वर्गपुरं स्पृष्टपूर्वा एव भवन्ति। कस्यचन वार्धक्ये प्रायेण तत्सन्ततयो युवानो भवन्ति।

संसारबन्धनमाजीवनं जीवनमस्थिरीकरोति। बन्धनं बन्धनान्तरं कस्यापि। आगतेऽपि मोक्षे :। न ततो मोक्षःप्रापयति। यावज्जीवं लोभ आत्मपरिवर्तनाय काल आयुश्च नावशिष्येते। को विश्वस्ततरः? जीवनं मृत्युर्वा? कतरो निष्कपट उदारश्च? सत्योपलब्धिः? ।(134.पृ)

अत्र लेखिका परस्परं विपरीतपथा जीवनयापयतोः प्रतिवेशिनोः वृद्धयोः मरणात्परं कथं वार्तालापः प्रचलति इति निपुणं वर्णयति। एकमेको धूर्तः केनापि उपायेन धनं सङ्गृह्य आत्मानं धनसर्वस्वं सर्वश्रेष्ठं चिन्तयति। तदा एव तत्प्रतिवेशी कथं तेन तर्पिताः पुरुषाः पुनः अस्य गृहं प्रविश्य तद्विरुद्धं जल्पन्ति इति सम्मर्मदारणं निरूपयति।

2.13. ऊर्मिला

साकेतराजवधूः ऊर्मिला इति उपन्यासः श्रीनरसिंहमिश्रकृतः नारायणदाशेन अनूदितः सरलसंस्कृतेन। वीरलक्ष्मणस्य शक्तिरूपा आसीत् तस्य पत्नी ऊर्मिला, या तदपेक्षया अधिकं कष्टकरं ब्रह्मचारिण्याः जीवनं यापितवती कोशलस्य राज्ञः अन्तःपुरे, विना कारणम्। सा कथा अत्र 300 पुटेषु निरूपिता वर्तते।

साकेतराजवधूः ऊर्मिला इत्येकः चरितोपन्यासः। परन्तु इदं जीवनचरितं नास्ति। जीवनचरितं सम्पूर्णजीवनमाधारीकृत्य लिख्यते। किन्तु चरितोपन्यासः युगपत् सत्यकल्पनयोः समाहारो वर्तते। त्रेतयायुगस्य महीयस्याः मनस्विन्याः नार्य्याः साकेतराजवध्वाः ऊर्मिलायाः जीवनचरितस्य लेखनं सरलं नास्ति। तदर्थमिदं मया चरितोपन्यासरूपेण चित्रितम्। विशालकाले अस्मिन् उपन्यासे कथाभागः 300 पुटेषु परिव्याप्तः अस्ति। तत्र नवदशाध्यायैः विभक्तोऽयं मूलभागः प्रत्यधायमपि कैश्चित् भागैः विभक्तः। कुशध्वध-मालावतीति मुनिदम्पत्योः सन्तानप्राप्त्यर्थं तपःसाधनया सहसा आरब्धोऽयमुपन्यासः। यथा-

गभीरतपस्यायां मग्नो .... ब्रह्मर्षिः कुशध्वजः। गृही तपस्वी सः, संसारस्तस्य अवलम्बनम्। मुनिपत्नी मालावती, तपस्विनी। दम्पत्योरभिलाषः, मातरं लक्ष्मीं स्वकन्यारूपेण लब्धुम्। मायामयीं पृथिवीमानेष्यति ममतामयीं लक्ष्मीम्। तयोः मातृत्वं पितृत्वञ्च सार्थकीभविष्यतः। तपस्या सार्थकीभूता। मालावती जाता अन्तःसत्त्वा। मनसि अपरिमित आनन्दः। प्रभाकम्या भवतु। अयं वसुन्धरा भवतु ! कमलाया लीलाभूमिः। प्राणमयी प्रार्थना परिपूर्णा अभवत्। पुण्यतिथौ

लक्ष्म्याः पुण्यवासरे पुण्यमयी कन्या आगत्य चाञ्चल्यमानीतवती .... कोऽहं, कोऽहम् ....इति निनादेन। .पृ) 1)

अत्र प्रथमाध्याये वेदवत्याः जन्म, तपस्या, रावणस्यात्याचाराः, श्रीरामस्य जन्मकथाश्च लसन्ति।

...चैत्रमासस्य शुक्लपक्षे नवमीतिथिः। पुनर्वसुनक्षत्रम्। कर्कटलग्नं, रविमङ्गलशनिशुक्रबुधानां पञ्चग्रहाणां मेलनम्। अयोध्याकाशे उदितो नवीनसूर्यः। धरावक्षसः अन्धकारः अपसारितो भविष्यति। श्रूयते नूतनातिथेरागमनीमन्त्रः। कौशल्यायाः स्फटिकनिर्मितधवलप्रासादचत्वरे नवदूर्वादलश्यामो लोकाभिरामः शिशुसन्तानः शोभते। किमात्मविस्मृतरूपम्। सृष्टः कश्चन आत्ममयो मन्त्रमयः परिवेशः। मर्त्यविष्णोः मर्त्यावरणमभवत्। तस्य आद्यक्रन्दने कोऽहं क्वाहं नादेन प्रतिध्वनितो भवति रामः रामः रामः। चतुर्दिक्षु श्रूयते रामनाम्नो गुञ्जनम्। ग्रहस्थित्या शकुनशास्त्रानुसारेण नवजातकस्य शिशोः नामकरणं जातं श्रीरामः। .पृ)8)

द्वितीये अध्याये मिथिलाराजवंशस्य पूर्वपरिचयः, सीरध्वजजनकस्य शासनम्, शुकदेवस्य कथा, सीतायाः जन्मकथा च सन्ति। यथा- मिथिलापुर्यां मर्त्यलक्ष्म्याः अभिसारः अभवत्। सम्पूर्णे राज्ये आनन्दोल्लासस्य वन्या। अयोध्यापुर्यां मर्त्यविष्णोः अभिसारः। जनकपुर्यां मर्त्यलक्ष्म्याः अभिसारः।अनागतं भविष्यं किं घटिष्यति को वा वदतु। पृ).24)

तृतीयाध्याये ऊर्मिलायाः जन्मकथा, बाल्यलीला च वर्णिता। चतुर्थाध्याये साङ्काश्यराजं पराजित्य तत्र कुशध्वजस्य अभिषेको जातः। पञ्चमाध्याये यज्ञमयस्य जनकपुरस्य, राजपुत्रीणां दिनचर्यायाः च वर्णनं जातम्। षष्ठे अध्याये अयोध्यानगर्याः, राज्ञः दशरथस्य, राज्ञीनां च वर्णनेन सह रावणस्य दुष्टराक्षसानां च अत्याचाराः वर्णिताः। रामलक्ष्मणयोः विश्वामित्रेण सह सिद्धाश्रमगमनं, दिव्यास्त्रलाभः, ताटकावधः, सुवाहुमारीचयोः वधः, अहल्योद्धारस्य कथा वर्णिता। सप्तमाध्याये सीतास्वयंवरस्य कथा वर्णिता। अत्र कथाकारः श्रीरामचरितमानसशैल्या तत्र यथा पुष्पचयनसमये सीतारामयोः मेलनं कल्पितं, तथैवात्र लक्ष्मणोर्मिलयोः मेलनं कारयति।

अष्टमाध्याये लक्ष्मणोर्मिलयोः विवाहात् प्रथमा रात्रिः वर्णिता। वधूजीवनस्य कर्तव्यपालनतत्परता अत्र सविस्तरं वर्णिता। नवमे राजवधूनां

कथा, दशमे राज्याभिषेकपूर्वकथा, एकादशे वनवासश्च निरूपिताः। द्वादशाध्याये दशरथस्य मृत्युः, त्रयोदशे भरतस्यागमनम्, चतुर्दशे चित्रकूटगमनं, भरतस्य राज्यपालनं वर्णितम्। पञ्चदशाध्याये लक्ष्मणोर्मिलयोः विरहवेदनां प्रगुणीकरोति कथाकारः। षोडशे सीताहरणस्य युद्धस्य च विवरणमस्ति। सप्तदशाध्याये अयोध्याप्रत्यावर्तनं, श्रीरामस्याभिषेकश्च वर्णितौ। सीतावनवासादिकम् अष्टादशाध्याये वर्णितम्। महाप्रयाणस्य सज्जतां दिव्यपुरुषाणां लीलावसानं च वर्णयति कथाकारः नवदशाध्याये यथा-

अतिन्द्रियभावमयः श्रीरामः वाष्परुद्धकण्ठेन अकथयत्- वत्स लक्ष्मण! अस्मिन्नेव मुहूर्त्ते त्वामहं परित्यजामि।

श्रीरामस्यामृतादेशं श्रुत्वा स्वभवनमप्रतिगत्य लक्ष्मणः एकाग्रचित्तेन योगमग्नमनसा निरगच्छत् सरयूकूलम्। संवादप्राप्तिमात्रेण ऊर्मिला निमेषेण तदनुगता। लक्ष्मणस्य योगासनस्य समीपे ऊर्मिलापि योगारूढा जाता। तौ परितः वेष्टितः कश्चन आलोकवलयः। उभावपि स्वप्राणवायुं समहरताम्। सरयूकूले सिक्तवायुमण्डले झङ्कृतोऽभवद् ब्रह्मनादः ....।

श्रीराम! जगदाधार! ब्रह्मानन्दसुखप्रद!
त्वन्नामस्मरणेनैव चरिष्ये भवसागरम्॥ (पृ. 300)

एवमवसितेयं कथा। यद्यपि सर्वत्र श्रीरामस्य प्रामुख्यं दृश्यते तथापि ऊर्मिलायाः सात्त्विकचरित्रस्य संविधाने मूललेखकः सफलः दृश्यते। अनुवादकस्य भाषा सरला, मूलानुगा। कवितानामनुवादःश्लोकैर्विहितः। यथा

हे कर्मयोगफलधारक! हे तपस्विन्!
त्यक्त्वा सुखं विजनमार्गतटेऽसि गन्ता।
हे दूरयात्रिक! चिरं चलनीयमस्ति
नाद्य व्रतं ह्यवसितं खलू जीवनस्य॥ (पृ. 240)

2.14. कथाञ्जलिः

इन्दोरवास्तव्यस्य डा.योगेन्द्रनाथशुक्लस्य पञ्चपञ्चाशत्कथाः 'कथाञ्जलिः' इति शीर्षकेण हिन्दीमूलेन सह सङ्कलिता संस्कृतेन चानूदिता अर्चनाजोशीवर्यया। एताः कथाः प्राय एकपुटात्मिका अर्धपुटात्मिकाः क्वचिदेव (व्यामोहः, मुक्तिर्नैव, दुर्घटना, पुनरपि तोडनीयोऽहम्, पुस्तकम्, द्वन्द्वः, आत्मकथा, क्षयित्वबोधः, संवेदना, स्फुटति मनः, उपजीविका, सन्देहनिर्णयः, मूल्याङ्कनम्, शीर्षपङ्क्तयः, शपथयात्रा, दोषः) द्विपुटात्मिकाः

सन्ति। कथासु व्यङ्ग्यबाणः सुतीक्ष्णो वर्तते। लोकसंवेदनापि दर्शनीया एव। अत आधुनिकसंस्कृतकथानां वर्गीकरणानुसारेण एता अर्धपुटात्मिकाः टुप्कथारूपेण, पुटात्मिकाः पुटकथा(पत्रकथा)रूपेण, अवशिष्टा द्विपुटात्मिका लघुकथारूपेण विचारयितुं शक्याः। कदाचिद् अनेन वर्गीकरणेन सम्पादिका अपरिचिता वर्तते।

अत्रत्या मूलकथा अत्युत्तमाः सन्ति। व्यामोहः, मुक्तिर्नैव, दुर्घटना, प्रेतः, पुनरपि तोडनीयोऽहम्, व्यथा, कुटुम्बकम्, ईर्ष्या, सन्देहनिर्णयः, मूल्याङ्कनम् इति कथाः सर्वथा हृदयं हरन्ति। अत्रत्या अधिसंख्यं कथा राष्ट्रभावभाविताः सन्ति। 'प्रेतः' इति कथायां कथाकारेण अमरत्वं गतस्य मेकालेप्रेतस्य उत्सारणा विहिता। 'पुनरपि तोडनीयोऽहम्' इति कथायाम् अवसरप्राप्तेः परं सर्वकारीयभूमौ कृषिं कुर्वतः, भाटकगृहे निवसतः सेनाधिकारिण उपरि बहुभूमिकप्रासादनिर्माणाकाङ्क्षिणो गृहस्वामिनः क्रूरः अत्याचारो वर्णितः। व्यथा इति कथायां मित्रपुत्रेण रमेशेन पितुः गृहं भङ्क्त्वा प्रासादं निर्मीय आधुनिकरुचिबोधेन सज्जिते प्रासादे तत्पितुः नाम स्वमित्रस्य चित्रमनवलोक्य व्यथां प्राप्नोति अपरं मित्रम्। कुटुम्बकम् इत्यत्र कुटुम्बजीवने विश्वसतः पितुः तत्र अविश्वासवता पुत्रेण वृद्धाश्रमे प्रापितस्य दुःखमित्थं वर्णितम्, "सन्ततेरभावो हि दुःखस्य कारणं भवति। लब्धजन्मनः सन्ततेर्निधनत्वं ततोऽपि दुःखतरं किन्तु यदि अपत्यं स्वजनकं वृद्धाश्रमं प्रति आनयति, तदा तस्माद् दुःखतमं नु किं भवेत्?" (पृ.६७)। 'ईर्ष्या' कथायां परिवारजनैः अवकरकण्डोले निक्षिप्तयोः परित्यक्तद्रव्ययोः इव पित्रोः करुणगाथा परस्परम् ईर्ष्याकारणमिति सूचयति। 'अवसादः' इति कथायां युद्धे स्वर्गगतिं प्राप्तुम् अक्षमसैनिकाभ्यां परसेवायां जीवनं दुर्विषहं भवति इति परस्परवधेन कथा स्वर्गीया जाता। 'सन्देहनिर्णयः' कथायां कथाकार इण्डियाभावात् कथं प्रतिदिनं भारतभावना पराजयते इति सुष्ठु निरूपयति। रहस्यमिति कथायां प्रथमप्रणयस्य अनुरागमाजीवनं स्मरति नायकः। द्वन्द्वो नारीजीवनस्य समाजस्य च समस्याः समग्रीकरोति। भारतीयजीवनस्य चित्रं दृश्यते शपथयात्रायाम्।

एतासु कथासु स्वतन्त्रदेशस्य देशभक्तानां देशद्रोहिणां मन्त्रिणां साधारणजनानां च प्रतिबिम्बनं, महानगरीयजीवनस्य उच्चावचप्रवाहाः, समसामयिककालस्य चङ्क्रमणं च सम्यक् निरूपितानि कथाकारेण। क्वचित् कथासु प्रसिद्धस्य कथाकारस्य मण्टोवर्यस्य प्रभावो लक्ष्यते।

अनुवादविषये एतद् वक्तव्यं यद्, यत्र मूलशब्दाः संस्कृते वर्तन्ते, तर्हि तेषां तथैव चयनं सुखपाठ्यं भवति। भवतु नाम सौन्दर्याधायकः अपरशब्दः परन्तु मूलशब्दात् परिवर्तनं कथमपि न सह्यमनुवादे इति मामकीना मतिः। यथा– भूतस्य कृते प्रेतः, कपट-धूर्तता, आत्मग्लानि-अवसादः। यत्र तत्र आङ्ग्लशब्दानां यथावद्ग्रहणमपि न दोषः, भ्रान्तप्रयोगापेक्षया– कैप्टन(२७), हैट (१९)... ...। क्वचिदनुवादो मूलेन साम्यं न भजते यथा– भूल– व्यामोहः, ...। क्वचित् मूलादुत्कृष्टो जातः अनुवादः संस्कृतभङ्गिभणित्या। यथा– पुराणपन्थानुयायिनी... ..., उपालम्भितम्(३), परिणतप्रायमष्टमोप्यहः(२३), वाहेगुरुशपथात् वाच्यो भवान्(२७)। मूलेन सह अनुवादाः साधुवादार्हा एव सर्वथा। परन्तु दुष्टाः प्रयोगा अवश्यं संशोधनीयाः। क्वचित् प्रयोगा उत्तमा अपि न श्लाघ्याः सन्ति– दोपहर के बारह बज रहे थे– अपराह्णकालो ह्ययं द्वादशवादनात्मकः, सिगरेट– लघुतमालशलाका(२१), बिस्कुट की प्लेट– पिष्टकस्थालं(८१), बिल– अभ्युपगमलेखः। तथापि उत्तमकथानामनुवादोऽपि संस्कृतकथासंसारं प्रभावयिष्यति।

2.15. कनकावरणम्

कनकावरणस्य लेखकः डा.के.एन्.गणेशय्यो वृत्त्या कृषिविज्ञानी अपि कन्नडभाषायाम् उत्तमकथाकारो वर्तते। तस्य दशाधिकेषु कथाग्रन्थेषु द्विशताधिकशोधपत्रेषु सर्वत्र वैज्ञानिकतत्त्वानि सरसं निरूपितानि सन्ति ऐतिहासिकसाक्ष्यैः। तेषु आद्योऽपि अत्युत्तम उपन्यासः 'कनकमुसुकु' इति प्रबुद्धेन साहित्यिकेन जनार्दनहेगडेवर्येण 'कनकावरणम्' इति शीर्षकेण अनूदितः सन् सम्भाषणसन्देशे सार्धद्विवर्षं यावद् वाचकानां कुतूहलं वर्धयन् २८ भागैः धारावाहिनीरूपेण प्रकाशितः सद्य एव २०१४ संवत्सरे डिसेम्बरमासे समाप्तिं गतः अधुना पुस्तकाकारं गत इति आनन्दस्य विषयः। अतीतेतिहास-वर्तमान-भविष्यकल्पनानां सुसंयतविन्यासेन कथाग्रन्थोऽयं सर्वथा सुखास्वाद्यो जातः। काल्पनिककथायामपि इतिहासं योजयन् कथाकारः कथायामपरां मात्रां योजितवान्। प्रकाशको ग्रन्थस्य विषये एवमभिप्रैति– 'कनकावरणम्' एतत् काल्पनिककथावस्त्वाधारितम्। किन्तु अत्र वास्तवस्य आधारः अस्ति, चरित्रस्य पृष्ठभूमिका अस्ति, वैज्ञानिकविवरणानि सन्ति, वस्त्वनुगुणानि चित्राणि सन्ति, सङ्ख्यासूत्रप्रहेलिका अपि अस्ति। अत एव कथापुस्तकम् एतत् पाठितृषु महत् कौतूहलं जनयति।

मूलतः रहस्यानुसन्धानपरकेयं कथा ऐतिह्येन आधुनिकसमाजेन च युक्ता सती महीयते। पूजायाः संशोधनमाध्यमेन कथाकारः प्रत्येकवचनं ससन्दर्भं प्रमाणीकरोति। तेन कथाग्रन्थस्यास्य विश्वसनीयता वर्धते। प्रायशः पत्रैः, ईपत्रैः, संवादैः पूरितेऽस्मिन् ग्रन्थे मुख्यतः प्रत्यक्षशैली एव उपात्ता इति कथातत्त्वं क्वचित् क्षीणरेखेव भाति। तथापि मध्ये मध्ये कथाकारः प्राप्तस्यावसरस्य सदुपयोगम् अकरोत्– "अन्धकारबहुलायां तस्यां गुहायां किं स्यात् इति झटिति एव अवगन्तुं शक्यं न आसीत्। गुहायाः अन्तर्भागतः वेगेन वहन्त्याः नद्याः प्रवाहस्य ध्वनिः निरन्तरं श्रूयते स्म। गुहागर्भात् आगच्छन् शीतलः मारुतः तुषारकणैः आर्द्रत्वेन च युक्तः आसीत्। द्वित्राणां निमेषाणाम् अनन्तरं नेत्रे अन्धकारे अपि यदा दर्शनसमर्थे जाते तदा पूजया तत्र तत्र मन्दं प्रकाशं प्रकाशयन्तः केचन दीपाः लक्षिताः। दीपानां पार्श्वे अनेकविधाः आकाराः। पूजा नेत्रे विशालीकृत्य अपश्यत्। क्षणं यावत् सा दिग्भ्रान्ता। एकैकस्यापि दीपस्य समीपे तिष्ठति एकैकः दिगम्बरः मुनिः। केचन योगे मग्नाः दृश्यन्ते। अन्ये केचन स्तम्भाः इव अचलतया स्थिताः। पुनः केचन लेखने मग्नाः।... ... पञ्चाशत्पादमितं दूरं यदा अतिक्रान्तं तदा गुहा अनतिविस्तृता जाता। तेषां नग्नानाम् ऋषीणां मध्ये शरीरस्पर्शं कथमपि निवारयन्ती पूजा अग्रे अगच्छत्। तथापि मुनिः कोऽपि अल्पमपि अवधानभङ्गं न प्राप्नोत्। परितः नग्नाः देहाः। जटाकारतां गताः केशाः। शवाः इव दृश्यमानाः अपि ते चैतन्यरूपाः। एतस्मिन् प्रपञ्चे तिष्ठन्तः अपि प्रपञ्चसम्बन्धराहित्यं सूचयन्तः निर्लिप्ताः जीवत्कायाः। दैविकभावम् आप्तवतां जीवानां मध्ये सञ्चरामि इति भावः कदाचित्। शवाः इव स्थितानां बुद्धात्मनां मध्ये अस्मि इति भावः पुनः कदाचित्। जुगुप्साभावः क्वचित्। पुनः क्वचित् अपारं गौरवम्। यथा यथा अग्रे गतं तथा तथा प्रवाहशब्दः प्रवृद्धः। तेषां पुरतः गुहायाः उपरिष्टात् पटलाकारतया प्रसृतेन प्रवाहेण युक्ता काचित् नदी शतपादगभीरे खाते पतति स्म। गुहायां पटलाकारतया प्रसृतः नद्याः सः प्रवाहः गुहायाः अन्तिमभागभ्रमं जनयति स्म।" (पृ.१९१-१९२)।

पृष्ठभूमिकात्मकमध्यायं विहाय अत्र ६१ लघुः लघुः अध्यायाः सन्ति। अधिकेषु अध्यायेषु त्रिचतुराः पुटाः सन्ति। स्वल्पेषु अध्यायेषु एव सप्ताष्टाः पुटाः सन्ति। स्थान-काल-पात्रादीनां समन्वयं स्थापयितुं कथाकारः सर्वत्र स्थानं दिनाङ्कं समयं च योजयति। मूलकथा नवम्बरमासस्य षष्ठे दिनाङ्के प्रारब्धा षोडशे दिनाङ्के च समाप्तिं गता। एकादशादिनात्मिके अस्मिन् स्वल्पे

समयचक्रे कथां समापयितुं कथाकार आधुनिकयन्त्राणां वाहनानां प्रयोगं कृतवान्। प्रत्यक्षदूरवाणीकथनं-भिडिओकन्फेरेन्स-सङ्गणक-ईपत्र-दृश्य-फलकादीनां साहाय्येन स कदा कथां संक्षिप्तीकरोति कदा वा विशालीकरोति। बैङ्गलूर-देहरादून-मुम्बई-एडिनबोरा-लण्डनादिषु परिव्याप्तस्यास्य कथावस्तुनः फलकमतिविशालं वर्तते। व्यक्तिशः यद्यपि सर्वाणि चरित्राणि मुख्यानि एव सन्ति, तेषां गणत्रयेण विभाजनं शक्यम्। एकत्र डा.रावः तस्य शोधार्थिनी डा.पूजा, तत्पतिः विनोदश्च ये प्राणान् पणीकृत्य सत्यस्य अन्वेषणे प्रवृत्ताः सन्ति। जैनसिरिभूवलयः, सिरिभूवलयः, इण्डियनट्रिब्युन्, कन्नडवर्ष, देवकीर्त्तीयशासनम्, वीरबुक्करायशासनम्, एन्साइक्लोपीडिया आफ् वर्ड आर्ट इत्यादीनां ग्रन्थानां सन्दर्भेण मुक्ताफल-कल्पतरु-कल्पवृक्ष-यावानलादिशब्दानां जैनसंस्कृत्यनुसारं विश्लेषणेन डा.पूजा जैनानां प्राचीननिधेरन्वेषणं करोति। आचार्येण भद्रबाहुना सह सम्राट् चन्द्रगुप्तः यदा दक्षिणभारते जैनमतस्य प्रचाराय निर्गतः, तेन सह द्वादशसहस्रं मुनयः, दशसहस्रं रथाः, यावानलरूपेण प्रायः पञ्चलक्षकिलोमितं सुवर्णमपि निर्गताः। अस्य कनकनिधेरेव अपरं नाम जैनश्रीः, यस्य अन्वेषणेन अन्वेषणफलस्य आवरणेन वा अयमुपन्यासः कनकावरणमिति सफलनामा।

द्वितीयगणे आसीद् आन्तर्जागतिको भूतलगणीयः नीडप्रमुखः, तस्य सहयोगिनी नटालि-प्रभृतयः, ये कथमपि पूजायाः निधेरन्वेषणविषयं ज्ञात्वा तामनुसरन्ति। अन्ततो गत्वा सोमनाथपुरीये स्थले ते सिविआईजनैः निगडिता भवन्ति।

तृतीयगणस्य प्रमुख आसीद् ब्रह्मप्रकाशः, यः जैनकलारक्षणसमितेरध्यक्षो वर्तते, तीर्थङ्करस्य निर्देशेन कार्यं करोति। पूजाम् अनुसरता तेन ज्ञातं यत् तां भूतलगणीया अनुसरन्तीति। अतः भारतीयदूतावासाधिकारिणः साहाय्येन ताम् एडिनवोरातः भारतं प्रतिप्रेषयति। डा.रावद्वारेण विनोदेन सह तामाहूय मुम्बैनगरे तस्याः संशोधनविषयं श्रुत्वा परीक्षणाय सोमनाथपुरीयं स्थलं प्रति नयति। शुद्धं संशोधनं दृष्ट्वा अन्तिमसत्यप्रदर्शनाय तपतीखाते स्थितां दिगम्बरगुहां प्रति नयति। तत्र अन्तः तीर्थङ्करवर्यस्य समीपे उज्ज्वलप्रभामये कूपे यावानलाकारं सुवर्णराशिं दर्शितवान्। इतोऽपि लोकः जैननिधिप्राप्त्यर्थं पुनः मा परिश्राम्यतु इति विवृत्य ग्रन्थं लिखतु इति पूजां निवेदितवान्। तदा रावेण पूजया च

मिलित्वा लिखितमिदं पुस्तकं कनकावरणमिति प्रकाश्य सुवर्णवर्णीयेन यावानलेन पुरस्करोति। अनेन ग्रन्थोऽयमवसितः।

यावदनुवादस्य प्रश्नः– जनार्दनहेगडेवर्यः कश्चन सिद्धः अनुवादकः। विशेषत आधुनिकग्रन्थानां तत्रत्यानां शब्दानाञ्च संस्कृतानुवादे अत्र महान् प्रयत्नः कृतः तपस्विना अनुवादकेन। स्थालीपुलाकन्यायेन कानिचन उदाहरणानि स्थापयामः अत्र- ईपत्रं, मुद्रणाङ्गां, विशालदर्शनं, सञ्चिका, सञ्चिकागुच्छे, भूतलगणस्य, अङ्कसङ्गणकं(पृ.३३), सङ्केतपत्रं, सचक्रयानपेटिका (५७), आन्तरदूरवाण्या (५९)। सरलेन सन्धिसमासरहितेन मूलानुगेन च अनुवादेन महीयते अयं ग्रन्थः। यथा– "भवनं नियन्त्रितवातव्यवस्थोपेतम्। प्राङ्गणं परितः षट् प्रकोष्ठाः। तेषु अन्यतमं प्रकोष्ठं प्रति तं नीत्वा काचमय्यां चतुष्पादिकायां स्यूतं संस्थाप्य सेवकः अवदत्– श्रीमन्! भवदर्थं भोजनं सज्जम् अस्ति।" (पृ.५९)।

"ते प्रकोष्ठाः अमृतशिलाम् उत्कर्त्य रचिताः एव। प्रकोष्ठस्थाः मञ्चाः, उत्पीठिकाः, आसन्दाः इत्यादयः अपि अमृतशिलानिर्मिताः एव। भित्तितः आकस्मिकतया निःस्रवतः जलस्य निर्गमनाय भित्तिपार्श्वे अस्ति लघुकुल्या। गुहायाः छदिः अपि अमृतशिलामयी एव। छदितः जलम् अन्तः यथा न निस्सरेत् तथा छदिः आनतमुखा कृता अस्ति। तत्र सर्वं श्वेतमयम्। श्वेतगुहा सा।" (पृ.७७)।

इयं रहस्यमयी कथा धारावाहिनी रूपेण तथा सन्तोषं नाददात् मह्यं यथा अधुना एकेन उपवेशनेन ग्रन्थं समाप्य प्राप्तवान्।

2.16. कनीयान् राजकुमारः

कनीयान् राजकुमारः इत्यस्य मूलकथाकारः फ्रान्सवास्तव्यः आन्त्वान-द-सेंत-एक्जुपेरी(1900) विमानचालकः प्रसिद्धः कथालेखकः चासीत्। 1944 क्रैस्ताब्दे जुलैमासस्य एकत्रिंशदिनाङ्के स्वविमानेन निर्गतः स पुनः न प्रत्यागतः। स्वल्पजीवनकाले अपि महतीम् अन्ताराष्ट्रियां ख्यातिं लब्धवान् आसीत् सः। तस्य ग्रन्थस्य अनुवादं कृतवान् गोपबन्धुमिश्रमहोदयः प्यारिसनगरे वासकाले(2010-12)। विश्वस्य 250 भाषासु अनूदितस्य अस्य कथाग्रन्थस्य विषयाः भारतीयदार्शनिक-चिन्ताधारायां साम्यतां यान्ति। विशेषतः श्रीमद्भगवद्गीतायां सच्चिदानन्दस्य प्रतिपादनं, निष्कामकर्मणश्च प्रतिपादनं वर्तते। अत्र एकविंशे अध्याये वर्तते- "One sees clearly only with the heart. What is essential is invisible to the

eye." अनेन भावेन अनुवादकः नितरां प्रेरितः। कर्मणः प्रति समर्पणभावना, गीता(18-9), सत्त्व, त्यागः ...। संसारः स्वयं संसरति, परन्तु मानवः कर्ताहमिति मन्यते। कनीयान् राजकुमारः यदा राज्ञा सह मिलति तदा लेखकः राजानं मानवीयाहङ्काराणां प्रतीकरूपेण समुपस्थापयति। स राजा सूर्यस्य चन्द्रमसः किं बहूना, संसारस्य सर्वेषां कृते प्रयत्नं करोति। सर्वे तस्य अधीनाः इति स चिन्तयति। एतत् तु मिथ्याहङ्कारः खलू। (गीता-3-27)। कथायाः षोडशाध्याये आत्मनः शरीरस्य च भिन्नता लक्ष्यते। वसुधैव कुटुम्बकम् इति भावना अत्र प्रतिपादिता।

अस्मिन् ग्रन्थे कथानायकः पुस्तकपठने चित्राङ्कने च रुचिशीलः आसीत्। परन्तु तत्र कथं ज्येष्ठानामनास्थाभावः अनुत्साह इति सम्यक् निरूपितं कथाकारेण। पुनः बालमित्रस्य अनुरोधेन तस्य चित्रकला विकसिता, सा कला अप्यत्र बालसाहित्यस्य अङ्गतया समान्तरालेन विकसिता बालमानसं विशदयतीति पुनर्वक्तव्यं नास्ति। अत्र सप्तविंशभागेषु पञ्चचत्वारिंशत् चित्राणि सन्ति। प्रथमे भागे लेखकः षड्वर्षीयां स्वीयां स्मृतिं वदति- एकस्मिन् पुस्तके अजगरस्य निगिरणसामर्थ्यं तस्य जीर्णीकरणसामर्थ्यं च विभज्य हस्तिनमुदरस्थं कृतवतः अजगरस्य चित्रम् अङ्कयित्वा ज्येष्ठानां प्रतिस्पन्दं काङ्क्षते। परन्तु तस्य मनोभावागमनसामर्थ्यं कस्यापि नासीत्।

द्वितीयभागे लेखकस्य विकलं वायुयानम् आफ्रिकायाः साहारामरुभूमौ अपतत्। तृतीये नर्मालापं वर्णयित्वा चतुर्थे एष राजकुमारः बी-612 ग्रहादागतः इति वदति कथाकारः। पञ्चमे बाओबाब-इति विशालवृक्षस्य प्रसङ्गः आगच्छति यं युगपत् बहवः हस्तिनः भक्षयेयुश्चेत् किं चित्रं स्यादिति वर्णितं, तस्य अङ्कुरादेव नाशः करणीय इति नीतिः बोधिता। षोडशात् त्रयोविंशं यावत् क्रमशः प्रदीपप्रज्वालक-सर्प-मरुभूमिपुष्पिका-सूच्चपर्वत-पाटलपुष्पिका-शृगाल-रेलसङ्केतसूचक-वाणिज्यिकैः राजकुमारस्य आलापः वर्णितः येन स जीवनस्य निस्सङ्गत्वम् एकलत्वं स्वीययापितसमयस्य पुष्पिकायाश्च महत्त्वमवगच्छति। यथा शृगालः अवादीत्- वस्तुतः सारतत्त्वं हृदयनैव द्रष्टुं शक्यते। तद् नेत्राभ्यां निरीक्षितुं नैव शक्यते।पृ.98। केवलं बालाः एव जानन्ति ते किमपि इच्छन्तीति – कनीयान् राजकुमारोऽवादीत्- ते छिन्नवस्त्रखण्डैः निर्मितं क्रीडनकम् आदाय

कालं क्षिपन्ति। अत एव तानि क्रीडनकानि तेषां कृते अतीव मूल्यवन्ति भवन्ति। यदि कश्चित् तानि क्रीडनकानि तेभ्यो बलाद् नयति, ते क्रन्दन्ति ...।

ते बालाः एव वस्तुतो भाग्यशालिनः सन्ति। -- सङ्केतसूचकोऽवोचत्। पृ.100।

चतुर्विंशे जलान्वेषणं, निद्राणं राजकुमारं वहतः लेखकस्य निर्मलभावनाः, पञ्चविंशे कूपप्राप्तिः, पृथिवीमागतस्य राजकुमारस्य एकवर्षपूर्तिसूचना, तस्य परावर्तनस्य शरीरत्यागस्य वा कथा सम्यक् वर्णिता। - अवगच्छसि त्वम्। तद् इतः बहु दूरम् अस्ति। एतत् शरीरं तावद् दूरं वोढुं मम सामर्थ्यं नास्ति। एतद् अतीव गुरु अस्ति। ... किन्तु एतत् शरीरं प्राचीनं परित्यक्तं वल्कलमिव अत्र स्थास्यति। प्राचीनवल्कलानां विषये कस्यापि मनसि कश्चित् सन्तोषः नोत्पद्यते खलु। पृ.121।

साक्षात् एतस्याः तारकायाः अधः प्रतीक्षस्व। तदा यदि एको बालः तत्र आविर्भवेत्, यदि सः हसेत्, यदि तस्य केशाः स्वर्णिमाः स्युः, यदि सः कस्यापि प्रश्नस्य उत्तरं न दद्यात्, तर्हि सः एव मम कनीयान् राजकुमारः इति अवगच्छ। एषा आनन्दप्रदा घटना यदि घटते, तर्हि कृपया मां सूचनाप्रदानेन समाश्वासय। एषः समाचारः मां दुःखात् मोचयिष्यति। त्वरितं माम् एतत् लिखित्वा सूचय यत् सः प्रत्यागतः इति ...। पृ.128।

अस्य कथाग्रन्थस्य आद्यन्तं रोचिष्णुता प्रभविष्णुता च प्रभावयति न केवलं बालान् अपि तु प्रवृद्धान् पाठकान् इति अतिकथनं नास्ति। अनुवादः सन्धिसमासरहितोऽपि संस्कृतमर्यादां न नाशयति।

2.17. कवीन्द्रकथाकल्लोलिनी

कवीन्द्रकथाकल्लोलिनी इति ग्रन्थे विश्वकवेः रवीन्द्रनाथठाकुरस्य विविधग्रन्थेभ्यः एकत्रिंशत् कथाः अनूदिताः सन्ति। तन्मयभट्टाचार्येण षट् कथा अनूदिताः, नारायणदाशेनैकादशकथाः, राकेशदाशेन चापि चतुर्दशकथाः। प्रस्तुतेऽस्मिन् सङ्ग्रहे अनुवादकैः गल्पगुच्छात् वस्तुनिष्ठाः काश्चन कथाः, लिपिकाग्रन्थाच्च भावगम्भीराः काश्चन कथाश्चापि अनूद्य प्रस्तुताः। एका कथा "गल्पसल्प" इत्यस्मात् सङ्ग्रहादपि वर्तते।

अनुवादकेन तन्मयकुमारभट्टाचार्यमहाभागेन कविवर्यस्य रवीन्द्रनाथस्य भावान् सम्यक्तयात्मसात्कृत्य कथानामासामनुवादः विहितः। रवीन्द्रदर्शनभावविषयेषु नितरामाधिपत्यादनुसर्जकोऽयं साफल्येन रथयात्राख्यकथामनूदितुं शक्तवान्।

अत्र तन्मयकुमार-भट्टाचार्य्येण अनूदितानां कथानां सङ्ख्या वर्तते षट्। ताश्च कथाः– वाणी, पादपथः, रथयात्रा, एका दृष्टिः, अप्सरसः परिचयः, व्यवधानं चेति। अन्तिमां कथां विहाय अन्याः कथाः सर्वा एव लिपिकाग्रन्थे वर्तन्ते। अन्तिमा 'व्यवधानम्' इति कथा तावद् गल्पगुच्छग्रन्थाद् अनूदिता।

'वाणी' इति कथायां कवेर्वाणी कथं प्राकृतिकं वैभवं, वर्षाकालिकं दुर्दिनम्, असहायाया बालायाः छायाच्छन्नं मुखमपि आलोकयति। मेघावतरणस्य रम्यं दृश्यं यथा- "आकाशस्य मेघः बिन्दुशः वृष्ट्या वर्षति; धरायाम् आत्मविलयस्य अर्थे। तद्वत् कुतश्चिद् आयान्ति योषितः पृथिव्याम् आबद्धाः भवितुम्। तासां कृते अल्पजनैः आबद्धं स्वल्पायतनं जगद् भवति। अस्मिन् क्षुद्रायतन एव आत्मनः सर्वं समाविष्टं स्यात् - सर्वं कथनं, सर्वा व्यथा, सर्वा भावना चेति। अतः तासां मस्तके अवगुण्ठनं, हस्ते कङ्कणम्, अङ्गे वेष्टनञ्च। योषितो भवन्ति सीमास्वर्गस्य इन्द्राण्यः।"(पृ.१)। 'पादपथः' कथायां कविः दार्शनिकभाषया मार्गे गतागतानां सर्वेषां साक्षीभूतं पादपथं पृच्छति तेषां जीवनरहस्यं किमिति। 'रथयात्रा' कथायां राज्ञः आदेशं मन्त्रिणः सादरं निमन्त्रणमविगणय्य कथं निष्ठावान् भक्तो गृहमन्दिरस्य द्वारि अपेक्षमाणो वर्तते, कदा स्वाराध्यदेवः स्वयं रथेन आगत्य दर्शनं दास्यति इति। अनुवादकस्य गद्यनिबन्धनशैली रमणीया, भाषापि रहस्यमयी अपि प्राञ्जला सुखबोध्या च। यथा- तदा मन्त्री तमाहूय अवदत्, "रे दुःखिन्! देवदर्शनाय चल।"..स प्रणम्य अकथयत्, कियत्कालं वा चलितुमहं शक्नोमि। देवताया द्वारं किमहं प्राप्नुयाम्, तथा सामर्थ्यं मयि नास्ति। ... "दर्शनं भवेदेव। देवस्तु रथमारुह्य मम द्वारमागच्छति। मन्त्री हसितवान्, उक्तवान् च- तव द्वारे रथचक्रचिह्नं कुत्र?"... दुःखी दर्शितवान्, तस्य द्वारम् उभयतः सूर्यमुखिकुसुमद्वयं प्रस्फुटितम्। (पृ.५-६)।

प्रायेणानुवादकः प्रत्यक्षरमनुवादं कृत्वा कविगुरोर्भावमस्मत्सविधे उपस्थापयितुं प्रयतते। क्वचिदक्षरशः अनुवादो यथा- अश्वशालातः अश्वा गजशालातो गजाश्च बहिरानीताः। मयूरपक्षिसदृशयानानि यान्ति पङ्क्तिशः इति।(पृ.५)।

द्वयोर्मित्रयोः निविडसम्बन्धः कथं पारिवारिककलहेन ध्वस्त इति सामाजिकपटभूमिकायां 'व्यवधानम्' इति कथा विरचिता। कवेर्भावमिममुपायनीकृत्य भट्टाचार्येण सुनिपुणतया अनूदिता कथेयम्।

अनुवादकेनात्र प्रायेणाक्षरशोऽनुवादः कृतः। "सम्बन्ध मिलाइता देखिते गेले बनमाली एवं हिमांशुमाली उभये मामातो पिसतुतो भाइ, सोओ अनेक हिसाव करिया देखिलो तवे मेले।" इति वङ्गमूलस्याक्षरशोऽनुवादो यथा भट्टाचार्येण कृतः– "कुटुम्बसम्बन्धं मेलयित्वा पश्यामश्चेद् बनमाली हिमांशुमाली चोभौ परस्परं सम्बन्धेन मातुलेयभ्राता पितृष्वस्त्रीयभ्राता भवेताम्, तत्पुनः गणनया, महता प्रयासेन वा स च सम्बन्धः प्रतिष्ठितः स्यात्।"(पृ.१३)।

'एका दृष्टिः' इत्यस्याः कथायाः अन्तिमपरिच्छेद इत्थमनूदितम्- "गीतस्य स्वरेणोक्तम्- 'अस्तु तद्देहि मह्यम्। मया राजप्रतापो न स्पृश्यते, न वा धनिजनैश्वर्यम्, परन्तु, एषु क्षुद्रवस्तुषु एव मम चिराकाङ्क्षितवसूनि विद्यन्ते; तैरेव मया असीमस्य कृते ग्रैवेयकं ग्रथ्यते। '" (पृ.७) इति। परन्तु रवीन्द्रनाथेन तथा न कृतः। "गानेर सुर वलले, "आच्छा आमाके दाओ। आमि राजार प्रतापके स्पर्श करि ने, धनीर ऐश्वर्यकेओ ना, किन्तु ए छोटो जिनिसगुलिइ आमार चिरदिनेर धन, एगुलि दियेइ आमि असीमेर गलार हार गाँथि।"(एकटि चाउनि, पृ. १८) इति।

रवीन्द्रनाथस्य पञ्चदशकथा राकेशदाशेनानूदिता विलसन्ति कवीन्द्रकथाकल्लोलिनीग्रन्थे। अत्र कासाञ्चिद्विचारं कुर्मः। राजपथस्य कथा इति गल्पगुच्छाख्ये ग्रन्थे स्थिता 'राजपथेर कथा' इति शीर्षककथा अनूदिता राकेशदाशेन राजपथस्य कथा शीर्षकेण। रवीन्द्रनाथेन गल्पेऽस्मिन् स्वगतभङ्ग्या राजपथस्य दुःखयन्त्रणादग्धमपाङ्क्तेयमवहेलितं जीवनं करुणरसेन सिञ्चितम्। राजपथोपरि मानवनिष्ठदुःखसुखादिगुणा जीवच्छक्तिश्चारोपिताः कविगुरुणा। अनुवादकेन यथा प्रत्यक्षरमनुवादो विहितस्तथैव मूलांशस्य भावानुवादोऽपि कृतः। उदाहरणं तावदाक्षरिकानुवादस्य- वदेयं वदेयमिति विचिन्त्यापि नोक्तं किञ्चिदिति। वङ्गभाषायां- 'तारे वलि वलि आर वला हय ना' इति।

अनुवादकस्य भाषा सरला, सहजा च। यथा- कस्यापि अहं लक्ष्यं नास्मि, उपायमात्रमहं सर्वेषाम्। कस्यापि गृहं नास्मि, सर्वान् गृहं नयाम्यहम्। अहरहः ममायं शोको यत्, कोऽपि मयि चरणं न स्थापयति, मदुपरि कोऽपि स्थातुं नेच्छति। 'उद्धार' इत्यस्या मूलकथा 'उद्धार' इति गल्पगुच्छग्रन्थे वर्तते। प्रतिमनुष्यं भकट्यसम्बन्धस्तथैव प्रात्यहिकजीवनस्य समस्याः अत्र प्रत्यक्षीकृताः।

लौकिकाः प्रचलिताः साधारणशब्दाश्चात्र प्रयुक्ता अनायासेनार्थावबोधाय। गौर्य्याः क्रोधोन्मत्ता मूर्तिः शब्दप्रयोगमाहात्म्येन चित्रिता- ''दलिता फणिनीव मुहूर्ते एव उदग्रा गौरी मिथ्यास्पर्धयैव पतिं विध्यती रुद्धकण्ठेनावोचत्- 'अस्ति प्रीतिः। किं कर्तुमिच्छसि त्वं कुरु।'' (तत्रैव, पृ.९१.)। मूलांशमपठित्वापि यः कोऽपि अस्यार्थं परिस्थितिञ्चावबोद्धुं शक्नुयात्। कृतघ्नः शोकः मूलकवेः लिपिकाग्रन्थात् "कृतघ्न शोक"इति काचिद्भावगम्भीरा कथामनूदिता। कथायामस्यामनुवादकेन प्रत्यक्षरमनुवादः कृतः, तेन सर्वांशेन मूलस्य भावाभिव्यक्तिः कथमपि न व्याहन्यते। परन्तु मूलांशस्य भावानुवादात् कविगुरोः प्रकृतिचित्रणच्छटां नालमुपस्थापयितुं सर्वतोभावेन। तथाहि आदावेव कविगुरोर्वचनं पश्यामः– "जानलार वाइरे देखि झाउगाछेर आडाले तृतीयार चाँद उठेछे, ये गेछे येन तारइ हासिर लूकोचुरि। तारा छिटिये देओया अन्धकारेर भितर थेके एकटि भर्त्सना एल, "धरा दियेछिलेम सेटाइ कि फाँकि, आर आडाल पडेछे, एइटिकेइ एत जोरे विश्वास?"इति।

अनुवादस्तावत्, "गवाक्षाद्बहिरपश्यम्। वृक्षाणां मध्यात् चकास्ति तार्तीयिकश्चन्द्रमाः, या गता, तस्या एव मृदुहासस्य गोपनकेलिरिव। तारकाखचितात्तमसः अन्तस्तलाद् भर्त्सनमेकं श्रुतम् - 'आगता आसं, तदेव सत्यम्? यदिदानीमपसृता अभूवं, तत्रैव एतावान् विश्वासः?" पृ.९३.।

चित्रम्–परी–प्रथमपत्रम्–इत्यादिकथाः अपि तेनैवानूदिताः लसन्ति। किं बहुना, अनुवादकेनानेन 'कङ्कालः ', 'अनधिकारप्रवेशः ', 'क्षुधितप्रस्तराः ', 'अग्रजा ', 'पुत्रयज्ञः' इत्यादिभावगम्भीरकथानामनुवादे तु पराकाष्ठा एव प्रदर्शिता।

2.18. कुक्कुरस्य कथा

कुत्ते की कहानी इति प्रेमचन्दरचितायाः कथायाः अनुवादरूपेयं नारायणदाशेन अनूदिता। बालानां कृते रचितेयं कथा रोचिष्णुतया चिरं प्रभावयिष्यति पाठकान्। अत्र एकस्य कुक्कुरस्य पराक्रमो वर्णितः। परन्तु स्वजातिबन्धवः तस्य सम्माननं न कुर्वन्ति इति तस्य दुःखमपि समुद्घाटयति कथाकारः। बालानां संबोधनेन एव कथाया आरम्भः। उदाहरणार्थं यथा-

बालकाः, युष्माभिः राज्ञां वीराणां च कथानिकाः बहुधा श्रुताः स्युः, परन्तु कदाचिदेव कस्यापि कुक्कुरस्य जीवनकथा श्रुता स्यात्। कुक्कुराणां जीवने का कथा वर्तते, या श्रावणीया स्यात्। न तु सः देवैः युध्यति, न वा वृहत्तमेषु

युद्धेषु जयति। परन्तु अहं विश्वासेन वदामि, यत् मम जीवने एवं कतिविधाः घटनाः घटिताः, याः श्रेष्ठानामपि जनानां जीवने घटिताः न स्युः।

यदा मम जन्म जातं, नेत्रे च उद्घाटिते, तदा मया दृष्टं यत् एकस्मिन् भाण्डे भस्मराशौ मातृहृदयेन लग्नः पतितः अस्मि। वयं चत्वारः भ्रातरः स्म। त्रयः रक्तवर्णीयाः अहं तु कृष्णवर्णीयः। पुनः सर्वापेक्षया कनिष्ठः दुर्बलतमश्च।

माता तु अस्माकं पार्श्वे विरलतया एव तिष्ठति। सा आरात्रि जाग्रता सती ग्रामं रक्षति। परम् एतेषु कार्येषु कृतेषु अपि कोऽपि तस्यै भोजनं न ददाति। अस्माकं चिन्ता तां विव्रतां करोति। यदा तपस्विनी सा क्षुत्पीडिता भवति, तदा चौर्येण जनानां गृहेषु प्रविशति स्म। भोज्यं किमपि प्राप्य सा निर्गत्य पलायते स्म। ....

स्वजीवनदुःखमित्थं निरूपयति कुक्कुरः- यस्मिन् सरोवरे मां क्षिप्त्वा बालाः क्रीडन्ति स्म, ग्रामे तस्य सरोवरस्य किञ्चित् महत्त्वमासीत्। तस्मिन् सरोवरे ग्रामस्य आबालवृद्धाः सर्वे स्नान्ति स्म। एकदा ग्रामस्य केचन बालकाः तत्र सन्तरन्ति स्म। पण्डितवर्यस्य कनिष्ठः पुत्रः अपि तत्र प्राप्तवान्। तस्य पादौ स्खलितौ, सः जले मज्जति स्म। तस्य उद्धाराय बालकाः चीत्कृतवन्तः परन्तु तं निष्कासयितुं कस्यापि साहसः नासीत्। संयोगात् पण्डितस्य ज्येष्ठः पुत्रः अपि तत्र आगतः। मज्जन्तं भ्रातरं दृष्ट्वा तस्य उद्धाराय सरोवरे अकूर्दत्। परन्तु सः कनिष्ठेन एवम् आश्लिष्टः येन सः अपि निमज्जति स्म। तत्र समागतस्य मम सर्वम् अवगतम्। अहं साक्षात् अकूर्दम् तथा केशैः धृत्वा द्वावपि कूलं प्रति आकर्षम्। तदारभ्य पण्डितः मयि प्राणेभ्यः अधिकं प्रीणाति स्म। अधुना पण्डितवर्यः यत् किमपि गृहमानयति, तत्र स्वपुत्रस्य इव मम भागमपि कल्पयति।

शूरश्च कृतविद्यश्च कुक्कुरः स्वपराक्रमं प्रदर्श्य साहेवं रक्षितवान्। तेन सेवामपि प्राप्तवान्। ... पण्डितवर्येण गर्वेण स्वनाम उक्तम्। साहेवेन उक्तम्- भवतः कुक्कुरः महान् चतुरः अस्ति। असमाप्ते एव वाक्ये कश्चन शूकरः निर्गत्य साहेवम् आक्रामत्। यदि एकः अपि क्षणः बिलम्बितः अभविष्यत्, तर्हि शूकरः तम् अमारयिष्यत्। साहेवस्य हस्ते भूशुण्डिः आसीत्, परन्तु व्यग्रतामध्ये सः चालयितुं व्यस्मरत्। मया दृष्टं – घटना गम्भीरा एव। पृष्ठतः उत्पतन् अहं शूकरस्य पादयोः अगृह्णम्। एतेन प्रकृतिस्थः साहेवः शूकरं

गोलिकाभिः अमारयत्। परं मरणात् प्राक् सः मामपि सम्यक् आक्रान्तवान्। अहं संज्ञाहीनः अभवम्।

निपुणः कथाकारः वर्णनस्ववैचित्र्येण कुक्कुरं विदेशे भ्रामयति। स्वामिभक्तिं द्रढयति।

2.19. चक्रवर्तिनः न्यायनिर्णयः

चक्रवर्तिनः न्यायनिर्णयः इति लघूपन्यासः मूलतः कन्नडभाषया श्रीनिवासेन लिखितः जनार्दनहेगडेवर्येण अनूदितः अङ्कुशः इतिग्रन्थे (44-67 पुटेषु) स्थानितः 2011 संवत्सरे। अत्र पर्शियादेशस्य न्यायपक्षपातिनः राज्ञः षाह-अब्बासस्य न्यायनिर्णयमत्र विषयः चमत्कारशैल्या निरूपितो मूलकारेण सुन्दनानुवादेन सुखपाठ्यो जातः।

2.20. चन्द्रमसः पर्वतः

चन्द्रमसः पर्वतः(चांदेर पाहाड) इत्युपन्यासः विभूतिभूषणेन वन्द्योपाध्यायेन रचितः वङ्गीयः रोमाञ्चकारी उपन्यासः। अयं ग्रन्थाकारेण 1931 संवत्सरे प्रकाशितः। सद्यः अयमुपन्यासः धारावाहिनीरूपेण सम्भाषणसन्देशे(मार्च-2018 तः जून् 2019) पर्यन्तं प्रकाशितः। विश्वजित् प्रमाणिकः अस्य अनुवादमकरोत्। कस्यचन शङ्करनामधेयस्य दुःसाहसिकम् आफ्रिकाभियानम् अत्र वर्णितम्। प्रायः वङ्गभाषया सर्वाधिकः जनप्रियः गौरवमण्डित उपन्यासः अयमेव वर्तते।

प्राक्कथने मूलकथाकारः वदति- चन्द्रमसः पर्वतः इत्ययम् उपन्यासः कस्यचित् अपि आङ्ग्लोपन्यासस्य अनुवादः नास्ति अथवा तादृशश्रेण्याः कस्याश्चित् अपि वैदेशिककथायाः छायाम् अवलम्ब्य रचितः नास्ति। अस्य उपन्यासस्य कथा तथा च चरित्राणि मम कल्पनाप्रसूतानि वर्तन्ते। तथापि अफ्रिकायाः विभिन्नस्थानानां भौगोलिकसंस्थानस्य नैसर्गिकदृश्यस्य च वर्णनानि प्रकृतस्थानमिव वर्णयितुं मया एच्.एच्.जनस्टन्, रोसिता फोर्बर्सइत्यादीनां प्रख्यातानां भ्रमणपुस्तकानां साहाय्यं गृहीतम् अस्ति। प्रसङ्गवशात् इह कथयितुं योग्यं यत् अस्मिन् उपन्यासे उल्लिखिता रिख्टार्सवेल्डपर्वतमाला पश्चिममध्याफ्रिकायाः सुप्रसिद्धा

पर्वतश्रेणी वर्तते, अपि च डिङ्गोनेक बुनिप चेत्यनयोः प्रवादः तत्रत्ये अरण्याञ्चले अद्यापि श्रूयते।

मूले उपन्यासे चतुर्दशभागाः, परिशिष्टभागश्च वर्तते। मध्ये दीर्घातिदीर्घाः अध्यायाः अपि सन्ति। अतः अत्र परिशिष्टान्तं सर्वं षोडशभागैरनूदितमस्ति। प्रथमभागे अत्यन्तग्राम्यपरिवेशे उपन्यासस्यारम्भो भवति। यथा- प्रत्यन्तग्रामस्थः अयं शङ्करः। इदमिदानीमेव असौ एफ्.ए-परीक्षायाम् उत्तीर्णतां सम्प्राप्य ग्रामं प्रत्यागतवान् अस्ति। साम्प्रतं तदीयं कार्यम् इत्युक्ते प्रातः मित्राणां गृहं गत्वा जल्पनादिकम्, मध्याह्ने भोजनानन्तरं दीर्घा निद्रा पुनश्च अपराह्णे पालघट्टस्य जलावर्ते बडशीदण्डेन मीनानां बन्धनम्। .. सम्पूर्णः वैशाखमासः यदा इत्थम् अतिवहति स्म, तदानीम् एकदा शङ्करस्य माता तम् आहूय अगदत्- "शृणु, रे शङ्कर! कथयामि किञ्चित्। साम्प्रतं तव पितुः स्वास्थ्यं समीचीनं न प्रतिभाति। एतादृश्यां स्थितौ तव पठनं कथं शक्येत? कः वा पठनव्यायं दद्यात्? अहं कथयामि यत् त्वम् अधुना किमपि कार्यं कर्तुं प्रयतस्व।" (मार्च 2018, पृ.11, सम्पुटः-23, सञ्चिका-7) वङ्गीयस्याभियात्रिणः शङ्कररायचौधुरिणः कथात्र वर्णिता यः स्नातकशिक्षां समाप्य साधारणवृत्तिमापन्नोऽपि जीवनं रोमाञ्चितं कर्तुम् आफ्रिकायाः दुर्गमस्थानं गन्तुमिच्छति। तस्य स्वभावः अस्ति- अयं शङ्करः प्रकृत्या सामान्यः नासीत्। विद्यालये अध्ययनकाले सः निरन्तरतया क्रीडादिषु प्रथमस्थानाधिकारी एव भवति स्म। तस्मिन् पर्याये उपखण्डे आयोजिते प्रदर्शन्युत्सवे सः उच्चलम्फनस्पर्धायां प्रथमं स्थानं प्राप्य किञ्चन पदकं लब्धवान् आसीत्। पादकन्दुकक्रीडायां तादृशः केन्द्रीयाग्रेसरः (Centre Forward) तस्मिन् क्षेत्रे अपरः कोऽपि नासीत्। सन्तरणे तस्य समस्य कस्यचित् प्राप्तिः नितरां कठिनायते। वृक्षारोहणे, अश्वसञ्चालने, मुष्टियुद्धे च सः अत्यन्तं निपुणः आसीत्। कोलकातायाम् अध्ययनकाले सः Y.M.C.A इत्यस्मिन् यथारीति मुष्टियुद्धम् अभ्यस्तवान्। तस्यैव फलतः सः परीक्षायाम् उत्तमं फलं प्राप्तुं नाशक्नोत्, द्वितीयविभागे उत्तीर्णतां प्राप्तवान्

आसीत्। ... किन्तु एकस्मिन् विषये तस्य अद्भुतं ज्ञानम् आसीत्। तस्य

तीव्राकाङ्क्षा जायते स्म विभिन्नानां राज्यानां मानचित्राणां परिशीलने पुनश्च बृहतां भूविद्यापुस्तकानाम् अध्ययने। भूविद्याशास्त्रे गणितस्य समाधाने महान् पटुः आसीत् असौ। अस्माकं देशस्य आकाशे यानि नक्षत्रमण्डलानि प्रकाशन्ते, तानि सर्वाण्यपि सः सम्यक् अभिजानाति स्म- अयं कालपुरुषः, अयं सप्तर्षिः, इयं क्यासिओपिया, अयं वृश्चिकः इति। कस्मिन् मासे किं नक्षत्रं प्रकाशते - कस्यां दिशि वा प्रकाशते? इत्येवं सर्वमपि तस्य नखदर्पणे आसीत्। आकाशस्य अवलोकनसमनन्तरमेव सः एवं सर्वं कथयितुं समर्थः आसीत्। (मार्च 2018, पृ.13, सम्पुटः-23, सञ्चिका-7)

अन्ततः तस्य ग्रामस्य कश्चन अधिवासी यः आफ्रिकायां कार्यं करोति सः तस्य कृते तत्र वृत्तिव्यवस्थां करोति। समस्याबहुले तस्मिन् स्थाने सिंहेन सह तस्य युद्धं भवति, कृष्णसर्पश्च तमाक्रामति। जिमकार्टारः हीरकखनेः सन्धानं प्राप्नोति। परन्तु भयङ्करजन्तुना स मृतः भवति। आलेभारेजश्च कथमपि समागतः। ....तस्य तत्र प्रवेशानन्तरम् अल्पक्षणाभ्यन्तरे अहं कस्यचित् आर्तनादं श्रुत्वा भुशुण्डिं हस्ते गृहीत्वा धावितवान्। जङ्गलं प्रविश्य दृष्टं यत् जिमः रक्ताक्तदेहेन वनस्य अन्तः पतितः अस्ति, कश्चित् भीषणाकारः बलवान् जन्तुः तस्य मुखात् वक्षपर्यन्तं तीक्ष्णनखैः विदीर्णवान् अस्ति- यथा पुरातनम् उपाधानं विदीर्य कार्पासः निष्कास्यते तथैव।

जिमेन केवलम् उक्तम्- "साक्षात् दानवः ...। मूर्तिमान् दानवः ..।" हस्तेन इङ्गितं कृत्वा उक्तवान्- "इतः पलायनं करोतु, पलायनम्.......।"

तदनन्तरं जिमः परलोकं प्राप्तवान्। तालवृक्षस्य गात्रे कस्यचित् स्थूलस्य कठिनस्य आवरणं संलग्नीभूतम् इति अवलोकितम्। मम एवं प्रत्यभात् यत् कश्चित् भीषणाकारः बलवान् जन्तुः तालवृक्षस्य गात्रे स्वगात्रं संघर्षयन् आसीत्, तदर्थमेव अयं वृक्षः तदानीं कम्पते स्म। किन्तु तस्य जन्तोः किमपि न दृष्टं तदा। जिमस्य शरीरं रिक्तं स्थानं प्रति आनीय अहं भुशुण्डिहस्तेन जङ्गलस्य तत्पारं गतवान्। तत्र गत्वा दृष्टवान् यत् मृत्तिकोपरि कस्यचित् अज्ञातजन्तोः पदचिह्नानि दृश्यन्ते। प्रत्येकस्मिन् पादे आहत्य

तिस्रः तिस्रः अङ्गुल्यः। तानि पादचिह्नानि अनुसृत्य किञ्चित् दूरं गतवान्।

मध्येजङ्गलं किञ्चित् दूरं गत्वा अवलोकितं यत् तानि पादचिह्नानि किञ्चन गुहामुखं प्रति प्रविष्टानि। गुहायाः प्रवेशमार्गे शुष्कबालूकानाम् उपरि तस्य अज्ञातपूर्वस्य भयङ्करजन्तोः महतीनां तिसृणाम् अङ्गुलीनां चिह्नानि स्पष्टतया परिलक्ष्यन्ते। (एप्रिल 2018, पृ.13, सम्पुटः-23, सञ्चिका-8)

सप्तमभागे तौ क्रमशः गभीरात् गभीरतरजङ्गलं प्रति प्रविष्टवन्तौ। समतलमार्गः कुत्रापि नास्ति, सर्वत्र उद्घातिनी भूमिः। मध्ये मध्ये कर्कशानां दीर्घाणां टसकतणानां वनम्, जलं प्रायशः दुष्प्राप्यमेवासीत्। अष्टमभागे ज्वलदाग्नेयगिरिः तेषां समक्षं बाधां ददाति। ज्वलदाग्नेयगिरेः अग्न्युद्गीरणस्य प्रभावः सम्यक् निरूपितः कथाकारेण-

........जन्तूनां सङ्ख्या अपि क्रमशः वर्धमाना अभवत्। मस्तकोऽपरि विहगाः गणं परित्यज्य पलायन्ते। वसन्तकवकमृगाणां दलेन तयोः दशगजाभ्यन्तरपर्यन्तमपि समीपम् आगतम् आसीत्।

परं तौ एतत् दृश्यम् अवलोक्य तादृशौ किंकर्तव्यविमूढौ सञ्जातौ, येन एतावत् सामीप्यं प्राप्यापि गुलिकाक्षेपणं विस्मृतवन्तौ। एतादृशं दृश्यं ताभ्यां आजीवने कदापि न वीक्षितम्।

शङ्करः आलभारेजम् उद्दिश्य किमपि प्रष्टुकामः आसीत् इत्येतस्मिन् एव क्षणे कश्चन प्रलयः संघटितः। अन्ततः शङ्करेण तथैव चिन्तितम्। समग्रा पृथिवी दोलायमाना सती तथा अकम्पत येन तौ द्वावपि टलन्तौ अधः भूमौ अपतताम्। सहैव सहस्रं वज्रपाताः समीपैव कुत्रचित् पतिताः इति अभासत। मृत्तिका विदीर्णा जाता इव- आकाशः अपि तेन सह विदीर्णः जातः इव प्रतीयते।

आलभारेजः भूमितः उत्थातुं प्रयतमानः सन् अवोचत्- "भूकम्पनम्।"

किन्तु परक्षणे एव एतत् वीक्ष्य तौ महाविस्मितौ सञ्जातौ, रात्रिकालस्य अयं घनान्धकारः हठात् दूरीभूय, पञ्चाशतः सहस्रस्य दीपानाम् एतादृशः विद्युद्योतः प्राज्वलत् कस्मात्?

तदनन्तरं तयोः दृष्टिः संलग्नीभूता दूरे विद्यमानस्य तस्य पर्वतस्य शिखरे। तत्र काचित् सुविशाला अग्निलीला समारब्धा। तेन प्रलयालोकेन समग्रः दिगन्तः रक्तिमः जातः। अग्निरक्ताभमेघः हुङ्करोति पर्वतशिखरात् द्विसहस्रं सार्धद्विसहस्रं फिङ्कितम् उपरिपर्यन्तम्। सहैव कदाकारस्य निःश्वासरोधकारिणः गन्धकस्य उत्कटः गन्धः वायौ।

आलभारेजः तद्दिशि अवलोक्य भयेन विस्मयेन आक्रोशत्- "आग्नेयगिरिः.... सान्टा आना ग्रात्सिया डा कर्डोभा।"

दुष्टजन्तुना आलभारेजः अपि मृतः। अवशिष्टः शङ्करः एकलः। सत्यस्य अनुसन्धानार्थं स निर्गत्य तस्य जन्तोः गुहां प्राप्नोति। तत्र स मार्गभ्रष्टः भवति। सहसा केषाञ्चन प्रस्तराणां साहाय्येन स ततः निर्गन्तुं समर्थः भवति। स कानिचन प्रस्ताराणि सहैव आनयति। तानि असिद्धहीरकाणि एव आसन्। तत्र हीरकखनिः आसीदिति स इतालीयस्य अभियात्रिकस्य आत्तिलीयगात्तिनः टिप्पणीतः ज्ञातवान्।

दशमभागे गुहां प्रविष्टः सः पथभ्रष्टो जातः। एकादशभागे गुहातः कथमपि निःसृत्य शङ्करः बहिरागच्छति। ततः - शङ्करः यदा बहिरागत्य अतिष्ठत् तदा रात्रौ त्रिवादनम्। तत्रत्याः वृक्षाः किञ्चित् अल्पाः सन्ति, मस्तकोपरि नक्षत्रपूर्णः आकाशः दृश्यते। तस्मात् महान्धकारात् बहिरागत्य रात्रेः नक्षत्रालोकितः स्वच्छान्धकारः तस्य समीपे दीपालोकखचितनगरमार्गः इव प्रतिभाति। परमसन्तोषेण सः भगवते अनेकान् धन्यवादान् समर्पयत् अस्यै अप्रत्याशितमुक्तये।

विभातम् अभूत्। सूर्यरश्मिः वृक्षाणां प्रत्येकस्यां शाखायां विकसति। अस्मिन् अमङ्गलमये स्थाने एकक्षणमपि न स्थास्यति इति शङ्करः अचिन्तयत्। कोषे एकाशिला तदानीमपि आसीत्, तत् अप्रक्षिप्य गुहायाः विपदः स्मारकं मत्त्वा तत् स्वपार्श्वे अस्थापयत्।

द्वादशभागे अधिनायकस्य आत्तिलिओगात्तिः इत्यस्य पत्रं प्राप्य स ज्ञातवान् सः वस्तुतः हीरकखनिं प्रविष्टवान् आसीत्। त्रयोदशभागे मध्याह्नरौद्रः यदा समन्तात् दिगन्तेषु अग्निं प्राज्वालयत्, तदा एकस्य लघुपाषाणस्तूपस्य अन्तर्धौ शङ्करः आश्रयं स्व्यकरोत्। यदि सः कथञ्चिदपि

एतादृश्याः भयानकमरुभूमितः स्वरक्षणं कर्तुम् अशक्ष्यत्, तर्हि सः कदाचित्जीवितदशायां मनुष्याणाम् आवासमपि प्राप्तुम् अशक्ष्यत्। हिंस्रजन्तूनां मध्यात् कथमपि आत्मरक्षणं विधाय सः क्रुगार्-जातीयोद्यान-निरीक्षणदलेन रक्षितः। किन्तु अस्मिन् पर्याये शङ्करेण महत् कष्टं सहितम्। क्रमशः अनाहारेण, कष्टेन, उद्वेगेन, अखाद्यकुखाद्यग्रहणेन च तस्य शरीरम् अतीवव्रणितम् आसीत्, तस्यां रात्रौ एव तस्य महान् ज्वरः समायातः। ज्वरेण सः गम्भीरतया विसंज्ञः संजातः। तस्यां दशायां पञ्चदश दिनानि सः चिकित्सालये अतिक्रान्तवान्। तदनन्तरं क्रमशः स्वस्थः सन् मासात् परम् एकस्मिन् दिने प्रातः चिकित्सालयात् मुक्तः भूत्वा बहिः विद्यमानं राजमार्गम् आगत्य अतिष्ठत्।

जन्मभूमिं प्रति ... इति षोडशभागे प्रत्यागमनस्य मधुरं वर्णनं लभ्यते। यूरोपीयमहानगरस्य सल्सवेरि इत्यत्र प्राप्तस्य आनन्दस्य अनुभवः।

आप्रच्छन्नं, बन्धो आलभारेज! स्वदेशं प्रति गमनस्य अस्मिन् आनन्दघनक्षणे भवतः एव स्मरणं जायते मुहुर्मुहुः। भवान् तस्य गणस्य सहयात्री, समग्रः आकाशः येषां गृहस्य छदिः, समग्रा पृथिवी येषां चलनमार्गः च। अहं भवत्सदृशः भवितुं यथा शक्नुयां तथा महारण्यस्य निर्जनस्मारकतः भवान् आशीर्वादं करोतु। सुखेषु दुःखेषु च अहं विगतस्पृहः निर्भयप्राणः च यथा स्यां तथा आशीर्वादं करोतु भवान्। ... आप्रच्छनं, मित्र, आत्तिलिओगात्तिवर्य! बहूनां जन्मनां सुहृद् आसीत् भवान्।

(जुन् 2019, पृ.26-30, सम्पुटः-24, सञ्चिका-9)

अत्र कथमपि अनुवादः मूलभावं रक्षितुं नाशक्नोत्। शङ्कर एकेवारे अज पाडागाँयेर छेले इत्यस्य कथमपि भावानुवादस्तु जातः, परन्तु वौ-कथा-क डाकवे इत्यस्य अनुपदानुवादः संस्कृतेन न शक्यः।

2.21. जन्मान्धस्य स्वप्नः

आधुनिककविषु अन्यतमस्य, प्रयागवास्तव्यस्य डॉ.बनमालिनो बिश्वालस्य काव्यसंसारः संस्कृतोडियाहिन्दीभाषासु प्रवाहितः सन् काव्यत्रिवेणीं सृजति, यत्र अवगाह्य कोऽपि सहृदयः आत्मानं पुनाति। तथैव तस्य कथाविश्वं, शोधग्रन्थाः, अनूदितसाहित्यञ्च। अत्र यथा मूलभाषात्रयं

तथैव मूलविषयत्रयम्। ततः केवलं "जन्मान्धस्य स्वप्नः" इति अस्माकमालोच्यविषयः।

अस्मिन् कथासङ्ग्रहे आहत्य एकाशीतिः लघुकथाः सन्ति, याभिः मानवजीवनस्य विभिन्नदिशः उन्मीलिताः भवन्ति। अत्र स्थानिताः जन्मान्धस्य स्वप्नः, मृत्तिका महाकन्या, ह्यालिः, सारिपुत्तः, अहं युधिष्ठिरो वदामि, कावेरी, पूर्णपरागः, तृतीयनेत्रं, फिन् पोलारिस, भ्राम्यमाणस्य रेलयानस्य तथा स्थिरस्थानकस्य कथा, पञ्जरस्थः शुकः, मम स्वस्य पुनर्जन्म, मधुबाबोः मते, निराशो निचिकेता, कनिष्ठा माता, चाणक्यः, हालिकस्याविष्कारः, प्रलयः, अहं तदेव अर्धदग्धं काष्ठम्, महाजीवाणुः, तासपत्रकम्, प्रवचनविक्रेता, पिपीलिका, कर्गदम्, शताब्देः शेषश्वासः इत्यादिकथाः अत्युत्तमाः सन्ति। नवीनभावैः सरलभाषया च अनुवादः कामपि अपरां मात्रां योजयति। पूर्णपरागकथायाः अनुवादः एवमस्ति- "द्विप्रहरवेला। कोकिला रौति स्म प्रसन्नमनसा। हरिताम्रशाखासु चञ्चुं घर्षयित्वा स्निह्यति स्म। पर्वतस्य अपरपार्श्वे आम्रवने ये काकदम्पतयः नीडं रचयित्वा वसन्ति, तत्रैव सा स्वाण्डान् त्यक्तवती। अद्य ते स्फुटीष्यन्ति शावकीभूय। अपराह्णे यदा काचित् शीतलता आयास्यति, तदा सा गमिष्यति सावधाना भूत्वा। स्वशावकत्रयं गृहीत्वा आगमिष्यति।"

गच्छ गुडिक वि सेदिन एभलि चुप् थिले ये मने हेउथिला मणिषर हृदयकु देखि आतङ्कित होइपडिथिले। अथवा बहुदिन धरि चालवुल करुथिवा मणिषमानङ्क हातर सिद्धान्तकु अपेक्षा करिछन्ति। (ओडियामूलम्, पृ.123) (वृक्षाः अपि सर्वे तस्मिन् दिने तथा निश्चलाः आसन् यथा ते मनुष्याणामन्तःकरणानि दृष्ट्वा आतङ्किताः सन्ति। अथवा तेषां चतुर्दिक्षु बहुकालाद् भ्रमतां मनुष्याणां हस्त-सिद्धान्तं ते प्रतीक्षन्ते।) (पृ.174)।

वापा कहुथिले- एते कष्ट करि गछ लगेइ छाडि याइछन्ति। सवु आमदानी रु आमे ताङ्कु भाग देवा। मुँ निश्चिन्त हेलि। वापा निश्चे गछ सवु हाणि देवाकु आउ कहिवेनि।(ओडियामूलम्, पृ.123)। पिता अवदत्- इयता कष्टेन वृक्षान् आरोप्य इदानीं तान् त्यक्त्वा गच्छन्ति। अतः वृक्षेभ्यो यत् किञ्चिदर्जनं सम्भविष्यति तस्मै अंशं दास्यावः। अहं निश्चिन्तः अभवम्। पिता तर्हि इतः परमत्रत्यान् वृक्षान् कर्तयितुं न वदिष्यति।(पृ.174)।

कागज इति ओडियामूलकथा अत्र कर्गदम् शीर्षके अनूदिता। अत्र अवसरप्राप्तस्य बुद्धजीविनः वार्द्धक्यं सम्यक् निरूपितम्। नेत्रकष्टात् ग्रन्थानां

पठनं वारणाय पुत्रः तालकं योजयति, संवादपत्राणि अपि न स्वीकरोति। परन्तु तेन स उन्माद इव इतस्ततः भ्रमन् प्रतिवेशिन्याः वध्वाः संवादपत्रं नीत्वा उपविशति। चटुलं वर्णनमस्य पश्यन्तु किञ्चित्- सौभाग्यादुन्मत्तो नाभवम्। किन्तु अन्धः अभवम्। अन्धः नास्मि चेत् किमन्यत्। वारद्वयं शल्यचिकित्सां कृत्वा उपनेत्रं धारयित्वा अपि वामनेत्रेणैव किञ्चिद् द्रष्टुं प्रभवामि। दक्षिणनेत्रञ्च सर्वदा धूमाच्छन्नम्। अत एव पुत्रो मे पुस्तक-आलमीरायां नूतनं तालकं योजितवान्। यत् पत्रिकाद्वयमायाति स्म तदपि निषिद्धम्। न जाने किं चिन्तयति सः। मध्याह्नसमयः। अहं जीवितोऽस्मि न वा। किमपि तु करिष्यामि। अमृतफलानां चयनं तु न आवश्यकम्। स्नेहेन लालनयोग्याः बालास्तु सर्वे वरिष्ठाः सञ्जाताः। द्विचक्रिकाया अपि स्वच्छीकरणं निषिद्धम्। तदर्थं शङ्करो वर्तते। पार्श्ववर्तिनि गृहे अपि न कश्चिद् जल्पितुं वर्तते। ... एकाकिनी एव काचित् नववधूः तिष्ठति। अतस्तद् वृत्तपत्रमेव शरणम्। प्रजाभ्यः प्रधानमन्त्रिणं यावत्, गणधारणातः गणधर्षणं यावत्- सर्वं पठन्नस्मि पङ्क्तिशः। (पृ.181-82)।

2.22. ज्वाला तथा जलम्

"ज्वाला और जल" इति प्रसिद्धहिन्दीव्यङ्ग्यकथाकारस्य हरिशङ्कर-परसाईवर्यस्य (१९२४-१९९५) युवावस्थायां लिखितः लघुः उपन्यासो वर्तते। अधुनायमुपन्यासः प्रथमतया संस्कृतेन अनूदितः रवीन्द्रकुमारपण्डामहोदयेन २०१४ संवत्सरे। अस्यां कथायां द्विमुखविशिष्टमानवमनसः ज्वालामुखीं कथाकारः प्रेम्णो जलधारया निर्वापयितुमिष्टवान्। पितुः व्यभिचारमसहमानाया मृतायाश्च मातुः पुत्रः कथानायको विनोदः परिवाराद् मुक्तो भवितुम् अब्दुलनाम्ना जीवति। पितुर्हननाय कृतप्रतिज्ञस्य ज्वालात्र सुषमायाः प्रेम्णा शान्ता भवति। तस्य द्विमुखचरित्रमुत्तमं निरूपयति आरम्भे एव- अब्दुलः ... ... नहि नहि विनोदः। ... ... यस्य जनस्य कथनिकां कथयामि, तस्य प्रतिमा यदि कदाचिन् निर्मिता भवेत् तर्हि तस्य मुखद्वयं भवेत् – अब्दुलस्तथा विनोदः। ... ... उद्धतः कलहकारी दुष्टः – अब्दुलः। एवं सन्तापितः त्रस्तः पीडया विक्षतः, ग्लानिद्वारा गलितः, त्रुटितः, अवनतो विनोदः। ... ... तस्य कल्पना हि विरोधानां कल्पनास्ति।(पृ.३)।

वर्ममहोदयः सपरिवारः चलच्चित्रदर्शनाय गत्वा विनोदेन मिलितः। स तदा अधिकमूल्येन चलच्चित्रचिटिकानां क्रयविक्रयं करोति स्म। तथा पौरुषमस्ति चेत् कोऽपि चलच्चित्रचिटिकां प्राप्नोतीति सम्यक् निरूपितं

कथाकारेण- “अनन्तः सम्मर्दः। चिटिकागृहाणां वातायनान्यपि न दृश्यन्ते स्म। ... ... चलच्चित्रस्य चिटिकाक्रयार्थं भिन्नप्रकारस्य शौर्यस्यावश्यकता भवति। यद्यपि सिकन्दरेण दिग्विजयः कृतः, स किन्तु अस्माकं कस्मादपि प्रेक्षालयात् चिटिकां क्रेतुं न शक्नोति। ... ... यदि जनकः सीतायाः स्वयंवरम् अस्मिन् समये अकरिष्यत् तर्हि स उद्घोषयेत् यत् शिवधनुष उत्थापनपरिवर्ते यः चलच्चित्रस्य पञ्च चिटिकाः क्रीत्वा आनेष्यति, तेन साकं सीतायाः परिणयो भविष्यति।” (पृ.५-६)

वर्ममहोदयस्य मातरं दृष्ट्वा विगलितहृदयः स विना लाभं चिटिकाव्यवस्थामकरोत्। तदारभ्य वर्धिता मैत्री। परन्तु कथमपि अन्तर्ज्वालां शमयितुं स नेच्छति। यथोक्तं विनोदेन- “त्वं न जानासि, ममान्तः कियती ज्वाला प्रज्वलति। अहं प्रतिशोधं पुत्रवत् पालितवान्। स ममात्मजोऽस्ति। अधुना नाहं कस्य कथनेन तस्य कण्ठं निरोद्धुं शक्नोमि। येन मत्सदृशी यातना नानुभूता, स मम स्थितिमवगन्तुं न समर्थः।” (पृ.४२)।

इयं ज्वाला तस्य प्रशान्ता प्रणयावेगेन। स सुषमायाः प्रेम्णाबद्धो जातः। तथापि स च्छुरिकां धारयति स्म पितृवधाय। अन्तत इयं द्विधाभावना न श्लिष्यतीति वर्मा वदति- “तव समक्षं मार्गद्वयमस्ति। अहं सुस्पष्टं वदामि। त्वमत्यन्तं विचारपूर्वकं निश्चयं कुरु। ... ... त्वन्निकटे एका छुरिकास्ति, यां त्वं प्रियसङ्गिनीमिव नीत्वा विभ्रमसि। अधुना वर्तमानकाले एका नारी त्वया प्राप्तास्ति या तव प्राणसमा प्रियास्तीति चिन्तयसे। ... ... परन्तु वस्तुद्वयं त्वया प्राप्तुं न शक्यते। सा छुरिका यां त्वं तव पितृहृदये प्रक्षेपयितुं कामयसे। वस्तुतः सा तस्या नार्या हृदयं विदारयिष्यति। त्वमेकमेव द्वयेभ्यः स्वीकुरु। ... ... किं तव प्रयोजनम्? छुरिका अथवा सुषमा। यदि छुरिका प्रिया तर्हि त्वमधुनैव नगरं परित्यज्य गच्छ एवं न कदापि मुखमत्र कुरु। यदि सुषमा तवावश्यकी तर्हि छुरिकां कोषान्निष्कास्य तां परित्यज।”(पृ.७३-७४)

अन्ततः स छुरिकां समर्प्य प्रेम्णा महीयते। जुगुप्साया उपरि प्रेम्णो विजयेन लेखकोऽपि महीयते। उत्तमोऽयं संस्कृतानुवादः त्वरया कृत इति प्रतीयते। क्वचिन्मूलानुगोऽनुवादः- पितः, जीवनं हस्तोपरि संरक्ष्य गमनीयं भवति(७), अस्माभिः तस्मिन्नेव समये हस्तद्वयं स्पृशयद्भिः तस्या घटनायाः समाप्तिः क्रियते। पुनः तेन सह उपविशन् धूम्रपानं कुर्मः। भवान् स्वहृदयपुस्तके घृणां विलिखति, तस्य जनस्य नाम्ना। तस्य गणितं प्रवर्धत एव। कदा तं षडयन्त्रेण धूल्यां मिश्रयितुं प्रयतन्ते भवन्तः। परन्तु वयं

त्वरितमेव दानप्रतिदानमाध्यमेन गणितस्य समाधानं कुर्मः।(१८)। क्वचिदनुवादो मूलाद् भिद्यते- स करवस्त्रं परिधाय आगतवान्(११), क्वचिन्नूतनपदनिर्माणं कष्टकल्पनां कल्पयति। धाराशास्त्रीव्यवसायः प्रारब्धः(विधिव्यवसाय इत्यर्थे) इत्यादि। अन्ते एतद्वक्तुं शक्यते यन् मानवीयमनसो विकल्पने वर्णने च मूललेखको यथा सफलस्तथैव सफलोऽनुवादकोऽपि।

2.23. दिव्यरामायणम्

वङ्गभाषया इदं रामायणकथाश्रितमद्भुतं पुस्तकं स्वामिना अपूर्वानन्देन लिखितम्। वाराणसीस्थिताचार्येण त्र्यम्बकभाण्डारकरेण इदं 1976 ईशवीयसंवत्सरे अनूदितं सुरभाषया। अत्र प्रथमांशं विहाय 586पुटयुतं देवनागरीलिप्या वारासत-आश्रमात् प्रकाशितं वर्तते। अत्र सम्पादकीयम्, आमुखम्, प्राग्वाणीम्, परिशिष्टञ्च विहाय रामायणवत् सप्त काण्डानि सन्ति।

प्राग्वाणी इति भागः एकपञ्चाशत्पुटात्मको भूमिकाभागो वर्तते। स्वामिवर्यः सरलभाषया विविधरामकथानां सारमत्र प्रकाशितवान्। सत्यमुक्तं तेन- अस्मिञ्जगति सीता दशरथनृपतेः पुत्रवधूरूपेण तथा महात्मनः पुण्यश्लोकरामचन्द्रस्य धर्मपत्नीरूपेण चावतीर्णा, किन्तु सा चिरसीमन्तिनीनां हिन्दुरमणीनाम् अक्षयसिन्दूरबिन्दुरूपेण प्रतिभासिता। अद्यापि वयं तामेव चिरगौरवहेतुं सतीमूर्त्तिमवलोक्य कृतार्थाः भवामः। (पृ.44)।

सीता हिन्दुरमणीमात्रस्याभ्यन्तरं लज्जाविनयदैन्यैः कठोरता-सहिष्णुताभ्यां, पवित्रतात्मसमर्पणरूपेण च दीर्घं शतशो वर्षपर्यन्तं निभृतं स्वमहिम्नि विराजमाना तिष्ठति। न केवलं सीता भगवतः सृष्टिः, सा खल्वासीद्भगवतो दानम्। सीतायाः मूर्त्तिः आत्मत्यागस्य मूर्त्तिः स्वर्गीयपावित्र्यस्य मूर्त्तिः। तस्याः प्रेम क्षमा च सार्वजनीना। तस्यास्तदेव प्रेम शान्तिरूपेण दास्यरूपेण वात्सल्यरूपेण सत्यमाधुर्यरूपेण च विकसितमजायत। (पृ.51)।

मङ्गलाचरणरूपे भागे तुलसीदासेन श्रीरामचरितमानसे प्रत्यध्यायं योजिताः मङ्गलश्लोकाः अत्र सङ्गृहीताः सन्ति। अन्तिमे ग्रन्थसूच्यात्मकपरिशिष्टभागे विविधरामायणानां विस्तृतं विवरणं प्रदत्तमस्ति। तत्र तत्र विविधरामायणकथांशाः अपि पादटीकायां योजिताः सन्ति। तेनायमाकरग्रन्थ इव वर्तते।

2.24. देवदासः

देवदासः इति उपन्यासस्य वङ्गीयमूललेखकः शरच्चन्द्रचट्टोपाध्यायो वर्तते, यस्य अनुवादकः विश्वजित् प्रामाणिकः अस्ति, प्रकाशिका च संस्कृतभारती वर्तते।

शरच्चन्द्रेण तारुण्यकाले लिखितोऽयमुपन्यासो देवदासः षोडशपरिच्छदेषु पार्वती(पारो)-देवदासयोः बाल्यप्रेम्णः भव्यं चित्रं समुपस्थापयति। तयोः आलापे प्रलापे क्रीडने ताडने भ्रमणे आक्षेपणे च परस्परानुरागो लक्ष्यते। तेन सह कस्याश्चित् चन्द्रमुखीति वाराङ्गनायाः प्रेमजीवनमपि अत्र नेत्रातिथ्यं भवति। पारो-चन्द्रमुख्योः मध्ये देवदासस्य जीवनं स्वाहामयं सञ्जातम्। विंशशताब्द्याः प्रारम्भिककालिकस्य भारतीयसमाजस्य चित्रमत्र निरीक्षितुं शक्यम्। सामाजिकरीतीनां प्रथानां कुसंस्काराणां चात्र वर्णनं लक्ष्यते। अत्र प्रथमपरिच्छेदे पाठशालायां भोजनविरामे बालानां कर्मचारिणाम् अध्यापकस्य च कुचेष्टितानि वर्णितानि। ... अधुना प्रकोष्ठान्ते केवलं पण्डितवर्यः द्वितीयप्रहरस्य आलस्यं सफलीकर्तुं लोचने निमील्य शयानः वर्तते, अपि च द्वारपालः असौ भोलानाथः एकस्मिन् कोणे हस्तपादम् एकस्य दीर्घपीठस्य उपरि संस्थाप्य आत्मानं पण्डितायते। ... पार्वती निविष्टमनसा निरतिशयेन धैर्येण च सुप्तस्य अस्य पण्डितवर्यस्य प्रतिकृतिम् अङ्कयितुं कृतसङ्कल्पा सती बोधोदयपुस्तकस्य अन्तिमपृष्ठे मशीलेपनं कुर्वती अस्ति। ... पार्वती तारस्वरेण कलरवं करध्वनिं च कुर्वती भूमौ विलूण्ठन्ती आसीत्। सद्यः निद्रोत्थितः गोविन्दपण्डितः सरक्तनेत्रम् उत्थाय अतिष्ठत्। तेन दृष्टं यत् वृक्षतले बालकगणः आवलिं विरचय्य हैं हैं शब्देन धावनरतः अस्ति इति। तदा एव गोचरीभूतं यत् भग्नस्य दीर्घपीठस्य उपरि पादयुगलं नृत्यत् घूर्णायमानम् अस्ति, अपि च सूधाचूर्णस्य अन्तः आग्नेयगिरेः अग्न्युत्पातः प्रचलन् अस्ति। सर्वान् अतिक्रम्य देवदासः विद्यालयात् पलायितः। देवदासस्य गुणाः लेखकलेखन्या प्रगुणिताः सन्ति- संसारानभिज्ञः अपरिणामदर्शी कश्चित् अलक्ष्म्याश्रितः बालकः एतस्य रेणुमात्रमपि नष्टं कर्तुं न प्रभवेत्। ... श्रीमन्, देवदासः ग्रहीतुम् अयोग्यः। सः पलायितः अस्ति। अहो, रामचन्द्रस्य शरःक्षेपणस्य तुल्यम् आसीत् तस्य इष्टिकाक्षेपणम्। ... तम् अवरोद्धुं वयम् असमर्थाः अभवाम।(पृ.2-3)। ततः

गोविन्दपण्डितः राजसदनं गत्वा देवदासस्य पितरं विषयमिमं समसूचयत्। वेणुवने धूमनलिकां पिबति इति क्रुद्धा पार्वती अपि देवदासपितरं सूचयति।

द्वितीयपरिच्छेदे गृहवन्दी देवदासो मातुः प्रार्थनया मुक्तिप्राप्तिमात्रेण पारो .. पारो... आह्वयन् पार्वतीमाहूय वडिशदण्डनिर्माणाय काष्ठकर्तनाय वृक्षारूढः पार्वत्याः अनवधानात् पतितो नितरां क्रुद्धः सन् पार्वतीं प्रहृतवान्। प्रहारचिह्नानि गोपायितुं सा गोविन्दपण्डितस्य नाम्ना मिथ्या अवदत्। तेन तस्याः अपि विद्यालयगमनं निषिद्धम्। तस्याः पितामह्याः वचनात् तत्कालस्य नारीशिक्षा स्पष्टीभवति- उच्चविद्यया सा किं वा साधयेत्? स्नुषे! यदि द्वित्राणि पत्राणि पठितुं लेखितुं च जानीयात्, यदि रामायणं महाभारतं च पठितुं पारयेत् तर्हि एतावता एव अलम्। किं बहुना? किं भवत्याः पार्वती राष्ट्रपतिः वा न्यायाधीशा भविष्यति? (पृ.12)।

तृतीयपरिच्छेदे पारोदेवदासयोः विद्यालयगमनस्थगनात् कथं दौष्ट्यं वर्धितमिति वर्णितम्। इतस्ततः अटनं, मत्स्यग्रहणं, गानश्रवणम् इत्यादिकं तयोः दैनन्दिनकार्यं जातम्। पार्वतीपार्श्वे देवदासेन स्थापितं रूप्यकत्रयमपि सा गानं श्रुत्वा वैरागिभ्यः अयच्छत्। चतुर्थपरिच्छेदे देवदासः पार्वतीं कुत्रापि न गमिष्यतीति प्रतिज्ञातोऽपि पित्रा कलिकातां प्रेषितः। तदा तदा पत्रं लिखति स्म, तदपि शिथिलं जातम्। गमनागमने विलम्बिते। अन्ततो गत्वा पार्वती पुनः विद्यालयं गता। कलिकातायां च देवदासस्य नवसंस्कारो जातः। पञ्चमपरिच्छेदे पार्वत्याः त्रयोदशवर्षीयं यौवनं, विवाहप्रस्तावः, देवदासपित्रा अस्वीकृतिश्च निरूपिताः। बाल्यविवाह-कन्याविक्रय-गृहपार्श्वे विवाहादीनां क्षतयो विचारिताः। देवदासस्य माता वदति- अस्माकं गृहस्वामी बहुधा माम् अस्मारयत् यत् ज्येष्ठपुत्रस्य द्विजदासस्य बाल्यकाले विवाहं कारयित्वा कीदृशः महान् अपराधः आवाभ्यां कृतः इति। द्विजदासस्य अध्ययनम् एव सम्यक् न जातम्। अतः पूर्वकृतस्य अपराधस्य पुनरावृत्तिः नैव शक्यते।(पृ.21)। षष्ठपरिच्छेदे कथमपि साहसेन आत्मानं दृढीकृत्य रात्रौ एकवादने भूस्वामिभवनं प्रविश्य पार्वती देवदासस्य कृते आत्मनिवेदनमकरोत्। सप्तमपरिच्छेदे पार्वतीं वधूरूपेण स्वीकर्तुं पितुरनिच्छां ज्ञात्वा स पुनः कलिकातां प्राप्य पार्वती यथा तं विस्मरेत् तथैव पत्रं विलिख्य पत्रालये पातितवान्। परन्तु तस्मिन् प्रीतिमत्याः पार्वत्याः किं भविष्यति इति नितरां चिन्तितः पुनः कदापि कलिकातां न आगमिष्यामि इति सङ्कल्प्य ग्रामं प्रतिगच्छति। अष्टमपरिच्छेदे देवदासेन बहुधा प्रार्थितापि पार्वती तेन सह पुनः

विवाहार्थं सम्मता न जाता। परस्परमाक्षेपेण क्रुद्धो देवदासो वडिशदण्डेन तां ताडितवान्, कपोले क्षतं च कृतवान्। स्मृतिरेखारूपेण तत् स्वीकृत्य सा भुवनचौधुरिणो द्वितीयपत्नीरूपेण परिणीता। एतेन भग्नहृदयो देवदासः पुनः कलिकातां प्रस्थाय इतस्ततः आहिण्डमानः पुरातनभाटकप्रकोष्ठमागच्छति, यत्र स चुन्निलालेन सह वसति स्म। तस्य मनोदशा सम्यक् अत्र निरूपिता- किन्तु किञ्चन शिथिलम् औदासीन्यं मन्दं मन्दं तस्य वक्षसि सञ्चयीभवत् आसीत्। निद्रायां सत्यां मानवानां कस्मिन् अपि अङ्गे यदि हठात् पक्षाघातः जायते तर्हि निद्रातः जागरणस्य समनन्तरमेव यथा तस्मिन् अङ्गे कश्चन अधिकारः न अनुभूयते, अपि च विस्मितं स्तम्भितं मनः मुहूर्ताभ्यन्तरे कारणम् अन्वेष्टुं न प्रभवति यत् तस्य आजन्मसङ्गि चिरकालस्य इदं विश्वस्तम् अङ्गं तस्य आह्वानेन किमर्थं प्रतिस्पन्दनं न करोति। तदनन्तरं मन्दं मन्दम् अवगन्तुं शक्यते, यत् तस्य प्रियतमम् इदम् अङ्गम् साम्प्रतं तस्य अधीनीभूतं नास्ति इति। देवदासः अपि आरात्रि एवम्प्रकारेण मन्दं मन्दं लब्धज्ञानः सन् अवगच्छन् आसीत् यत् यथासमयम् अस्य संसारस्य अकस्मात् पक्षाघातः अजायत इति। .... पथि गमनसमये द्वित्रवारं सङ्घर्षः अभवत्। मार्गे स्खलनं प्राप्य अङ्गुलीषु रक्तम् उद्भूतम्। टलनकारणेन सः एकस्य उपरि अपतत्। सः एतं मद्यपं मत्वा अन्यस्मिन् पार्श्वे बलात् प्राणुदत्।(पृ.47)। तस्य अवस्थां दृष्ट्वा चुन्निलालः भोजनादिकं प्रदाय विश्रामाय अवदत्। तस्याः मनसः स्थितिं दृष्ट्वा तं चन्द्रमुख्याः गृहं नीत्वा तया सह अमेलयत्। परन्तु पार्वत्यां प्रीतिमान् देवदासः तत्र केवलं मद्यपानं कृत्वा प्रत्यागतः। परन्तु अस्यान्तः स्थिते मनुष्ये चन्द्रमुख्याः प्रीतिः वर्द्धिता।

दशमपरिच्छेदे पार्वत्याः नूतनसंसारस्य चित्रं चित्रितम्। विंशतिवर्षीयस्य पुत्रस्य महेन्द्रस्य साहाय्येन सा रुष्टां विवाहितां कन्यां यशोदां सान्त्वयित्वा पत्युः भुवनचौधुरिणो भग्नं संसारं पुनः निर्मितवती। परन्तु वृद्धपत्युः विपरीतरतिं वा अपेक्षमाणायाः तस्या दुरवस्था इत्थं वर्तते- तदा भुवनचौधुरी शय्यातः उत्थाय उपविश्य एकेन हस्तेन पार्वत्याः चिबुकं धृत्वा बहुकालं यावत् निःशब्देन तस्याः कमलवदनं निरीक्षते स्म। कश्चन निर्माता यथा प्रतिमां सज्जीकृत्य, मुकुटं धारयित्वा कदाचित् वामतः कदाचित् वा दक्षिणतः स्थित्वा बहुसमयं यावत् यदा निरीक्षमाणः भवति स्म, तदा सामान्यः गर्वः अधिकः स्नेहः तत् सुन्दरमुखं सर्वतः सञ्चयीभवति स्म, तथैव

भुवनचौधुरिणा अपि निरीक्ष्यते स्म। सः कदाचित् सगद्गदं वदति स्म- पार्वति! मया यथोपयुक्तं न आचरितम्। (पृ.58)।

एकादशपरिच्छेदे पूर्वप्रतिज्ञानुसारेण चन्द्रमुखीं स्प्रष्टुम् अनिच्छुकमपि देवदासं चुन्निलालः चन्द्रमुख्याः समीपं नयति। मदिरापानं विना अन्यत् किं कर्तुं शक्यते तेन? स वदति- मदिरां सोढुं शक्नोमि इत्येतदर्थं मया मदिरा नैव पीयते, चन्द्रमुखि! अपि तु अत्र अहं स्थातुं समर्थः भवेयम् इत्येतदर्थं मदिरां पिबामि। ... अस्मद्दशानां शोकपीडितानां पुरुषाणां विपत्सङ्गिनी दुःखसङ्गिनी च इयमेव तर्हि कथं वा इमां परित्यजेयं चन्द्रमुखि! (पृ.63)। द्वादशपरिच्छेदे नारायणमुखार्जिवर्यस्य मरणात् परं द्विजदासदेवदासयोः धनविभाजनमभवत्। भ्रातुः संसारं विचिन्त्य देवदास एव अन्तिमसंस्कारस्य अधिकं भारं स्वीकृतवान्। तत्रागता पार्वती देवदासस्य अवस्थां दृष्ट्वा तस्य सेवनाय सहैव नेतुमिच्छति। अनन्तरमागमिष्यामि निश्चयेन इति स प्रतिज्ञामपि करोति। त्रयोदशे बहुदिनेभ्यः परं देवदासः चन्द्रमुख्याः गृहमन्विष्य गच्छति, यत्र सा आभरणानि वस्तूनि च विक्रीय साधारणभावेन जीवति स्म। देवदासो विवाहं कृत्वा सुखेन जीवतु इति सा वाञ्छति स्म। सापि देवदासे प्रीतिमती इति तद्दिनात् परपुरुषस्य स्पर्शमकृत्वा देहव्यवसायं स्थगितवती। स्वभक्तिं विनिवेद्य यदा कदापि मां स्मरिष्यति इति देवदासमुक्त्वा सा दूरं गच्छति। सत्यमुक्तं तया- एतस्मिन् जीवने बहुदिनानि यावत् मया प्रेमव्यवसायः कृतः परं सकृत् एव प्रेमपात्री अभवम्। तस्य प्रेम्णः मूल्यं तु अमूल्यम्। एतेन मया बहुकिमपि अवगतम्। जानाति, प्रीतिः भिन्ना रूपस्य मोहः भिन्नः। (पृ.82)।

चतुर्दशाध्याये क्रमशो दायित्वं पुत्रवध्वै समर्प्य निश्चिता पार्वती मनोरमायाः पत्राद् देवदासस्य विपर्ययस्य वार्त्तां श्रुत्वा शिबिकां धृत्वा तालसेनापुरं गच्छति देवदासं स्वीकर्तुम्। तावता देवदासो निर्गत आसीदिति सा पुनः प्रत्यागता। पञ्चदशाध्याये प्रायः वर्षद्वयात् परं चन्द्रमुखी अपि देवदासमन्विष्य करदानच्छलेन देवदासस्य भ्रातृजायां प्राप्य ततः देवदासस्य सङ्केतं पृष्ट्वा कलिकातामागत्य अन्विष्यमाणा एकदा पादपथाद् देवदासं प्राप्नोति। तं स्वगृहमानीय संसेव्य जानाति मध्ये मध्ये तस्य उदरपीडा भवति इति। सः अन्ततोगत्वा चन्द्रमुख्याः सेवां स्वीकृत्य पुनः प्रतिगच्छति।

अन्तिमे षोडशाध्याये देवदासः द्वयोः अपि दूरं गत्वा अन्तः सीदति स्म। कदा पार्वतीं कदा वा चन्द्रमुखीं स स्मरन् आसीत्। पुनः चुन्निलालेन

मिलितः सः मद्यपानमपि करोति स्म। एकदा दिनत्रयात् परं ज्वरग्रस्तो गृहमागतो दिनत्रयात् परम्। तत्र चिकित्सायाः अनन्तरं मुम्बईनगरे चिकित्सितः स सामान्यः स्वस्थो जातः। ततः धर्मदासेन सह रेलयानेन ग्रामं प्रत्यागच्छन् पुनः अस्वस्थः पाण्डुयास्थानके अवतीर्णः। ततः अश्वशकटं शिबिकां वा अप्राप्य वृषशकटेन प्रस्थाय पार्वत्या ग्रामं गन्तुमिष्टवान्। तदा स्थितिः एवमासीत्- तदा मातुः स्मरणेन तस्य नेत्रे विदार्य अश्रूणि आयान्ति स्म। पुनः इतोऽपि एकं स्नेहकोमलमुखं जीवनस्य अन्तिमक्षणे अतिशयेन पवित्रीभूय दरीदृश्यते स्म। तत् दरीदृश्यमानं मुखं चन्द्रमुख्याः। ..एतस्मिन् जन्मनि तया सह पुनर्मेलनं न भविष्यति। ... तथापि पार्वत्याः समीपे मया उपस्थितेन भवितव्यम् एव। देवदासेन प्रतिज्ञा कृता यत् इतोऽपि एकवारं सः तस्य दर्शनं दास्यति इति।(पृ.111)। अन्ततोगत्वा रात्रौ द्वादशवादने यानं हातिपोताग्रामस्य भूस्वामिभवनस्य पुरतः आगत्य स्थितम्। तत्र वेदिकायां रात्रौ सुप्तः देवदासः प्रातः तत्रैव मृतः। एवं स्थितिर्जाता यत् चाण्डालास्तं नीतवन्तः। .... यदा सर्वं विवरणं पार्वती श्रृणोति सर्वमपि वाधाविघ्नं लोकलज्जां च विहाय सा धावति तेन मेलितुम्। तावता सर्वं समाप्तमासीत्। एवं मृत्युः कस्यापि न भवतु इति प्रार्थयन् औपन्यासिको वदति- मृत्युः सम्प्राप्तेः हानिः नास्ति, किन्तु तस्मिन् समये कस्यचित् स्नेहशीलहस्तस्य स्पर्शं तस्य ललाटपर्यन्तं प्राप्नुयात्। कस्यचित् करुणार्द्रं स्नेहमयं मुखं दर्शं दर्शं तस्य जीवनस्य अन्तः भवेत्। मरणसमये सः कस्यचित् बिन्दुपरिमितं नेत्राश्रु प्रेक्ष्य एव म्रियेत ...।(पृ.116)।

साहित्यिककृतीनाम् अनुवादे प्रतिपदमनुवादः श्लाघ्यतमो भवति। परन्तु अनुवादकस्य भाषासम्पत् समृद्धा नास्ति चेत्, व्याकरणं सम्यक् पठितं नास्ति चेत् तत्र महत् काठिन्यं भवति। अत्र यद्यपि व्याकरणगता दोषा न्यूनाः सन्ति, तथापि अनुवादः सुन्दरो नास्ति इति वक्तुं शक्यते। बहुत्र अनुवादकः भावमात्रमनुवदति। तदपि स्वशब्दैः न तु मूलशब्दैः।

2.25. देशहत्या

"देशहत्या" इति अयम् उपन्यासः हिन्दीभाषया कृतस्य प्रसिद्धस्य "देश की हत्या" इति नामधेयस्य उपन्यासस्य संस्कृतानुवादः अस्ति। मूलग्रन्थस्य लेखकः प्रसिद्धः उपन्यासकारः श्रीगुरुदत्तवर्यः अस्ति। अनेन नैके उपन्यासाः अस्य विविधपृष्ठभूमीमाधारेण उपनिबन्धाः सन्ति। भारते गान्धियुगसम्बन्धिनीं पृष्ठभूमिम् आधारीकृत्य लेखकेन 'स्वाधीनता के पथ

पर', 'स्वराज्यदान', 'विश्वासघात' इत्यादयः उपन्यासाः क्रमशः लिखिताः। उपन्यासानां शृङ्खलायाः अन्तिमभागरूपेण 'देश की हत्या' अस्ति।

अस्मिन् उपन्यासे भारतपाकिस्तानयोः विभाजनस्य समये प्रवर्तमानानां घटनानां वर्णनम् अस्ति। अस्मिन् उक्ताः घटनाः तथ्यानि च सत्यभूतानि सन्ति। तात्कालीनानां घटनानां विश्लेषणं लेखकेन पात्राणां कथनोपकथानानां माध्यमेन उपस्थापितम् अस्ति।

अयम् उपन्यासः १९४७-तमस्य वर्षस्य भयङ्करीषु सामाजिकासु राजनैतिकासु परिस्थितिषु आधारितः अस्ति। अस्मिन् वर्णिताः घटनाः तथा च जनाः ऐतिहासिकानि तथ्यानि च विहाय कथा मुख्यतया काल्पनिकी अस्ति। अस्मिन् वर्णितानां घटनानां ज्ञानं नैकेभ्यः निर्वासितेभ्यः हिन्दुभ्यः, तात्कालीकेभ्यः वार्तापत्रेभ्यः, श्रीगोपालदासखोसलावर्यस्य 'स्टर्न-रेक्कोनिङ्ग' तथा च श्रीअमरनाथबालीवर्यस्म 'नो! इटकैन वी टोल्ड' नामकात् पुस्तकात् च सङ्गृहीतानि सन्ति। तथापि उपन्यासस्य विषयं पूरयितुं काल्पनिकं कथाचित्रमप्यत्र विराजते। पापस्य प्रायश्चित्तम् इति प्रथमभागस्यारम्भः राजनीतेः उन्मत्ततां प्रतिपाद्य भवति देशहत्याकारिणां विचारेण च-

अस्ति उन्मत्तानाम् उद्योगः राजनीतिः अपि। एतया यः मोहितः भवति तस्य गृहवीथ्यादीनाम् अपि अवबोधः न भवति। सद्यः प्रातः शय्यायाः त्यागसमनन्तरं निद्रायाः भङ्गस्य समनन्तरमेव वार्तापत्रेषु वार्ताशीर्षकाणां पठनं तथा च शोचालये स्नानागारे राष्ट्रचिन्तनम्, चायपानसमये प्रातराशसमये वा पुरःस्थितेन जनेन सह चर्चयतः मानसिकानाम् उद्गाराणां प्रकटनं, यात्रासमये वासयाने, रेलयाने, अश्वशकटे वा गमनागमनसमये राजनैतिकचर्चायाः प्रारम्भः इति एतानि राजनीतिप्रायोजितायाः उन्मत्ततायाः कानिचन लक्षणानि सन्ति। एतादृशानां जनानां चिन्तनम् अस्ति यत् एतेन चिन्तनेन राष्ट्रं प्रगतिं प्राप्नोति इति।

मूलग्रन्थे चेतनानन्दः स्वादर्शं मतवादं चेत्थं विशदीकरोति- ''यह सत्य है कि कांग्रेस ने मुझको विधानसभा का सदस्य निर्वाचित किया है, परन्तु यह सत्य नहीं कि मैंने वह सदस्यता स्वीकार कर ली है। मैं वर्तमान परिस्थिति में कांग्रेस के विचारों से सहमत नहीं हूँ और मैं उसका प्रतिनिधि बनने के लिए तैयार नहीं हूँ।''

.... इस समय देश की हत्या करने का श्रेय इन समाचार-पत्रों को ही मिलेगा। ये लोग ऐसे समाचार, जो महात्मा गांधी और उसके शिष्य-

प्रशिष्यों की विचारधारा, कि हिन्दू-मुसलमान एक ही जाति के अंग हैं, को गलत सिद्ध करें, नहीं छापते। जहाँ मुसलमान मारें, वह नहीं छप सकता; जहाँ हिन्दू मारें उसे छापकर हिन्दूओं को गाली देना अपना कर्तव्य मानते हैं। परिणाम यह हो रहा है कि संसार की अधिकांश सभ्य जातियाँ हिन्दुओं से घृणा करने लगी हैं।

विना कारणं जातानां कुकृत्यानां हननानां हस्ताहस्तिकानामुग्रतां वीक्ष्य साधारणः गुरुभक्तोऽपि शस्त्रेण सह बहिर्गच्छति, तदर्थं बाध्यो भवति-

एतत् दृष्ट्वा जगदेवस्य नेत्रयोः रक्ताश्रूणि निपतितानि। सः तेषु दिनेषु तत्र एव आसीत्। उद्यानसमीपे एकस्मिन् भवने तस्य कार्यालयः आसीत्। अमृतसरे अगस्तमासस्य प्रथमे दिने प्रातः कालादारभ्य एव छुरिकाभिः उदरविदारणस्य घटनाः प्रारब्धाः आसन्। मध्याह्नपर्यन्तं तु आकाशे द्वित्रेभ्यः कृष्णधूमः निर्गच्छन् दृश्यते स्म।

जगदेवसिंहः गृहस्य छदीं गत्वा अपश्यत् येन अवगतवान् यत् क्वचिद् अग्निकाण्डः सञ्जातः इति। तदा ताः सूचनाः आगताः यत् "कर्मों की ड्योढी" नाम्नि स्थाने आपणानां लूण्ठनं प्रचलति इति।

जगदेवसिंहः अपृच्छत्, "कः लूण्ठयति?"

"एतद् किमर्थम्? अत्र तु इदानीं पाकिस्तानं न भविष्यति खलू?"

"एषः विषयः न अस्ति मुस्लिमाः चिन्तयन्तः सन्ति यत् कस्मिंश्चित् दिने तु गन्त्यव्यम् एव भविस्यति। अतः यावत् लूण्ठनेन नेतुं शक्ष्यामः तद् वरम् एव।"

तस्मिन् एव समये अपरः कश्चन सूचनाम् आनीतवान् यत्मुस्लिमतीयः यः उपायुक्तः अस्ति, नवमे दिनाङ्के तस्य स्थाने अन्यः कश्चन उपायुक्तः भविष्यति अतः अत्र नवमदिनाङ्कपर्यन्तं यावत् लूण्ठनं कर्तुं शक्नुवन्ति तावत् कुर्वन्तु इति अवदत्। अत्र पुनः लूण्ठनमारणादिकं सर्वं प्रारब्धम् इति।

जगदेवः गभीरे चिन्तने लीनः। सः अतिविकटस्य निर्णयस्य विषये चिन्तयन् आसीत्। स उत्थाय व्यक्तिगतप्रकोष्ठम् अगच्छत्। गुरोः चित्रस्य पुरतः हस्तौ मेलयित्वा प्रार्थनां च प्रारब्धवान् "गुरो! अहम् अल्पबुद्धिः, त्वदीयः जनः प्रकाशार्थं त्वां हस्तौ सम्मेल्य प्रार्थये। न अहम् इच्छामि स्म यत् तव प्रियं हिन्दुस्थानं रक्तपातं करवाणि। परन्तु भवितव्यता प्रबला भवति। मां मार्गं दर्शय। अहं किं करवाणि?

गुरो! यत् किम् अपि अहं कुर्वन् अस्मि तत् सर्वं मातृभूम्यै स्वराष्ट्राय च कुर्वन् अस्मि। मम अस्मिन् कश्चन अपि स्वार्थः न अस्ति। अहम् आत्मनं भवतः चरणयोः अर्पयित्वा अनुमतिं याचे।"

एतावत् उक्त्वा जगदेवसिंहः शिरः भूमौ नत्वा गुरोः चरणयोः नमनम् अकरोत्। बहुकालं यावत् च तस्मात् एव अवस्थायां स्थितः। पश्चात् प्रकोष्ठात् बहिः आगतः च।

अस्य ग्रन्थस्य अन्तः भवति आजीवनं गान्धिवादप्रचारकस्य गान्धिनः हत्याकालिकदुष्कृत्यानां प्रकरणे वन्दीकरणेन। कदाचित् स्वधीनदेशे स्थितात् जीवनात् उत्कृष्टतरं मनुते वन्दीजीवनमिति विना प्रतिवादं विवाहमण्डपात् उत्थाय सः कारागारं गच्छति।

अत्र अनुवादकः यद्यपि मूलानुगमनुवादाय प्रयत्नशीलोऽपि असफलो दृश्यते। बहुत्र भावानुवादेन कार्यं चालयति। यथा-

हावडातः पञ्चनदं प्रति गच्छति रेलयाने द्वितीयश्रेण्याः भागे कस्मिंश्चित् यात्रां कुर्वतोः यात्रिणोः 'ट्रिब्युन' इत्याख्ये वृत्तपत्रे प्रकाशितायाः वार्तायाः विषये कलहस्य स्थितिः उत्पन्ना। विशालकायं धृतकार्पासिकवस्त्रजनं समीपस्थे आसन्दे उपविष्टः जनः अवदत्- "अरे! पश्यतु! पश्यतु! काङ्ग्रेसदलीयाः जनाः कीदृशं कुकृत्यं कुर्वन्तः सन्ति?"

धृतकार्पासिकवस्त्रः सः वैयक्तिकया कयाचित् समस्यया चिन्ततः आसीत्। येन सः सहयात्रिणः कथनम् अपि अवधातुम् अक्षमः आसीत्। यदा एवं जातं तदा वक्ता स्वस्य विषयं पुनः उक्तवान् येन तं प्रति तस्य अवधानम् अभवन्। सः वार्तापत्रिकां प्रति प्रवृत्तः सन् अपृच्छत् "किं जातम्?" इति। (पृ.1)

पंजाब-हावड़ा मेल के सेकण्ड क्लास के डिब्बे में यात्रा करते हुए दो यात्रियों में 'ट्रिब्यून' समाचार-पत्र में छपे एक समाचार पर ऐसी ही परिस्थिति उत्पन्न हो गई। एक भारी शरीर के खद्दरधारी व्यक्ति को साथ वाली सीट पर बैठे यात्री ने कहा, ''देखिए ! देखिए ! ! ये कांग्रेस वाले क्या अनर्थ कर रहे हैं ?''

वह खद्दरधारी अपनी निज की समस्याओं पर विचार करने में इतना लीन था कि पहले तो उसने अपने साथी यात्री के कथन को सुना ही नहीं, परन्तु जब उसने अपने कथन को दुहराया तो उस खद्दरधारी का ध्यान

उसकी ओर गया और उसने झुककर समाचार-पत्र को देखते हुए पूछा, ''क्या हुआ है ?'' (हिन्दीमूलम्-पृ.1)

अत्र खद्दरधारी धृतकार्पासिकवस्त्रः इति अनूदितः, परन्तु खद्दरधारी इत्यस्य प्रगोयः ततः साधीयान् एव आसीत् इत्यस्माकं भावना। एवमन्यत्रापि मूलशब्दानां संस्कृतमर्यादया मर्यादितानां रक्षणमेव खलू सफलानुवादस्य रहस्यम्।

2.26. धर्मश्रीः

औपन्यासिकस्य एस्.एल्.भैरप्पवर्यस्य अयमपरः क्रान्तिकारी कन्नडोपन्यासः, संस्कृतभारतीपक्षतः प्रकाशितः जनार्दनहेगडेवर्येण अनूदितश्च। कस्यचिद् एकनिष्ठ-हिन्दु-क्रैस्त-युगलस्योपरि आनन्दकेण्टिश-कुमारस्वामिनः राष्ट्रियध्येय-शिवताण्डवादि-भारतीयकला-संस्कृतिविषयक-प्रबन्धाः, राधाकृष्णस्य हिन्दुजीवनदृष्टिः, गङ्गाप्रसादोपाध्यायस्य भारते क्रैस्त, भगिन्याः निवेदितायाः भारतीयजीवनपरिधिः, रामकृष्णाश्रमस्य कलचराल् हेरिटेज् आफ इण्डिया, इंगरसोलस्य आउट् स्पोकेन् एसेस्, यानिङ्-महोदयस्य यूनिटारियन् खीष्टियानिटि इति ग्रन्थाः, थामुसपेयिन-हयावेल-कजिन-फर्म्युसन-डेसन-पालब्रण्ट्-माक्सम्यूलर-विवेकानन्दानां मतानि, राष्ट्रियस्वयंसेवकसङ्घ-आर्यसमाज-हिन्दुसमाजानां नियमाश्च कथं प्रभावं जनयन्ति, तस्य सङ्कीर्णजीवने उदात्तां सनातनीं चेतनाञ्च जागरयन्तीत्यत्र विचारणीयो विषयः।

कथानायकः सत्यनारायणः व्यसनिनः पितुः, मातापितामहीभ्यां पालितः पुत्रः, मातुलालये कष्टं सहमानः नरसापुरग्रामे उपस्थितस्वामिवर्यस्य साहाय्येन माध्यमिकशालायां पठितुं गतः। यलूवरायप्रौढशालायां पठनसमये उदरम्भरितुं भिक्षाटनार्थं ग्रामवासिभ्यः, चलच्चित्रमन्दिरे प्रधानाध्यापकाच्च निन्दनं प्राप्य मित्रेण नण्जुण्डेन अनाथालये प्रापितः, तत्र स्वयंसेवकेन शङ्करेण सह तस्य परिचयः, हिन्दुधर्मरक्षणे सङ्कल्पश्च जातः। तस्य इतिहासाध्यापकस्य पत्नी रायम्मा तस्य बाल्यसखी आसीत्। अध्यापकस्तु हिन्दुमूलक्रैस्त इति मार्क्सवादी आसीत्। तस्य भगिनी लिल्ली उग्रा आधुनिकापि सत्यनारायणस्य संस्कारेण अनुव्रता सती तं परिणीतवती। परन्तु तदर्थं सत्यनारायणः क्रैस्तधर्मं स्वीकृतवान्। श्वसुरस्य साहाय्येन स क्रैस्तमहाविद्यालये अध्यक्षपदमासाद्य प्रभूतं वेतनं, शोभनं वासगृहं च प्राप्नोति। परन्तु धर्मत्यागस्य तुमुलं तस्य मानसिकशान्तिं नाशयति।

क्रैस्तमतप्रचाराय विशिष्य श्वसुरस्य प्रचोदना, विवेकानन्दस्य प्रेरणा, स्वीयोत्तरपुरुषाणां संस्कृतिहीनानां चिन्तना, शङ्करस्य राष्ट्रभक्तिः, पित्रा आवुत्तेन भगिन्या च कृता अवहेलना, बन्धोः शङ्करस्य उद्बोधकं पत्रं, क्रैस्त-दस्तीनगौडस्य हिन्दुसंस्कृति-हिन्दुनाटकेषु आग्रहः, लिल्ल्याः हिन्दुसंस्कृतौ आदरश्च तं तलहीनतुमुले पातयन्ति। अन्ततः शङ्करस्य प्रेरणया आर्यसमाजे आत्मशुद्धिं पत्न्याः नाम धर्मश्रीः इति कृत्वा तौ मातृधर्मं प्रति प्रत्यागच्छतः, ययोः समाजे ग्रहणं स्यादिति प्रश्नं लेखकः पाठकानामुपरि त्यजति। एवमत्र समयक्रमेण क्रैस्तमतग्रहीतुः कस्यचन हिन्दोः मूलधर्मं प्रत्यावर्तनार्थं, क्रैस्तस्य हिन्दुधर्मस्वीकारार्थं, हिन्दोः क्रैस्तधर्मस्वीकारार्थं प्रस्तुतो बौद्धिकायामो नितरां श्लाघनीयः, यो वस्तुतो मानवधर्मस्य जयगानं करोति।

अस्योपन्यासस्य पर्यवेक्षणेन ज्ञायते यत्, स्वाधीनोत्तरभारते प्रचलित-प्रबल-क्रैस्तधर्मप्रचारस्य पृष्ठभूमौ रचितोऽयमुपन्यासः तद्धर्म-प्रचारकाः कथं छलेन बलेन धनेन कौशलेन वा क्रैस्तधर्मं प्रचारयन्ति, तस्य नग्नचित्रमत्र समुपस्थापितमुपन्यासकारेण। ईशुः एव सर्वान् रक्षिष्यतीति प्रचारयन्तस्ते धर्माद्दूरे एव गच्छन्ति। रुचीनां वैचित्र्याद् भवतु नाम विभिन्नाः सिद्धान्ताः, मानवस्य ध्येयस्तु एक एव। अतः न केवलमस्योपन्यासस्य अपि तु बौधिकविचारार्थं सूचितग्रन्थानां पठनं प्रत्येकं हिन्दुजनस्य अत्यावश्यकं वर्तते। यावदनुवादस्य प्रश्नः, अत्र हेगडेवर्यः सरलीकृतं संस्कृतं प्रयुङ्क्ते, यत्र महाननादरः पारम्परिकपण्डितानाम्। तथापि संस्कृतान्नितरां भीतानां संस्कृतेतरजनानां सरलसंस्कृताभ्यासिनां चापेक्षां मनसि निधाय स्वीकृता एषा शैली आगामिशतके कथितसंस्कृतस्य नवक्षितिजं निर्मापयिष्यति। अत्र प्रयुक्तनूतनशब्दानामर्थौ बन्धनीमध्यस्थौ दृश्यते। तैः सह प्रान्तीयभाषानुकृत-शब्दानां पर्यायाः दातव्याः आसन्। अत्राप्यनवधानान्मुद्रागतास्त्रुटयः काश्चन रसविघातकाः सन्ति।

2.27. पितामहपौत्रयोः लघुकथासङ्ग्रहः

असमीयसाहित्यकारेषु अन्यतमस्य लक्ष्मीनाथबेजवरुवावर्यस्य (१८६४ई.) सुप्रथिता बालसाहित्यकृतिः 'ककादेउता आरु नातिलरा' (१९१३ई.) इति अधुना शतात् समाभ्यः परं डा.नलिनीदेवीमिश्रया 'पितामहपौत्रयोः लघुकथासङ्ग्रहः' इति शीर्षकेन अनूदिता, साहित्येकादम्या च प्रकाशिता इति सन्तोषस्य विषयः। मूलग्रन्थे स्थापिताः कथाः साधुकथा इति पर्याये ख्याताः याः अधुना बालकथा-बोधकथा-नीतिकथानां वा पर्याये

ग्रहीतुं शक्याः। पौत्रं साधुं कर्तुकामेन पितामहेन एताः कथाः प्रोक्ता आसन्। मूललेखकस्य एवंविधाः तिस्रः सङ्ग्रहा आसन् – वुढीआईर् साधु, ककादेउता आरु नातिलरा, जोन्विरि इति। परन्तु प्रतिभाषं विद्यते एवं लोकसाहित्यापरपर्यायं बालसाहित्यमिति न विस्मरणीयम्। मया बालकाले पितृमुखात् श्रुताभिः कथाभिः क्वचिदेताः समानरूपतां यान्ति अपि। कदाचिद् एताः कथाः पूर्वोक्तेन कथाकारेण पुनरुक्ताः सङ्कलिताः वा स्युः।

अत्र ऊनत्रिंशत् कथाः सन्ति। मूलतः साधुकथानाम्ना आम्नाता एता अनुवादिकया आख्यानपदेन समाम्नाताः। कथानां विषये पुरोवाचि अनुवादिकया उक्तं यद् – एतेषु ग्रन्थकार आख्यानपदस्य कृते तत् समार्थकसाधुपदस्य व्यवहारं कृतवान्। सम्भवत आख्यानानां रमणीयत्वं प्रति लक्ष्यीकृत्यैव अभिधानमिदमुपन्यस्तम्। प्रायः प्रत्येकम् आख्याने पौत्रस्य नैतिकतायाः समृद्ध्यर्थं पितामहेन नीतिवचनं निधीयते। एतेषां नीतिवचनानां ज्ञानायावबोधाय वेति ग्रन्थोऽयं सुतरां सौकर्यमावहति। पुनश्च भाषायाः सावलीलत्वं, संस्कृततद्भवशब्दानां बाहुल्यम्, असमीयवाक्यबन्धानां प्राचुर्यादिकञ्च – इत्येते सर्वे ग्रन्थायास्मै उच्चकोटिमानं प्रयच्छन्ति।

द्वितीयकथा 'हस्ति-उलूकयोः कथा' इति लघुकाया अपि उत्तमा अस्ति। वृक्षस्य जले पतनेन वृक्षवासी उलूकः गजेन्द्रेण सौख्यं सम्पाद्य तं सरलीकृत्य निवसति। एकदा देवीवाहनं व्याघ्रः स्वप्ने गजेन्द्रशिरोभक्षणं दृष्ट्वा तत् कर्तुं महादेवस्याज्ञां लभते। तदा उलूकः स्वयोजनानुसारेण महादेवसमक्षं गत्वा निद्रां नाटयित्वा स्वप्नेन पार्वत्या सह विवाहं कृतवान्, प्रकृतं तद्विधातुं महादेवाज्ञां याचते। तद् भवितुं न शक्यते, व्याघ्रोऽपि खादितुं न शक्नोति इति निर्णयं श्रुत्वा मित्रे आनन्दिते अभवताम्।

2.28. भगवान् परशुरामः

पूज्यस्य कह्नैयालालमुन्शीवर्यस्य कथाकौशलं कं नाम सहृदयं नाह्लादयति? महाभारतीयां सार्वजनीनां कथामपि स स्वकौशलेन अर्वाचीनया उपन्यासशैल्या पुनरुक्त्वा तस्यां विश्वजनीनां भारतीयसंस्कृतिं पुनर्विन्यस्तवान् इति कथनं दुःसाहसं न स्यात्। को नाम कृष्णावतार-रसज्ञानं त्यक्त्वा आहारम् अन्विष्येत्? तस्य समानान्तरालेन स भगवान् परशुरामः, जय सोमनाथः इत्यादिकथाग्रन्थरचनेन स्थानीयरञ्जनेन सह सांस्कृतिक-परिवेशनिर्माणेन पाठकमनांसि अरञ्जयत्। अधुना भगवान् परशुरामः इति ग्रन्थः शान्तलावर्यया संस्कृतभाषया अनूदित इति सन्तोषस्य विषयः।

ग्रन्थोऽयं मूलकथाकारेण एव भागद्वयेन विभक्तः। प्रथमभागे जनमेजयः सर्पसत्रे महाभारतश्रवणात् परं वैशम्पायनमुखाद् इमां कथां शृणोति। अत्र ४३ भागाः सन्ति। अगस्त्याश्रमात् कथा प्रारब्धा। तात्कालिकस्य पौराणिकसमाजस्य वर्णनेन भरतवंशीयानां त्रित्सूनां दस्यूनाञ्च विवरणमित्थं प्रददाति कथाकारः- "नदीनां माता इति ख्यातायाः सरस्वत्याः दक्षिणे तीरे शूरः भरतवंशीयः महाराजः गाधिः वसति स्म। कञ्चित् कालं यावत् ऋचीकः तस्य अनुचराः च गाधेः अतिथयः आसन्। तत्समये ऋचीकः गाधेः पुत्र्या सत्यवत्या सह प्रणयं कृत्वा तस्याः पाणिग्रहणम् अकरोत्। कालान्तरे सत्यवती सुन्दरं दृढकायं सर्वलक्षणसम्पन्नं च तनयम् असूत। तस्य जमदग्निः इति नामकरणं कृतम्। समयेऽस्मिन् सत्यवत्याः माता अपि सत्पुत्रमेकं प्रसूतवती। ते विश्वरथः इति तम् आकारयन्। दैवांश-सम्भूतः इव तेजस्वी सः बालकः भरतवंशस्य उत्तराधिकारी आसीत्।"(पृ.३)

अगस्त्यशिष्यं भरतानामुत्तराधिकारिणं विश्वरथं तन्मित्रम् ऋक्षञ्च वन्दीकृत्य दस्यवः स्वदुर्गं नीतवन्तः। तत्र दस्युकन्यया उग्रया सह तस्य प्रणयः जातः। लोपामुद्रापि तत्र वन्दिनी जाता। तान् सर्वान् वलीकर्तुं प्रस्तुताः दस्यवः। तदा एव अगस्त्यादयः तत्र उपस्थाय तान् मोचितवन्तः, दस्युनायकं शम्बरं च हतवन्तः। दस्युकन्यया विश्वरथस्य सम्पर्कं विवाहं च विरुद्धमतमासीत् अगस्त्यस्य। सहसा गायत्रीमन्त्रस्य दर्शनं कृतवान् विश्वरथः, तस्य मन्त्रस्य जपेन सूर्यदेवं तोषयित्वा उग्राया आर्यत्वं घोषयितुं प्रार्थयत, "हे सवितृदेव! भूर्भुवस्वाधिपते! गाधिपुत्रम् अगस्त्यशिष्यं माम्, मां ब्रूहि, उग्रा आर्या स्त्री, उत न?" विश्वरथः अवनमय्य मुष्टिमितं कुशं गृहीत्वा तं कमण्डलूदके निमज्ज्य तेन उग्रायाः शरीरम् असिञ्चत्। ... ... पश्चिमदिगन्ते अस्तङ्गच्छतः भास्करस्य प्रभामण्डलं विश्वरथस्य प्रकोष्ठद्वारि स्पष्टम् अदृश्यत। स्वर्णप्रभया सर्वोऽपि स प्रदेशः उज्ज्वलः जातः। समाधिस्थ एव विश्वरथः पुनः अभाषत।... ... यथा प्राचीनमहामुनीनां मुखाद् उदात्तानुदात्तस्वरितस्वराघातसहिताः महामन्त्राः निःसृताः तया एव शैल्या विश्वरथस्य मुखाद् अपि महामन्त्रः निर्गतः... ... ओं भूर्भुवःस्वः, ओं तत्सवितुर्वरेण्यं, भर्गो देवस्य धीमहि, धियो यो नः प्रयोदयात्।... ... यथा यथा विश्वरथ एकैकं पदम् उच्चारितवान् तथा तथा उग्रा तानि पदानि पुनः उदचारयत्।... ... अस्मभ्यं प्रकाशं देहि। अस्माकं बुद्धिं विकासय। तेजः देहि। अस्माकं चित्तवृत्तिं पवित्रीकुरु।... ... द्वारि दृष्टं सूर्यबिम्बं विशालं

जातम्। क्रमेण तत् सप्तभिः अश्वैः युक्तस्य रथस्य आकृतिं प्राप्नोत्। तस्माद् रथात् स्वर्णमयशरीरः, असमानप्रभया शोभमानः दिव्याभरणभूषितश्च भास्करः अवातरत्। ... ... तावता घण्टानाद इव सुस्पष्टा वाणी श्रुता, "उग्रा आर्यस्त्री अस्ति। तस्याः अपि यज्ञोपवीतधारणं भवतु। इति। विश्वरथः पुनरपि तां गायत्रीमन्त्रम् उपदिशन् स्वहस्तेन गृहीतं यज्ञोपवीतं तस्याः कण्ठे अधारयत्।" (पृ.५१-५२)।

स्वयमाविर्भूतः सूर्य उग्राया आर्यत्वं घोषितवान्। तथापि ताम् अन्ये न स्वीकुर्वन्ति। सा पुत्रमपि प्रसूतवती। सहसा लोपामुद्रा सामाजिकविद्वेषाद् रक्षणाय पुत्रम् अजीगर्ताय समर्प्य तस्य मृतं पुत्रं स्वीकृत्य उग्रा मृतं पुत्रं जनितवती इति अरटत्। तदा पुनः अगस्त्यः लोपामुद्रां स्वीकृतवान्। स्वप्रणयवर्णनमित्थं करोति लोपामुद्रा, "मुनीश्वर! भवान् अन्तरङ्गे वृथा ज्वलति। सहैव मामपि ज्वालयति। अहम् असहाया काचिद् अबला इति भवता न ज्ञायते किम्? कश्चन काल आसीत्। तदा, एकाकिनी वाटिकासु भ्रमन्ती स्थास्यामि इति निश्चयं कृतवती आसम्। माता सरस्वतीनदी एका एव मम सहवर्तिनी आसीत्। तस्याः गानाय अहं यथोचितं वेणुं वादयामि स्म। विहगाः स्वपक्षताडनेन तालं वादयन्ति स्म। नद्याः जलकणाः इव मम केशाः वायौ डयन्ते स्म। मम हस्तपादं जलतरङ्गः इव नृत्यति स्म। अहम् आनन्दसागरे एव निमज्जामि स्म। परं मयि स्थिता सा मनोवृत्तिरेव अधुना सम्पूर्णम् अदृश्यतां गता। मम गान-नर्तन-मन्दहासादिकं भवत्तः ऋते अर्थशून्यं भवति।" (पृ.६९)।

भ्रातरि अगस्त्ये रुष्टः वसिष्ठः वनं गत्वा कठोरं तपः साधितवान्। परस्परं वैमनस्यं वर्धितम्। दस्यूनां पुरोहितः भैरव उग्रां हतवान्। दिवोदासस्य पुत्रेण सुदासेन अपि विरोधः कृतः। रुष्टेन अग्निदेवेन ग्रामाः दग्धाः। कर्तव्यबुद्ध्या विश्वरथः तेषां ग्रामवासिनां सेवामारब्धवान्। अन्ततो वैमनस्याद् नितरां विरक्तः विश्वरथः पर्वतोपरि आरुह्य देवान् प्रार्थितवान्। साम्राज्यं त्यक्त्वा स विश्वामित्रत्वेन परिणतः त्रित्सूनां राजगुरुपदं स्वीकृतवान्। पञ्चदशवर्षाणामनन्तरं जमदग्नेः विश्वामित्रस्य आश्रमयोः वर्णनं वर्तते यत्र भगवान् परशुरामः जातः। तस्य बाल्यकाले वृद्धेन चायमानेन सह अश्वचालनं, पठनं, चायमानस्य अन्वेषणेन गृहात् पलायनम्, अपरिचितैः बन्धनम्, अश्वस्य मरणम्, उग्रकालाय बलिरूपेण तस्य बन्दीकरणं, ततः पलाय्य नदीतरणसमये बन्दिना शुनःशेफेन मेलनं च वर्णितानि। अयं

शुनःशेफः खलु विश्वरथपुत्रः अजीगर्ताय प्रदत्त आसीत्। परन्तु शप्तः पानमत्तश्च अजीगर्त इतस्ततः अटति स्म। तदर्थं हरिश्चन्द्रस्य यज्ञे बलिरूपेण पुत्रं विक्रीय तस्य हननाय अपि स्वयं सिद्धो जातः। तत्र एव विश्वामित्रः ज्ञातवान् शुनःशेफः तस्य पुत्रः इति। यूपस्तम्भे बद्धस्य तस्य मुखात् मन्त्राः निर्गताः। तेन सन्तुष्टः वरुणः तं त्यक्तवान्। विश्वामित्रः स्वपदं त्यक्तवान्। हर्यश्वः वार्ताम् आनयत् दस्युराजकुमारेण तस्य स्नुषा अपहृता। सुदासेन स्वभगिन्याः विवाहार्थं निमन्त्रितः हैहयाधिपतिः अर्जुनः तदर्थमाक्रम्य रामं, लोमां, रोहिणीं च वन्दीकृतवान्। अग्रे लोमां स्वदेशं नेतुं सेनापतिमादिष्टवान्। तां शप्तान् सौराष्ट्रान् च उद्धर्तुं रामः सौराष्ट्रं प्रस्थितवान्। अत्र प्रथमभागस्य कथा समाप्ता।

यावदनुवादस्य प्रश्नः, श्रीमती शान्तलावर्या वाचकानां सुखपाठार्थं सन्धिसमासरहितां सरलां शैलीं स्व्यकरोदिति प्रतिभाति। पुनः अनुवादः हिन्दीमूलात् न जात इति तथा प्रभावकारी नास्ति इति सत्यं परन्तु संस्कृतमर्यादया विभूषितः कामपि अपरामात्रां योजयति। क्वचित् कन्नडभाषाप्रभावः दृश्यते।

2.29. महाप्रस्थानम्

1982ईशवीयसंवत्सरे माटुम्बुकुञ्जुकुट्टन्महोदयेन मालायलमभाषया रचितस्य केरलसाहित्येकादम्याः विशिष्टपुरस्कारेण सभाजितस्य उपन्यासस्य संस्कृतानुवादोऽस्ति महाप्रस्थानमिति। अशोकन् पुरुनाटुकुरामहोदयः एनं भारतमुद्रापत्रिकायां पञ्चवर्षाणि क्रमशः प्रकाश्य शेषे पुस्तकरूपेण प्रकाशितवान्। कवेः अश्वघोषस्य बुद्धचरित-सौन्दनानन्दाभ्यां परं संस्कृते बौद्धसाहित्यस्य इदमपूर्वं योगदानमिति वक्तुं शक्यते।

उपन्यासस्य नामकरणात् ज्ञायते कश्चन संसारजञ्जालजाले सन्तप्तः, परमं सत्यं मृत्युं सम्मुखीकृत्य प्रस्थितः। अयं तर्हि गौतमबुद्ध एव स्यात्। अयमुपन्यासः मायादेवी-शुद्धोदनयोर्विवाहात् प्रारभ्यते। जन्मनः परं मातृवियोगः, सुखेन पालयितुं पितुः यत्नः, गुरुमुखात्सत्यश्रवणञ्च बाल्याद् गौतमं सत्यपथे चालयन्ति। ततो देवदत्तस्य उपाख्यानमागच्छति। गौतमः शरविद्धं हंसं शुश्रूषया स्वस्थीकृत्य मुक्ताकाशे उड्डापयति। अष्टादशवयःक्रमे स वीर्यशुल्केन यशोधारां परिणीतवान्। एकदा नगरभ्रमणसमये स जराव्याधिग्रस्तमरणशोकाकुलान् सांसारिकान् दृष्ट्वा नितरां दुःखितः सन्न्यासिनः सन्दर्शनेन प्रफुल्लचित्तो गभीरे निशीथे सुन्दरीं पत्नीं त्यक्त्वा

प्रव्रजति। बिम्बिसारस्य यज्ञे पशुबलिं निषेधति, पुत्रमरणदुःखितां मातरं बोधयति, कठोरतपश्चरणेन बुद्धत्वं प्राप्नोति, सुजातायाः नैवेद्यं स्वीकरोति च। अत्र वर्णितपात्रेषु गौतमस्य चरित्रं मुख्यस्थानं भजति। सदा प्रशान्तः, जनसमाधाने निपुणोऽयम् अन्ततोगत्वा जीवनजिज्ञासायां सफलो भवति। राजा शुद्धोदनः पत्नीवियोगं, पुत्रविच्छेदञ्च विचिन्त्य पौत्रस्य बाल्यचापल्येन दुःखितो भवति। पुत्रस्य स्वागताय रचिते उत्सवे भिक्षुरूपेण समागच्छति गौतमः। तदर्थं नितरां खिन्नः शुद्धोदनः अन्तिमपर्याये बौद्धधर्मं स्वीकरोति। गौतमपत्नी यशोधारा द्वादशवर्षाणि सुखसंसारं विरचय्य आजीवनं प्रतीक्षते पुत्रस्य परिपालनेन सह। ''यशोधारा न हतभाग्या। मांसस्य मांसम्, अस्थिनः अस्थी, आत्मनः आत्मानं च मह्यं प्रदायैव गतवान् खलु ..'' इत्येवं विलपन्ती सा आत्मानं द्रढयति स्म।

समर्थोऽनुवादकोऽत्र क्वचिद् भावानुवादं, नाममात्रानुवादम् अनुपदानुवादं मूलादप्युत्कृष्टमनुवादं वा प्रस्तौति। यथा- कपिलवस्तुनो युवराजस्य वदने कोऽपि मृदुमन्दहासः प्रकटोऽभवत्। (कपिलवस्तुविले इलमुरत्तम्पुराटे चुण्टिल ओरिलं पुञ्चिरिमुखं काणिच्चु।) जातककथायां राहुलस्य जन्मनः परं महाभिनिष्क्रमणं वर्णितम्। अत्र तु गर्भिणीं पत्नीमेव त्यजति इति कथाकारस्य संयोजना। तथापि 232 पुटात्मकस्य महत उपन्यासस्य अनुवादो न सुकर इति धन्यवादार्हो भारतमुद्राकारः अशोकन्वर्यः।

2.30. मृत्युः चन्द्रमसः

डा.गोकुलानन्दमहापात्रलिखितं ''चन्द्रर मृत्यु'' इति ओडियाभाषा-निबद्धस्य मुख्यतया कल्पविज्ञानात्मकस्य (Science Fiction) उपन्यासस्य ''मृत्युः चन्द्रमसः'' इति शीर्षकेण डॉ.पराम्वाश्रीयोगमायया कृतः संस्कृतानुवादः। अस्योपन्यासस्यानुवादः 2007-8 वर्षयोः संस्कृतसम्भाषणसन्देश इति प्रसिद्धे संस्कृतमासिके धारावाहिनीरूपेण प्रकाशितः, अनन्तरं 2009 संवत्सरे पुस्तकरूपेण प्रकाशितः। भिन्नस्वादस्य अस्मिन् कथाग्रन्थे मूललेखकः चातुर्येण वैज्ञानिकतथ्यानि योजयति। यथा कश्चन पृथिवीवासी चन्द्रपृष्ठं गत्वा कथं चलिष्यति, चन्द्रवासी च कथं जीवनं यापयेत् पृथिवीपृष्ठे। ग्रहोपग्रहयोः आकर्षणशक्तेः भिन्नत्वात् के के दोषाः गुणाः च भविष्यन्ति इति सम्यक् निरूपितं कथाकारेण। उभयोः वैवाहिकसम्बन्धेन को विकारः स्यात्, किं च तस्य समाधानं स्यादिति

प्रतिपादयितुकामः कथाकारः उत्कलावर्तेन सह शाङ्गरीनायाः विवाहं, पुत्रलाभं च वर्णयति। उत्कलावर्तस्य विशेषप्रशिक्षणमपि वर्णयति। ग्रह-प्रतिग्रहाणां वस्तु-प्रतिवस्तूनां च वर्णनेन सह महाकाशे कथं वयोवृद्धिः न भवति, उत्कलावर्तस्य स्वागतं तस्य शततमपौत्रः करोतीति वर्णयता तेन महाकाशाभियानमपि स्वकल्पनया सङ्कल्प्य सम्यक् विस्तारयति। तदा 1969 संवत्सरे अमेरिका-ऋष्-भारतदेशैः कृतो नवसंरम्भः अप्यत्र वर्णितः। किं बहुना, सम्पर्कभाषारूपेण अत्र संस्कृतभाषा एव स्वीकृता वर्तते कथाकारेण। अपि च अयमनुवादः बहुत्र भावात्मकः संक्षिप्तीकृतश्च वर्तते।

अमेरिकादेशस्य न्यूयर्कनगरे वाराणसीनिवासी वेदज्ञः रमेशः कोलम्बियाविश्वविद्यालयस्य वनस्पतिविज्ञानविभागे गवेषणारतः सहसा कुत्रापि गतवान् इति तस्य कारणं वदति सेण्डीलिजामेरियादिस्वमित्रेभ्यः। साण्डोफनगरे तस्य सखा वेङ्कटरमणः सहसा विलुप्तः। तस्य अन्वेषणाय गतः सः ज्ञातवान्- लासभैगास् नगरसमीपे मरुप्रदेशे काचित् अत्याश्चर्यकरी घटना जाता। कुत्रचित् आमेरिकायाम् एकः अद्भुतः अपूर्वः जनः आगतः, यस्य वेशभूषा पुरातनी, भाषा तु प्राचीनसंस्कृतात्मिका। तां कोऽपि नावगच्छति। कदाचित् पञ्चसहस्रवर्षेभ्यः पूर्वं सैन्धवोपत्यकायामाधुनिके आफगानिस्थानप्रदेशे निवसन् सः कार्याभावात् मोहेञ्जोदारनगरे श्रमिकभावेन कार्यं कृतवान्। तस्य भाषा वैदिकसंस्कृतेन साम्यं धत्ते। तस्य प्रकृतं परिचयं ज्ञातुं सर्वकारस्य इच्छावशात् देशस्य विभिन्न-प्रान्तेभ्यः संस्कृतज्ञाः गोपनेन आनीताः। रमेशः यदा तेन सह वार्तालापं कृतवान् तदा रमेशाय एका अपूर्वा कथा श्राविता।

तस्य जनस्य नाम तु उत्कलावर्तः। सः जनः न तु विशंतिशताब्द्यां जातः, स खलु एकः समयपरिक्रामकः (Time Traveler), यस्य जन्म तु पञ्चसहस्रवर्षेभ्यः प्राक् अभवत्। अपि च ध्यानं दातव्यं यत् - मूललेखकः उत्कलप्रदेशीयः, अतः प्रधानचरित्रस्य नाम उत्कलावर्तः। उत्कलावर्तस्तु एको निम्नवर्गीयो जन आसीत्, यस्य निवासः मोहेञ्जोदारोनगरे आसीत्। कालक्रमेण जगतः परिवर्तमाना चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः- इति स्वप्नवासवदत्तोक्तमिव तस्य जीवनं सहसा परिवर्तितं जातम्। तस्य समक्षमेकं वायुयानमवातरत्। ततः निर्गतौ शाङ्गरीनाकेवलप्रायौ इति द्वौ चन्द्रपृष्ठवासिनौ। प्राचीनकाले यदा चन्द्रसभ्यतायाः जलवाय्वोः स्वल्पता जाता तदा पृथिव्यां जलवाय्वोः समृद्धता तथा उन्नतसभ्यता अत्र सूचिता।

अपि च ग्रन्थकारेणात्र पृथिव्याः भविष्यत्कालस्य करालस्थितेरपि प्रकाशः कृतः। जलवाय्वोः अभावात् चन्द्रवासिनः राष्ट्रदूतौ शार्ङ्गरीनाकेवलप्रायौ इति प्रेषितवन्तः। तेषामस्ति महाकाशयानम्। जलवाय्वोः सङ्ग्रहणाय राष्ट्रदूतौ महेञ्जोदारनगरस्य प्रधानमुद्दिश्य पत्रमेकं प्रेषितवन्तौ। पत्रस्य भाषा तु संस्कृतम् इत्युल्लेखः उत्कलावर्तेण कृतः अस्ति। अद्यापि सिन्धु-सभ्यतायाः पाठोद्धारः न भवति, ननु सा भाषा तु संस्कृतं चेदपि लिपिस्तु भिन्ना। शार्ङ्गरीनाकेवलप्रायौ वायुं कठिनीकृत्य चन्द्रपृष्ठं नेतुमागतौ। देशस्य विशिष्टजनैः सह परामृश्य नगरपालः तदर्थम् अनुमन्यते। वर्षद्वयात् परं ताभ्यां सह उत्कलावर्तः अपि प्रस्थितः। नवजीवनस्य कृते लम्फदानकाले अर्थात् पृथिवीं त्यक्त्वा चन्द्राभिमुखं गच्छति काले गवाक्षात् अवनीं दृष्ट्वा तेन उक्तम्- मे नगरं सुन्दरम्। अत्र ग्रन्थकारस्य मातृभूमिप्रीतिः प्रकाशिता। उक्तं खलू- जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। अग्रे कथाकारः शार्ङ्गरीनामुखेन पृथिव्यां सूर्योदयस्य शोभां वर्णयति। यथा-

मया लक्षितं- शार्ङ्गरीना अपि दिग्वलयं पश्यन्ती उषसः अपूर्वेण सौन्दर्येण विमोहिता इव जाता अस्ति इति। पूर्वदिग्वलयं पश्यन्ती एव सा माम् उक्तवती- "पृथिव्याम् एषः सूर्योदयः अस्ताचलगमनं च मह्यम् अतीव रोचते उत्कलावर्त। दृश्यताम्, अहो शोभाकरः सः प्राचीदिग्वलयः। सूर्योदयस्य सूर्यास्तस्य च सौन्दर्यं भवन्तः प्रत्यहं द्रष्टुम् अर्हन्ति। तादृशः सुयोगः अस्माभिः चन्द्रलोके प्रतिदिनं न प्राप्यते। चन्द्रलोके एषः सूर्योदयः मासे एकवारं भवति। सूर्यास्तः अपि तथैव। वस्तुतः पृथिव्याः अधिवासिनः एव भाग्यशालिनः।(पृ.47)

उत्कटजलाभावस्य भयङ्करं वर्णनमपि विज्ञानिना कथाकारेण कृतम्- दीर्घं निःश्वस्य शार्ङ्गरीना पुनः उक्तवती- एषः जलाभावः अद्य अस्माकं सभ्यतायाः भविष्यतः भित्तौ कुठाराघाताय इव। चन्द्रमण्डलात् अस्याः सभ्यतायाः मनुष्यसमाजस्य च लोपः सम्भाव्यते यत् तस्य कारणम् एषः जलवाय्वोः अभावः एव। अत्र दृश्यताम् उत्कलावर्तः। चन्द्रलोकस्य बृहत्तमः सागरः तारापीठः। सहस्रयोजनव्याप्तियुते एतस्मिन् कुत्रापि बिन्दुमात्रम् अपि जलं नास्ति।(पृ.62)

चन्द्रलोकं सम्प्राप्य उत्कलावर्तेन चन्द्रशोभा वर्णिता। निरक्षरः सः जनः स्वचेष्टया विश्वविद्यालयस्य प्रवेशिकापरीक्षायाम् उत्तीर्णः सन् पाठं गृहीतवान्। शार्ङ्गरीनायाः भगिनी शाङ्गरिना। तया सह उत्कलावर्तः

प्रेमपाशेन बद्धः जातः। गभीरासक्तिवशात् सम्पर्कस्य विच्छेदे स्वल्पकालः अपेक्षते। परन्तु उत्कलावर्तस्य महाकाशाभिगमनात् पूर्वमेव शार्ङ्गरिना मातृसुखम् ईप्सितवती। तयोक्तम्- भवतु सः राक्षसपुत्रः। अहं तस्य जननी। ...अहं तस्य मुखदर्शनेन एव वा मातृत्वस्य गौरवम् अनुभविष्यामि। (पृ.110)

यथैव लेखकेन मातृहृदयस्य वर्णनं कृतं तेथैव दक्षतया महाकाशगमनं विषयमधिकृत्य अनेकानि तथ्यानि वर्णितानि। परन्तु उत्कलावर्तस्य अभियानं सफलं न जातम्। सः चन्द्रपृष्ठं प्रत्यागतः। आलोकगतितुल्यगमनात् उत्कलावर्तस्य जीवने स्वल्पकालः तदा चन्द्रे अधिककालः अतिवाहितः। अत्र पदार्थविज्ञानस्य एका धारणा अत्र अस्ति। तथा पुनः Quantum Mechanics इत्यस्य विषयस्य निर्देशः अस्ति।

एतावदेव कथापरम्परा सुन्दरी। परन्तु तस्मात् परं रीनायाः मृत्योः परं तस्याः स्थाने अन्यायाः एकस्याः नार्याः प्रवेशः अभवत् उत्कलावर्तस्य जीवने। पुनः अभियानं, पुनः सन्तानस्य इच्छा, पुनः समस्या इत्यादि। तर्हि अयमंशः अतिरिक्तः इति वक्तुं शक्यते। परन्तु अस्मिन् अंशे एव आधुनिक-चिकित्साविज्ञानस्य प्रयुक्तेः उल्लेखः अस्ति। ततः मातृभूमिं पुनः आगतवान् उत्कलावर्तः, पञ्चसहस्रवर्षेभ्यः परम्। अन्तिमे एवं तु वक्तुं शक्यते यत्, यत्र कुत्रापि अवाञ्छिताः अंशाः सन्ति, ते कल्पविज्ञानग्रन्थेषु तु अन्यतमवाञ्चितांशाः इति वक्तुं शक्यते।

अवशिष्टाः वैज्ञानिकाः तम् अमेरिकायामवतार्य मङ्गलग्रहं प्रति प्रस्थिताः। ततः सः रमेशादिभ्यः स्वजीवनकथां वाचयति। ततः सामरिकप्रमुखास्तं वन्दिनं कारयन्ति। सहसा ततः अपि सः अन्तर्हितः। वेङ्कटरमणः अपहृतः, देशपाण्डेयस्य विमानमपहृतम्, रमेशश्च बन्धादेशेन निगृहीतः। एवमवसितेयं वैज्ञानिकी कथा।

मूलतः 217 पुटोऽयं 139 पुटैरेव अनूदितः। मूले यत्र द्वाविंशतिभागाः आसन् अनुवादे विंशतिभागाः एव सन्ति। विंशैकविंशद्वाविंशभागाः अतिसंक्षेपेण विंशभागे एव एकत्रीकृताः। कदाचित् दीर्घकथानकं सम्पादकः सङ्क्षिप्तीकृतवान् इति प्रतीयते। प्रथममेव अनुच्छेदं पश्यामस्तावत्- सेण्ट्राल पार्क, निउयर्क ... नभश्चुम्बी प्रासादभरा चिर धवलायित निउयर्क नगरीर छाति उपरे एहि पार्कटि गढि उठिछि, अतिष्ठ नगरवासीङ्क हृदयरु अवसन्नता दूर करि प्रफुल्लता, सतेजता, सरसतार अवारित मन्दाकिनी स्रोत वुहाइ देवा पाइं। आमेरिका आसिला दिनरु एहि

उद्यानटि मो जीवनर चलणि सहित ओतप्रोत भावरे जडित होइपडिछि। निउयर्क भलि धनधान्यभरा नगरीरे येउंठि इञ्चे जमिर मूल्य लक्ष लक्ष टङ्का हिसावरे गणायाए, सेठि एडे वड़ विराट उद्यान मुक्त सुशीतल वायुप्रवाह छुटाइवा पाइं केमिति सृष्टि हेला मुं वेले वेले भावि किछि ठिक् करि पारेनि।(ओडियामूलम्,पृ.1) इति ओडियामूलांशं निम्नवाक्येन अनुवदति- केन्द्रीयम् उद्यानम्। न्यूयार्कनगरस्य मध्यभागे विद्यामानम् उद्यानम् एतत्। आ अमेरिकाप्राप्तिदिनतः उद्यानम् एतत् मम जीवनेन सम्बद्धम् अस्ति विशेषतः।(पृ.1)

2.31. मेघमल्लारः

मेघमल्लारो नाम विभूतिभूषणवन्द्योपाध्यायस्य कथासङ्ग्रहः १९३१ ईशवीयाब्दे प्रकाशितः। १९२१-१९३० ईसवीयाब्दं यावदेताः कथा रचिताः प्रकाशिताश्च। सङ्ग्रहस्य प्रथमा कथा 'मेघमल्लार' इति। तदनुसारेण सङ्ग्रहस्य नामकरणं जातम्। अस्मिन् सङ्ग्रहे दश कथा वर्तन्ते। मेघमल्लारः, नास्तिकः, उमा, चण्डीवधूटी, नववृन्दावनम्, अभिशप्तम्, बालायाः कृत्यम्, शकटम्, पूतिकामञ्चः, उपेक्षिता इति। मूललेखकस्य भाषाशैली अन्यपदपरिवर्तनसहा नास्तीति अनुवादकाठिन्यमित्थं निवेदितमनुसर्जकेन-, "विभूतिभूषणस्य लेखे वङ्गीयसंस्कृतिः भृशम् उपतिष्ठते। विविधवृक्षविहगादीनां नामानि, वङ्गदेशस्य भौगोलिकस्थितिः उत्सवादीनि च पुनः पुनः कथासु आगच्छन्ति। सर्वत्र तेषां यथायथसंस्कृतनामादिकं- विशेषतः वृक्षगुल्मादीनाम्- अज्ञानवशाद् अनूदितुं न शक्तानि। तत्र प्रकारान्तरम् आश्रितम्। अन्यच्च अत्र कथासु यत्र यत्र मासादीनां नामानि आगच्छन्ति तत्र मासाः सौरमानानुसारं ग्राह्याः। वङ्गीययुगगणना सौरमानेन भवति, किन्तु मासानां नामानि वैशाखज्यैष्ठादिक्रमेण प्रचलन्ति। यथा सौरमेषमासः अत्र वैशाखनाम्ना अभिधीयते। एतत् मनसिकृत्य पठन्तु पाठका इत्यनुरुन्धे।"(भूमिका)॥

'मेघमल्लार' इति प्रथमकथायां बौद्धयुग-तान्त्रिकयुगयोः सन्धिक्षणं प्रदर्शितम्। कथानायकः प्रद्युम्नो बौद्धविहारे पठति, मेघमल्लाररागे च पारदर्शी वर्तते। तान्त्रिकगुणाढ्यस्य च्छलेन मेघमल्लारेण सरस्वत्या वन्दीकरणे स साहाय्यं करोति। पुनः विशिष्टमन्त्रप्रयोगेण देव्या बन्धनमोचनं विधाय आजीवनप्रस्तरत्वं स्वीकरोति। तत्प्रियायाः कारुण्यमपि पाठकनेत्रे आर्द्रीकरोति- "कुमारश्रेण्याः विहारे आचार्यस्य शीलभद्रस्य सकाशे काचन स्त्री अल्पीयसि वयसि दीक्षाम् अगृह्णात्। तस्याः नाम सुनन्दा। .....

ज्योत्स्नारात्रौ विहारस्य निर्जनपाषाणालिन्दे स्थित्वा सा स्वमनसा प्रायः एव किमपि चिन्तयति स्म। निशीथे क्षेत्रे ज्योत्स्नाजालं कर्तयित्वा आगच्छन्तं कञ्चन दृष्ट्वा सा निर्निमेषदृष्ट्या पश्यति स्म। ... तस्मिन् अन्धकारे अर्धरात्रौ जनहीने पर्वते वंशानां मध्ये झञ्झावातः प्रविश्य केवलं मेघमल्लारं वादयति..... प्रातः उत्थाय रात्रेः स्वप्नः इति विचिन्त्य आश्चर्या भवति स्म– कुत्र गिरिः, कुत्र वेतसवनं, कस्य भग्नः विग्रहः, कस्य इमे अर्थहीनाः दुःस्वप्नाः!" (पृ.१६-१७)॥

'नास्तिकः' इति कथायां कथाकारः सम्यक् प्रतिपादयति कथं विदितसकलशास्त्रः लोकनाथो जीवनजिज्ञासायां पराजितो भूत्वा अन्येभ्य ऋषिभ्यः समाधानमिच्छति, मायातो दूरं गच्छन् तामेव स्मरति, ज्ञानेन युक्तिः लभ्यते– नात्मा इति। परस्परविवदमानानां शास्त्राणां शब्दचित्रं दर्शनीयमेव- "तदा तदा अवसन्नः ग्रीष्मापराह्णः ओष्णवायुना सद्यःफुल्लनिम्बपुष्पाणां परागं सम्मिश्र्य कञ्चन अपूर्वं लोकम् असृजत् - तत्र शुक्लकेशः आर्यभट्टः शिष्यं शाकटायनं नीलशून्ये सुधाखण्डेन ग्रहनक्षत्राणां संस्थानम् उपादिशत्, वन्यविहगानां कूजनम् अविगणय्य यास्कः भाषातत्त्वम् आलोचयत्, दुर्बोध्यज्यामितिकसमस्याम् अनधिगच्छन् कुञ्चितललाटः पराशरः अन्यमनस्कां स्वदृष्टिम् अनन्यमनसा पुरःस्थिते वल्मीकस्तूपे आबध्य अतिष्ठत् - सहसा कल्पनालोकाद् बहिः आगतस्य लोकनाथस्य कृते एतद् एव आश्चर्यजनकं भवति स्म यत् कथं स भाषातत्त्वम् आलोचयतः यास्कस्य मुखे पुरः नद्यां तरतः हंसस्य मुखस्य सादृश्यं कल्पयति स्म इति।"(पृ.२०)॥

'उमा' इति कथायां लेखकेन प्रोषितभर्तृकाया उमायाः पत्युः प्रथमपत्न्या अग्रजाय प्रवाहिता स्नेहधारा रेखाङ्किता दृश्यते। उत्तमभोज्यार्थं कठिनं परिश्रान्तया तया भोज्यं विना धनं सञ्चित्य जीवनस्य अन्तिमेऽपि क्षणे अग्रजस्य भाविपत्न्यै उपायनीकर्तुं रजतकण्टकानि क्रीतानि इति पठता एव हृदयं पूर्यते। श्मशानयात्रायामपि प्रथमदाम्पत्ये पत्या लिखितानि पत्राणि सहैव नयति। सुन्दरं समापनं कथायाः–

'चण्डीवधूटी' कथायां चतुर्भार्यावतः चतुर्धुरिणः तृतीया ग्रामवधूटी, क्षेत्रे पूज्यमाना चण्डीवधूटी, निर्जनग्राम्यक्षेत्रे अवतीर्णा रात्रिवधूटी युगपत् स्तुता। लघ्वीयम् अन्याः कथा इव सरसा नास्ति।

वृन्दावनं प्रस्थितः कर्णपुरो मार्गे अनाथं नीलमणिं प्राप्य यदा विश्वासच्युतः संसारे प्रवर्तते तदा पितृवचने विश्वस्य नीलमणिः ग्रामस्थोऽपि

वृन्दावनविहारिणमपश्यद् इत्युक्तमया शैल्या निरूपितं 'नववृन्दावन'मिति कथायाम्।

'अभिशप्त'मिति कथायां त्रिशतवर्षपुरातनी कथा निरूपिता। तदङ्गतया तदानीन्तनानां जलदस्यूनां, परस्परं युध्यमानानां मित्राणाम्, अविश्वस्तराजपरिवाराणां कथा वर्णिता। अत्र चञ्चलराय-नरनारायणयोः युद्धं, नरनारायणस्य विजयः, परन्तु कमपि जनं दुर्गे अप्राप्य प्रत्यागमनं, भूमिगतरुद्धद्वारप्रकोष्ठे श्वासकष्टेन तेषां मरणम्, उद्धारार्थं नौयातृभ्यः प्रार्थनादिकं वर्ण्यते। किञ्चित् फ्ल्यासव्याक्-तन्त्रमाश्रित्य तेन जलमार्गेण गच्छतां जनानां वार्तालापेन कथाया आरम्भो भवति। अपि च चञ्चलरायस्य पत्नी लक्ष्मीः यदा श्वशुरस्य रक्षणाय नरनारायणं प्रार्थयते, तां श्वशुर एव मारयति। दीर्घाऽपि सुन्दरवनस्य इयं कथा रुचिपूर्णा ऐतिह्यमूला च वर्तते।

'बालायाः कृत्यम्' इति कथायाम् उमाया दौष्ट्यं, भोजने अनाग्रहं, भ्रमणेच्छां, महानगरीयं धौर्त्यं, चौर्यं, बालापहरणञ्च सम्यक् निरूपयति कथाकारः। 'शकटं' कथायां रुग्णस्य, अकाले प्रस्थितस्य, बालकस्य नरोः अदम्यक्रीडाप्रियताया अन्येषामीर्ष्यांया असहयोगितायाः प्रतीकमस्ति शकटम्। बन्धवः केचन अतीतमपि तं न विस्मरन्ति-। 'पूतिकामञ्चः' अस्य सङ्ग्रहस्य सर्वोत्तमा कथा इति वक्तुं शक्यते– यत्र कन्याबहुले दरिद्रे परिवारेऽपि पितृमातृपुत्रीणां मुग्धजीवनस्य स्फीतान् लावण्यपूर्णान् सुखदुःखहासविलासान् अक्षतरूपेण संरक्षति कथाकारः। विभूतिभूषणस्य रचनासु वङ्गीयसंस्कृतिः, विविधवृक्षविहगादीनां नामानि, वङ्गदेशस्य उत्सवाचाराः, लौकिकप्रथाश्च पुनः पुनः निरूपिताः सन्ति। अतः तेषां संस्कृतानुवादे नूनं विद्यते अनुवादकस्य महती भूमिका। अस्मिन् कथासङ्ग्रहे 'पूतिकामञ्च' (वङ्गभाषायां पुँइमाचा) इत्यभिधेयकथायां वङ्गदेशस्य ग्राम्यसंस्कृतिः चित्रिता। दरिद्रब्राह्मणस्य सहायहरेः मुखरा पत्नी अन्नपूर्णा, तयोः दुहितृत्रयम्– क्षान्तिः, पुटिः राधा चेत्येता आधारीकृत्य क्षुद्रबालिकाया भोजनप्रियता, मातुः क्रुद्धतिरस्कारभयात् तस्याः संवरणम्, विवाहादनन्तरं तस्या अकालमरणमित्यादिविषया वर्णिताः।

'उपेक्षिता' (विभूतिभूषणस्य आद्यकथा) इति कथायां निकटसम्पर्कं विनापि काचित् मुग्धा ग्राम्यमहिला अपरिचिते तस्मिन् भ्रातृत्वमाविष्करोति यां कथमपि कथानायिका विमला न विस्मरति। अत्र रवीन्द्रनाथस्य पोष्टमाष्टरकथायाः साम्यं किञ्चित् कदाचित् आधिक्यं वा प्रतीयते। रवीन्द्रस्य

कथानायकः क्षणाय मूर्त्तं दुःखं साक्षात्करोति। परन्तु विभूतिभूषणस्य कथानायकः कथमपि तां मायामधुरां पल्लवधूटीं पल्लीलक्ष्मीं वा न विस्मरति। यथा- "वङ्गदेशस्य एकस्मिन् स्वल्पजनविशिष्टे ग्रामे जीर्णं प्रस्तरमयं पुष्करघट्टम् आलम्ब्य आगच्छति काचन आर्द्रवसना तरुणी पल्लीवधूटी!..... मृन्मयमार्गस्य वक्षसि लक्ष्म्याः चरणचिह्नम् इव तस्य जलसिक्तपादयोः रेखाः लिखिताः।..... तिमिराच्छन्नसन्ध्यायां मार्गपार्श्वे वेणुकुञ्जे पेचकः चीत्करोति। तस्याः सस्नेहपूतहृदयं बहिर्जगद्विषये निश्चिन्तानिश्चयतया पूर्णम्। आम्रपनसादिवनस्य शिरसः उपरितने नीले नभसि द्वित्राणि नक्षत्राणि तस्याः सरलायाः स्नेहदुर्बलायाः वधूट्याः उपरि सस्नेहकृपादृष्टिं क्षिपन्ति। ततः एकस्मिन् शान्ते अङ्गणे तुलसीमञ्चमूले स्नेहास्पदस्य मङ्गलाकाङ्क्षिणी सा काचन प्रणामनिरता मातृमूर्तिः, करुणामिश्रा, अश्रुसम्मिश्रा च।..... अहे लक्ष्मि, अहे स्नेहमयि पल्लीवधु, त्वम् अद्य अपि वर्तसे किम्? सुदीर्घाणां पञ्चविंशतेः वर्षाणाम् अनन्तरम् अद्य अपि त्वं तथा एव भग्ने पुष्करघट्टे जलम् आहर्तुं गच्छसि किम्? अद्य बहूनि वर्षाणि अभवन् तस्याः घटनायाः, जीवने बहु किमपि दृष्टं, बहु किमपि प्राप्तम्..... अद्य बहुदिनेभ्यः परं पुनः त्वं स्मृता..... त्वां पुनः द्रष्टुं महान् अभिलाषः भवति अग्रजे, त्वम् अद्य वर्तसे किम्? स्मरामि, बहुदूरे एकं कुटीरं, अनुज्ज्वलः मृद्दीपप्रकाशः..... मौनी सन्ध्या..... नीरवाणि वेदनाश्रूणि..... शान्तं सौन्दर्यं स्नेहभरितं रक्तिमं शाट्यञ्चलम्..... आरवसमुद्रस्य सलिले तथा करुणं सूर्यास्तमनम् इतः पूर्वं न अभूत्!" (पृ.112)।

यथा मूलकथाकारस्य अयमाद्यसङ्ग्रहस्तथैव अनुसर्जकस्यापि अयं प्रथमसङ्ग्रहः नवीनाः सम्भावनाः सृजति। भारतभावनाः पुरस्कृत्य अत्रापि प्रेरणा लभ्यते देशस्य जले, स्थले, आकाशे, वन्दिन्यां सरस्वत्याम्, अभिशप्तायाम् उमायां, पल्लीवधूट्यां प्रजावत्यां, श्वशुरस्य रक्षार्थं नरनारायणं प्रार्थयन्त्यां पुत्रवध्वां लक्ष्म्यां, दरिद्रपरिवारस्य पूतिकामञ्चे वा प्रेममयभावनामाविष्कर्त्तुम्। भारतीयग्रामनगरपल्लीप्रकृतीनां सफलरूपकारस्य विभूतिभूषणस्य कथासमग्रस्य अनुवादाय अलमयमनुवादको विमलं यशः प्राप्नोतु इति सम्भावयामः।

2.32. याज्ञसेनी

अर्वाचीनसंस्कृतविद्वत्सु प्रथितयशाः कविः कथाकारः गवेषकश्च श्रीभागीरथिनन्दः यथा मौलकसाहित्यसर्जने वटुः, तथैव

अनूदितसाहित्यनिर्माणे पटुः। विशिष्य मातृभाषायाः उत्तमोत्तमकृतीनामनुवादे गृहीतव्रतोऽयं पण्डितराजस्य काव्यभेदानिव उत्तमोत्तमानूदितकाव्यभेदान् निरूप्य 2012 वर्षीयं केन्द्रसाहित्येकादम्याः अनुवादप्रशस्तिं प्राप्य विरतः। अस्य अनूदितग्रन्थेषु प्रसिद्धाः सन्ति- प्रतिभारायस्य याज्ञसेनी, उल्लङ्घनम्, सीताकान्तमहापात्रस्य भारतवर्षम्, चन्द्रभानुशतपथिनः सृष्टितत्त्वानुचिन्तनम् इत्यादि।

याज्ञसेनीति डा.प्रतिभारायमहोदयया मूलत उत्कलभाषानिबद्धो ज्ञानपीठ-मूर्तिदेवीत्यादिपुरस्कारभाक् दशाधिकभारतीयभाषास्वनूदितपूर्वः सम्प्रति संस्कृतभाषयानूदित उपन्यासः। आत्मजीवनीशैल्याः प्रयोगेण मूललेखिकाऽत्र आविष्करोति द्रौपद्या जीवितसर्वस्वम्। जीवनस्य शेषक्षणे स्वजीवनस्य क्षतिं प्राप्तिं च आकलय्य द्रौपदी समग्रमुपन्यासं पत्ररूपेण प्रस्तौति जीवनबान्धवं जगद्बन्धुं भगवन्तं श्रीकृष्णं प्रति। भक्त-भगवतोः द्रौपदी-श्रीकृष्णयोर्वा अपार्थिवप्रेमाणो वाङ्मयीमूर्त्तिः वर्तते याज्ञसेनी। स्वयं लेखिका वदत्याद्याभासे- ''याज्ञसेनी विलक्षणं नारीत्वावाहनमेकम्। कर्म-ज्ञान-भक्ति-शक्तीनां मूर्तिमती देवी याज्ञसेनी। .... कृष्णां 'याज्ञसेनी'रूपेण प्रस्तूय मम देशस्य संस्कृतावादरवतां, पाठकानां विचारभूमिं समुत्पादयितुमहं सङ्कल्पबद्धा। (आद्याभासः, पृ.13-15)। ग्रन्थस्य अनुसर्जकस्याभिमतम् एवमस्ति-''..समर्पणमन्तरा जीवनं नैव पूर्णतामश्नुते, न च जीवने सकलसमस्यासन्तापसंहारकः साहसः समुदेति, न वा पूर्णानन्द आस्वाद्यते इत्यत्रापि प्रतिपादितं चरमं विषयवस्तु ध्वन्यते।

समर्थोऽयमनुसर्जकः प्रतिपदं पारम्परिक-मानक-शैल्या अनुसृजति पुनः प्रत्यग्रतया। पुना रमते मनस्तस्य मूललेखिकायाः भावविश्वे। तेन समपदानुवादेन सह प्रत्यक्षीक्रियते क्वचिदुदात्तभावाः क्वचिद्वा संस्कृतीकरणेन क्लिष्टभावबन्धाः। यदुक्तं प्रसिद्धसमीक्षकेण प्रो.राधावल्लभ-त्रिपाठिना- ''अनुवादकस्य भाषा अतितरां प्रौढा, मूलकृतेरनुव्यवसायाय गहनभावाभिव्यजनाय च सर्वथा श्लिष्यति। रचनाकारस्य भावजगति गम्भीरमवगाहनं कृत्वा यत्नतस्तद्व्यक्तियोगिनां शब्दानां प्रत्यभिज्ञां विधाय अनुवादः प्रस्तुतः।'' (सागरिका-39/1,पृ.95) तथापि मूलभावानां पुरस्करणे पुरश्चरणे वा संस्कृतभाषामर्यादा कुत्रापि बाधिका न प्रतीयते। यथा-

(आकाशर येमिति आदि अन्त नाहिँ, समुद्रर येमिति क्षय नाहिँ, वृद्धि नाहिँ, सूर्यर येमिति उदय नाहिँ, अस्त नाहिँ, मनोकामनार सेमिति

पूर्णता नाहिँ, शून्यता नाहिँ, आम सम्पर्कर सेमिति संज्ञा नाहिँ, शेषकथा नाहिँ .. .. ओडियामूलम्-पृ.1)

आकाशस्य यथाऽदिर्नास्ति, अन्तोऽपि नास्ति, समुद्रस्य यथा न वृद्धिर्न क्षयः, सूर्यस्य यथा नोदयो न चास्तमयः, मनःकामनाया यथा न पूर्णता,न च शून्यता, तथैवावयोः सम्बन्धस्य नास्ति संज्ञा न चोपसंहारः।पृ.1

सखि! कृष्णस्य बुद्धिविलासोऽवगतो न वा?(पृ.25) श्रुतं मया पूर्वम्-स नु दुःखबन्धुः।(पृ.35)धर्मसंस्थापनप्रयासो जलविहीनसरसि कमलविकास इव।(पृ.41) स्वदुःखं विपुलीकृत्याऽतिथिसत्कारे त्रुटिर्न राजकन्याकर्तव्यम्। (पृ.43)द्वन्द्वावसानात्पूर्वं निशावसानमभूत् (पृ.95) ऊर्मिला दीना लोकलोचनान्तराले निलीना (पृ.114)वात्सल्यार्णवस्तु जननीहृदयम् (पृ.141)ओष्ठकोणे मृदुहास्ये कुण्ठिता भ्रमरी (पृ.206) रमणीयरमणीजन्मना (पृ.382) पुरुषकाराहंकारौ नैवैकाकारौ (पृ.415) कालानलसन्निभेषु मुखेषु (पृ.443)। क्वचित् मूलभाषायाः मूलपदानि विसृज्य संस्कृतरूढपदानि प्रगुणीकुर्वन्ति कष्टकल्पनाः-

धनुर्विद्यायामर्जुनः पारदृश्वा।(पृ.7)। मां कोपयन्त्यस्ताः पर्याकुलीकरिष्यन्ति मे प्राणान्।(पृ.12)। नितम्बिनी ममांसे पाणिं न्यधात्।(पृ.27)

भाषादृष्ट्या तु मूलग्रन्थादपि उत्कृष्टो वर्तते अनूदितग्रन्थोऽयम्। किन्तु मूलस्य सरला, कोमला, सावलीला च भाषा अत्र नास्तीति पुनर्वक्तव्यं नास्त्येव। तथापि न म्रियतां सर्पः, न त्रुट्यतां दण्डः (पृ.73) बलं यस्य देशस्तस्य (पृ.107) कष्टं विना कृष्णो न लभ्यते (पृ.249), अनतिक्रमणीयं हि भाग्यलिखितम्(पृ.302) परन्तु दुर्योगः सज्ञातिकुटुम्बः समाविशति (पृ.349) क्षते सुधाप्रलेपसमः (पृ.362) इत्यादिरूढिषु प्रान्तीयप्रभावं विनश्य संस्कृतप्रभां विस्तारयति।

मूललेखिकया यद्यप्यत्र पौराणिकचरित्राण्येव गृहीतानि, तथापि तानि आधुनिकयुगोपयुक्तानि कृत्वैव त्यजति। नायिकायाः नखशिखवर्णने तस्याः सूक्ष्मतमामप्यंशं न जहाति -अहं कृष्णा। नीलकमलकुड्मलनिभा मे देहकान्तिः। सागरलहरिकेव घननीलोर्मिला कवरी। नीलोत्पलसमं चञ्चलोज्ज्वलं बुद्धिदीप्तमायतं मनोहारि च मे नेत्रयुगलम्। विश्वस्य श्रेष्ठतमाकृतिकारनिर्मितनिर्दोषप्रतिमाया इव मेऽनिन्द्या मुखशोभा। चारुसङ्घटनाङ्गलतिका। दीर्घो देहः, तुङ्गं सुवृत्तं वक्षोजयुगलम्, क्षामो मध्यभागः, रम्भास्तम्भनिभ ऊरुः, चम्पककलिकोपमाः कराङ्गुलयः,

रक्तकमलदलकोमलं करतलम्, पदयुगलं च। मुक्तामालेव दन्तपङ्क्तिः। विद्युदुद्दीप्ता हास्यरेखा। चन्द्रलेखाशोभाः करचरणनखाः। शरीरस्य पद्मगन्धेन मधुकराः मतिहीनाः पुष्पोद्यानं विसृज्येव मे चतुर्दिशं भ्रमन्ति। मम कुञ्चितकवरीसौन्दर्येण बद्धः पवनः स्थिरीभवतीव। कवयो वदन्ति- यतिमतिहारिणी मे शारीरशोभेति। (पृ.8)

पूर्णतया उपन्यासस्य पत्ररूपेण निवेदनं, मध्ये गीतादिसंयोजनं, द्रौपदीद्वारेण आर्य-आर्येतरमिलनयोजना, आरण्यप्रदेशे मार्गनिर्माणम्, अग्रे गत्वा द्रौपदीमुखेन विश्वकल्याणकामना तथा पुनर्जन्मकामना ग्रन्थस्य सार्वकालिकत्वं निरूपयन्ति। अस्य सुन्दरं मुद्रणं, बन्धनं, मुखपृष्ठं चाकर्षन्ति पाठकसमाजम्।

सामग्रिकतया ग्रन्थोऽयं इदानीं यावत् प्रणीतानामनूदितग्रन्थानाम् आदर्शस्वरूपं प्रस्तौतीति वक्तुं सुशक्यम्। व्याकरणनियमपालने, भाषामर्यादासंरक्षणे, क्रियापदाहरणे, पदचयने, पदशय्यानिर्माणे, मूलभावविशदीकरणे, पूर्णपुरुषस्य लीलावर्णने, पुण्यश्लोकानां यशोगाने, याज्ञसेन्याः सामाजिकस्वरूपनिरूपणे, किं बहुना संस्कृतानुवादस्य मानकरूपप्रस्तावने च चिरं चकास्ति उपन्यासोऽयं सहृदयसमाजमनोमुकुरे।

2.33. रूमीपञ्चदशी

सुप्रसिद्ध-सूफीकवे: जलालूद्दीनरूमीवर्यस्य फारसी-कथानां संस्कृतानुवाद: 'रूमीपञ्चदशी' इति नाम्ना आचार्येण राधावल्लभेन कृतो वर्तते। महतः सूफीकवे: रहस्यानुभूतिपरकस्य काव्यस्य मध्ये मध्ये प्रसङ्गवशादागतानां कथानाम् अनुवाद: भारतीय- संस्कृतेः अनुरूपं नामरूपं प्रदाय क्रियते। अतः रूपान्तरकारेण जाबालिः, दिङ्नाग-नूर-रामादीनि नसीरुद्दीन-कल्पवृक्ष-परिजातवृक्षेत्यादीनि नामानि योजयित्वा अनुवादकेन कथाशिल्पे परम्परानिर्वाहकः सांस्कृतिकविकासः साधितः। प्रथमा कथा "भारतीय: वृक्षः:' इति प्राचीन कालादेव भारतदेशस्य विश्वप्रसिद्धम् आध्यात्मिकीं प्रसिद्धिं प्रति सङ्केतयति। अस्यां कथायां नसीरुद्दीनो नामा कश्चिद् दूतः भारतम् आगत्य इतस्तत: भ्रमन् जनान् पृच्छति - आचार्य दिङ्नागस्य निर्देशानुसारं विन्ध्याटव्यामपि तं वृक्षं न प्राप्तवान् यस्य फलं खादित्वा जना: वार्द्धक्यात् मृत्यो: च मुक्ताः भवन्ति। एकं न द्वे - इति कथायां संसारे भेदबुद्धेः कारणाद् वासनाः संस्काराः इति कथ्यते। कथा "मूर्खो हि शोभते तावत् ..... तादृशेषु जनेषु व्यंग्यमस्ति ये स्वदोषान् अदृष्ट्वा परेषु

दोषारोपणं कुर्वन्ति।" बुद्धिमान् सारसः' इति कथा मानवेभ्यः तेषां सहजबन्धून् परीक्ष्य तान् कदापि न त्यक्तुं विशिष्टां शिक्षां ददाति। "लघु हरितं च दीपम्' इत्यस्यां कथायाम् एकस्मिन् हरितद्वीपे विचरन्त्याः धेनोः रूपकेन कविना क्षुधितस्य, संशयशीलस्य, चिन्तातुरस्य जीवस्य सर्वबीजसम्पन्नायाः सर्वसम्भवायाः धरायाः प्रतीकात्मकं चित्रणं अङ्कितम्। "स्यूतद्वयम्' "एकेन हस्तेन समुद्गकस्य वयनम्' "चयनं च समर्पणं च' "शेबा सोलोमनश्च' "गुडविक्रेता मृद्भक्षकश्च' "प्रमत्तः सेवकः' "मजनुश्च तस्य उष्ट्री च' "अब्दुलस्तस्य जीर्णवस्त्रखण्डपूरितमुण्णीषं च' "रयीशः पक्षी च' "वृद्धायाः पाशान्मुक्तस्य राजकुमारस्य' इत्यादिकथासु दार्शनिकचिन्ताश्चित्रिताः वर्तन्ते।

अयं कथासङ्ग्रहः सरलकथानां स्वरूपैः गम्भीर-रहस्यात्मकैः सिद्धान्तैः च सह उदात्ततायाः उद्घोषः अस्ति। अत्र एकतः सरल-सहज-शब्दश्रृङ्खलायां, प्रवाहपूर्ण-शैल्यां, लघु-लघुवाक्येषु च स्वाभाविकः कथाविन्यासः वर्तते तत्रैव अपरतः यथार्थस्य स्फोटः, रहस्यात्मकतायाः वस्तुसङ्गठनं, जीवनाय च समुन्नतिकारकः मोक्षोन्मुखी जीवनोत्कर्षः च वर्तते।

2.34. लिपिका

रवीन्द्रनाथस्य लिपिका इति मूलकथाग्रन्थे स्थानिताः द्विश्चत्वारिंशत् कथाः अत्र अनूदिता नारायणदाशेन अत्यन्तरोचिष्णुतया सरलभाषया च। एवमेव रवीन्द्रलघुकथाच्छटां कोऽपि लिपिकायाः अनुवादेऽपि प्रत्यक्षीकुर्यात् निम्नपङ्क्तिषु- "विवाहस्य अस्य प्रथमदिवसस्य स्वरेण सह प्रतिदिनं स्वरस्य मेलनं कुत्र? गुप्तातृप्तिः गभीरं नैराश्यम्, अवहेलनम्, अपमाननमवसादनं, तुच्छकामनायाः कार्पण्यं, कुश्रीनिरसतायाः कलहः, क्षमाहीनक्षुद्रतायाः सङ्घातः, अभ्यस्तजीवनयात्रायाः धूलिलिप्तं दारिद्र्यं - वंश्या देववाण्यामेतासां वार्तानामाभासः क्व? (वंशी)।"

एतदतिरिच्य 'कवीन्द्रकथाकल्लोलिनी'त्यनूदितरवीन्द्रकथासङ्ग्रहे अनेन चतुर्दश रवीन्द्रकथा अनूदितास्ता यथा- 'घट्टस्य कथा', 'राजपथस्य कथा', 'मेघदूतम्', 'कङ्कालः', 'अनधिकारप्रवेशः', 'क्षुधितप्रस्तराः', 'अग्रजा', 'पुत्रयज्ञः', 'उद्धारः', 'कृतघ्नः शोकः', 'चित्रम्', 'प्रथमपत्रम्', 'परी', 'विदूषकश्चे'ति अत्र यथावत् स्थानिताः सन्ति।

2.35. वसुदेवः

नरेन्द्रकोहलीलिखितस्य वसुदेवग्रन्थस्य अनुवादः सरिताकृष्ण-शास्त्रिणा कृतः, यः खलु संस्कृतभारत्या 2011 संवत्सरे प्रकाशितः।

अयमुपन्यासः न तु 'वासुदेवस्य', अपि तु 'वसुदेवस्य' वर्तते। व्यक्तेः धरातलोपरि सः चरित्रस्य शुद्धतां प्रति गच्छन् समाजस्य धरातलोपरि प्रहारान् सोढ्वा जागहणस्य शङ्खं निनादयति तथा राजनीतेः धरातले सत्क्षत्रिय इव शस्त्रबद्धतया सम्पूर्णदुष्टशक्तिभिः युद्ध्यति। अत्र उपनिषदामद्वैतं, भागवतस्य लीला तथा भक्तिः तथा महाभारतस्य राजनीति अपि वर्तते। अतः प्रारम्भिकः क्षत्रियजीवनस्य उन्नत्या सः शरीरं वा पातयेदिति पणं स्वीकरोति। यथा- "एवं तु न अवदं खलू अहम्।" वसुदेवः सम्मितम् अवदत्, "अहं सैनिकः अस्मि, अपि च सौनिकः तावत्पर्यन्तं शस्त्रं न त्यजति यावत् तस्य भुजा एव न कृन्ता भवति।" (पृ. 16)

अद्य अहं युष्मान् वदामि यत् क्षत्रियः तावत्पर्यन्तं सङ्घर्षात् न प्रतिनिवर्तते यावत् तस्य मस्तकमेव छिन्नं न स्यात्," (पृ. 528)

अस्मिन् उपन्यासे 62 भागाः, 528 पुटाश्च सन्ति ये प्रतिपुटं क्षत्रियवरस्य वसुदेवस्य क्षात्रतेजोज्ज्वलाः सन्ति। वसुदेवस्य विवाहात् परमुपन्यासोऽयं समारब्धः। यथा-

वसुदेवस्य नेत्रे विस्मयेन विस्फारिते इव स्थिते।...

आप्रच्छनघटिका आसीत्। देवक्याः साश्रुनयनाः भ्रातृजायाः भगिन्यश्च तां परितः स्थितवत्यः आसन्। देवकः, तत्पुत्राः च भावलीनाः सन्तः निकटे एव आसन्। देवक्याः आप्रच्छनार्थं कंसः रथारोहणाय तस्याः साहाय्यं कुर्वन् आसीत्। ...अकस्मात् स्वभुजाभ्यां तां सर्वथा विमुच्य सः तां न केवलम् अत्यजत्, अपि तु खड्गम् अपि कोषात् बहिः निरकासयत्। ...खड्गः? किं निमित्तम्? देवकी तु कस्मिन्नपि सङ्कटे नासीत्। ...अरे, ... सः देवक्याः एव वधं करिष्यति इति अभासत। ... यः कंसः विवाहे अत्युत्साहेन भागम् अगृह्णात्, किञ्च एकया रीत्या समग्रविवाहस्य प्रबन्धनं, सञ्चालनञ्च अकरोत्, सः एव कंसः अकस्मात् राक्षसः जातः आसीत्।

देवक्या न किचन अबुध्यत। स्तम्भिता इव अतिष्ठत् सा। सा न किञ्चित् चिन्तयितुं, वक्तुं वा शक्नोति स्म, न वा तस्याः शरीरं किमपि चेष्टितुं शक्नोति स्म। ... सहसा तस्याः सम्पूर्णशरीरं जडप्रायं जातम् आसीत्।

देवकीं रथे उपवेश्य वसुदेवः अपि रथम् आरोहत्। तस्य दृष्टिः चतस्रः दिशाः पश्यन्ती आसीत्। अधिकांशाः जनाः ततः दूरं गताः आसन्। अनेके तु दृष्टिगोचराः अपि नासन्। कदाचित् इदानीं ते स्वम् एतस्य

सकलसमारोहस्य अङ्गरूपेण द्रष्टुं नेच्छन्ति स्म, न वा वसुदेवेन सह स्वीयं सम्बन्धं कञ्चन अङ्गीकर्तुम् इच्छन्ति स्म।

एवं प्रकारेण सम्पूर्णे ग्रन्थे वसुदेवस्य मथुरायाः बहिर्गमनाय चेष्टा, राजाधीनोऽपि उक्तिप्रत्यक्तिभिः तं बोधयितुं चेष्टा, गोकुलस्य रक्षणाय रोहिण्याः नियुक्तिः, स्वसद्योजातसन्तानानां रक्षणाया प्रयत्नाः, वृष्णीणाम् ऐक्यस्थापनाय, युद्धाग्रहाय, सत्यस्थापनाय च प्रयत्नाः दृश्यन्ते। अस्मिन् महाग्रन्थे श्रीकृष्णस्य लीलामयत्वं प्रतिपादितमस्ति। कोहिलीवर्यस्य पूर्वग्रन्थेषु अवताराणां मानवीकरणं जातमस्ति। अत्र तु श्रीकृष्णस्य अवतारत्वमपि मानवत्वमपि युगपत् प्रतिपादयति कथाकारः।

श्रीमद्भगवद्गीतायां कुरुक्षेत्र युद्धक्षेत्रे विमूढतया शस्त्रत्यागं कृत्वा उपविशन्तम् अर्जुनं श्रीकृष्णः आत्मज्ञानप्रदानपूर्वकं जीवनयुद्धाय प्रस्तुतम् अकोरत्। अन्तिमे स युद्धाय कृतनिश्चयः भवति। तथैवात्र स्वधर्मपालनाय कृतनिश्चयः वसुदेवः युद्धाय साङ्गोपाङ्गः सपरिवारः प्रतिष्ठते इति उपर्युक्तपंक्तिषु दृष्टमेव अस्माभिः। सर्वत्र वसुदेवसुतस्य प्रशंसा भवति। तादृशं सुतं जनयितुः पितुः वसुदेवस्य किं महत्त्वमिति अस्मिन् उपन्यासे सफलतया प्रतिपादितमस्ति।

2.36. वात्यासारः

ओडियाकथाकारस्य चन्द्रशेखरदासवर्मणः पञ्चदशकथासङ्ग्रहं ''झड़ ओ अन्यान्य गल्प'' इत्यमुं ''वात्यासारः'' इति शीर्षकेण संस्कृते अनूदितः अनेनैव अनुवादकेन। अत्र स्थानिताः कथाः कथाकारस्य भावविश्वमुन्मीलन्ति। तथा च काश्चन कथाः प्रसिद्धकथाकाराणां भाववैविध्यम् आत्मसात् कुर्वत्यः शतात् समाभ्यः प्रवाहितां कथाधारां पुनः शरदः शतं यावद् विस्तारयन्त्यः 'त्वं जीव शरदः शतम्' इति अभिवदन्ति। लक्षणीयमिदमत्र यत्, सम्पूर्णस्सङ्ग्रहः सन्धिरहितो वर्तते। कदाचित् संस्कृताभ्यासिनां प्रारम्भिकस्तरे संस्कृतविद्यार्थिनां कृते अयं सङ्ग्रहः प्रस्तुत इति प्रतिभाति।

चतुर्दशकथाः अत्र अनूदिताः सन्ति। यथा- "वात्यासारः" "निष्पत्तिः" "पादौ स्खलितौ" "व्याघ्रः" "रेवती" "बन्ध्या नारी" "स्थानान्तरणम्" "मूल्यहीना राजनीतिः" "भागः" "अस्तमनात् परम् " "अन्तर्दाहः" "संयोगः" "पश्चात्तापः" "जीवनविपणनम्"।

"वात्यासारः" इति कथाग्रन्थस्य शीर्षककथायां महेशेन प्रवञ्चिता ममता शिशुद्वयस्य संसारं कथमपि वहति स्वपरिश्रमेण। शीघ्रविवाहार्थं

कन्यायाः प्रत्याख्यानेन मातृमनः द्विधाग्रस्तं भवति। अन्ततोगत्वा सा ज्ञातुं प्रभवति, कन्या अन्यप्रणयिनी इति। तस्याः भविष्यं स्मृत्वा तं पुत्रं द्रष्टुमिच्छति सा। यदा अनुभवः आगच्छति, परिचयं प्राप्य संज्ञाहीना जाता सा, यतो हि स आसीत् तस्य स्वामिनः द्वितीयपत्न्याः अद्वितीयः पुत्रः। एवं नाटकीयस्थितौ कथां समाप्य कथाकारः मातृमनसः वात्यासारं प्रगुणीकरोति।

"निष्पत्तिः" इति कथायां भारतीयविवाहितनार्य्याः मनस्थितिः सम्यक् निरूपिता कथाकारेण, यत्र पित्रोः निष्पत्त्या विवाहो भवति, अविस्मृतमपि बन्धुं त्यक्त्वा, अपघातेन पीडितं स्वामिनं सेवमाना चिन्तयितुमेव न प्रभवति, कस्तस्य सहायको भविता, पुत्रो वा श्वश्रूः वा? "पादौ स्खलितौ" कथायां कर्मजीविमहिलानिवासे वसन्तीनां महिलानां कथां निपुणं निरूपयति कथाकारः। सुनयना विवाहितानां प्रातिनिध्यं वहति, सुरभिश्च अविवाहितानाम्। पूजावकाशात् परं सहसा आगत्य सुनयना पश्यति, पथभ्रष्टा गतप्राणा सुरभिः व्यजनात् लम्बमाना वर्तते। "व्याघ्रः" कथायां सत्यानन्दो मञ्जरी इति निम्नवर्गस्य कर्मकरदम्पत्योः प्रात्यहिकसंसारो वर्णितोऽस्ति। सामान्यभोजनावासप्रदानेन आप्तकामाः कथं निद्रितावस्थायां परस्त्रीणां सर्वस्वहरणं कर्तुं प्रवर्तन्ते इति सम्यक् वर्णयति कथाकारः। समाजे मुखाच्छादनेन व्याघ्रादपि भयङ्कराः सन्ति एते इति वदति कथानायिका मञ्जरी- "कृपया आलोकं न ज्वालय। उज्ज्वलालोके त्वं मम शरीरं दृष्ट्वा भीतः भविष्यसि। सोढुं न शक्ष्यसि! दिवा प्रविष्टः कश्चन व्याघ्रः। न्यकृन्तत् माम्। मम रक्तम् अपिबत्। एकम् अपि मुहूर्त्तम् अस्मिन् गृहे न स्थास्यामि। चल, अधुना एव प्रचल। अन्धकारस्य सुयोगेन पुनः आगच्छेत् व्याघ्रः। मम आवश्यकं नास्ति आश्रयस्थलम् ..। उत्तमभावेन वत्स्यामः स्ववसतौ। भवतु नाम कुटीरम्। उपरि स्थास्यति उन्मुक्तः आकाशः। आकाशे ज्वलिष्यन्ति तारकाः। पुनः कुटीरमध्ये त्वं च अहं च। आवाम्। तदेव आवयोः निर्भयम् आश्रयस्थलम्। चीत्कृतवती मञ्जरी।"पृ.32। "बन्ध्या नारी" इत्यपवादेन प्रतिमां त्यक्त्वा पुनर्विवाहं रचितवान् दीपङ्करः तस्याः एव समस्यायाः निवारणार्थं बहुब्राह्मणभोजनानि सङ्कल्पितवान्। कस्याः अपि नार्य्याः आतुरनिवेदनं श्रुत्वा स पश्यति तस्य एव गृहलक्ष्मीः अद्यः क्षुधातुरा द्वारं द्वारमटित्वा तस्य द्वारि स्थिता स्वशिशोः आहारसङ्ग्रहाय। तां स ग्रहीष्यति वा न वेति निर्णयं पाठकानामुपरि त्यक्तवान् कथाकारः। "मूल्यहीना राजनीतिः" इति कथायां मन्दकिशोरबाबुः राजनीतिकपरिभ्रमणेन गत्वा कोरापुट-राजवाट्यां रात्रौ वसति। प्रातः रत्नादेवी त्रिंशद्वर्षेभ्यः सुरक्षितां लेखनीं

दैनन्दिनीं च प्रत्यावर्त्य वदति, सा एव तद्दिनस्य गणितशिक्षकस्य प्रियशिष्या उर्वशी। समयचक्रेण क्षणाय अमन्यत नन्दकिशोरः राजनीतिः मूल्यहीना इति। "भागः" इति कथायां कथाकारः युगपत् तोलयति नगरप्रेमिणो ग्रामप्रेमिभिः सह, ये ग्रामभूमिं स्वर्गसमानां मातृकल्पां वा मन्यन्ते। "अस्तमनात् परम् " कथायां कथाकारः दर्शयति विवाहात् परमपि प्रीतिमती क्षणमपि न विस्मरति प्रीतिमन्तं पुरुषं कविम्। किन्तु प्रीतेः गाढत्वानुभवात् पूर्वमेव विवाहिता कमला पुरीमागत्य अपि न विस्मृतवती कविं सुमन्तम्। विरहव्यथया सोऽपि उन्मत्तभावेन प्राणान् त्यजति पुरीसमुद्रकूले एव। "अन्तर्दाहः" इति कथायां स्वयं प्रेमविवाहं कृत्वापि सुजाता चिन्तयति स्म, कन्या सम्यक् पठित्वा उच्चकुले विवाहं करोतु इति। सहसा कन्या पलायते स्वबन्धुना सह विचारालये विवाहार्थम्। "संयोगः" इत्यत्र कथमाधुनिकरीत्या कोष्ठीगणनादिकं विधाय विवाहमेलकं कुर्वन्ति मध्यस्थाः इति प्रतिपादितमस्ति। "पश्चात्तापः" कथायामधुना आतङ्कवादनाम्ना नेतारः कदा परस्परं भावयन्तः पोषयन्तो नाशयन्तो वा दृश्यन्ते इत्यस्य सम्यक् वर्णनं लभ्यते। "जीवनविपणनम्" इति कथायां कन्यायाः सुखकामनया सकलमपि धनं कन्याधनरूपेण प्रदाय अपि मुक्तिर्नास्ति कन्यापितुः। पतिः विदेशे, पितृगृहे कोऽपि सहायको नास्ति इति श्वशुरस्य कुबेरमिश्रस्य सर्वमपि अत्याचारं मौनं सहते स्म अरुणा। अन्ततः अस्वस्था मृता, परन्तु पितृगृहगमनानुमतिं न प्राप्तवती। गृहं बन्धकीकृत्य, यौतुकधनं पूजासम्भारं नीत्वा सम्प्राप्तः नारायणमिश्रः पश्यति जनाः महाभोजे सम्मिलिताः सन्ति। कारणं ज्ञात्वा तत्रैव भूपतितः सः, यतो हि स भोज आसीत् तस्याः कन्यायाः एकादशाहभोजः।

इतः अनुमीयते यत् नारायणदाशेन अनूदितोऽयं कथासङ्ग्रहः सन्धिसमासरहितोऽपि संस्कृतमर्यादया परिनिष्ठितो दृश्यते। किं बहुना, नूनमयं पाठकीयां स्वीकृतिं प्राप्स्यतीति विश्वसिमः।

2.37. विश्वकथाशतकम्

17-12-1935 तमे ईशवीयाब्दे उत्तरप्रदेशस्य सिंगालीग्रामे जातः पद्मशास्त्री (पद्मादत्त ओझा) प्रशासनिकपदात् 1993 ईशवीयाब्दे सेवानिवृत्तः सन् साहित्यसाधनायां रतः। महाकाव्यद्वयं लेनिनामृतम्, महावीरचरितामृतं, स्वराज्यम् खण्डकाव्यम्, व्यायोगद्वयं-बंग्लादेशविजयः-लोकतन्त्रविजयः, शतकद्वयं सिनेमाशतकम्, चायशतकम्, विश्वकथाशतकम्, पद्यपञ्चतन्त्रम्, यात्रासंस्मरणम्-मदीया सोवियतयात्रा, ममापेलीकाः, न्यायसिद्धान्ताः,

वेदज्ञानामृतम् (वेदकाव्यम्) आदयो मुख्या रचना वर्तन्ते तस्य। कवेः त्रिशतं

कथा अद्यावधि प्रकाशिताः। कथालेखने प्रगतिशीलविचारणामभिनवशैली स्वीया वर्तते कथाकारस्य। विश्वकथाशतकं तस्य भागद्वयात्मकं वर्तते यत्र शीर्षकानुसारं वैदेशिकानां शतं कथाः क्रोडीकरोति सरलसुरगिरा।

2.38. विश्वम्भरा

कथाभारतीसंस्थया प्रकाश्यमानायाः कथासरित्पत्रिकायाः 13-14संयुक्ततरङ्गे 26 कथाः विश्वप्रसिद्धानां लेखकानां गाइडीमपासा-फ्रान्सकाफका-एण्टनचेकव-ओहेनरी-रस्किन्वण्ड-रवीन्द्रनाथादीनां विविधैः विद्वद्भिरनूदिताः। संस्कृतसाहित्योत्सवसमये ताः पुनः उपर्युक्तशीर्षकेण पुस्तकाकारेण प्रकाशिताः संस्कृतभारत्या।

2.39. विश्ववारा

मध्यप्रदेशसंस्कृताकादम्या प्रकाशिता दूर्वा आचार्याणां राधावल्लभत्रिपाठिनां सम्पादनकाले विविधद्रव्यसम्भृता भवति स्म। तस्याः विश्वकथा-भारतीयकथा-विशेषाङ्काश्च नितरां प्रंशसनीयाः भवन्ति स्म। विश्वकथाविशेषाङ्के प्रकाशिताः 12 कथाः विश्वप्रसिद्धानां लेखकानां गाइडीमपासा- एण्टनचेकव-ओहेनरी-रस्किन्वण्ड-रवीन्द्रनाथादीनां विविधैः विद्वद्भिरनूदिता आसन्। संस्कृतपुस्तकमेलावसरे ताः पुनः विश्ववाराशीर्षकेण पुस्तकाकारेण प्रकाशिताः संस्कृतभारत्या।

2.40. शेरलाकहोम्सस्य स्पशकथाः

शेरलाकहोम्सस्य स्पशकथाः इति ग्रन्थः रमेशमुधोळकरकृतात् मराठीमूलात् नीलेशबाबासाहेवेशिन्देमहोदयेन संस्कृतानुवादः कृतः, संस्कृतभारत्या नवदेहलीतः 2011 संवत्सरे प्रकाशितः।

गूढचरस्य शेरलाकहोम्सस्य नाम सर्वे जानन्ति एव। आर्थर-कानन-डायलमहोदयः शेरलाकहोम्सस्य षष्टिं कथा- लिखितवान्। तासु अस्मिन् ग्रन्थे चतस्रः स्पशकथाः सन्ति। यथा- बस्करविलस्य भयङ्करः प्राणी, बिन्दुमती पट्टिका, नृत्यन्तः मानवाः, शोणितकेशयुक्तानां सङ्घः इति। प्रथमा कथा बस्करविलस्य भयङ्करः प्राणी (दि हौण्ड आफ बस्करविल) अतिदीर्घापि (51 पुटात्मिका) सर्वाधिकलोकप्रिया वर्तते।

2.41. श्रीरामकृष्णकथामृतम्

स्वामिविवेकानन्दानां सार्धशततमजन्मजयन्त्यवसरे रामकृष्णमठः सम्पूर्णस्य श्रीरामकृष्णकथामृतस्य तुरीयोऽनुवादः चतुर्भिः खण्डैः प्राकाशयत्। पुरोगिरा इत्यत्र अनुवादकद्वयस्य प्राग्वचनं यथा

ग्रन्थगौरवविषये- "न च श्रीरामकृष्णदेवस्य निर्विवादावतारत्वेऽपि तच्छिष्यस्य सङ्कलयितुः भ्रमप्रमादादिवशात् कथामृतम् अप्रमाणमिति सुवचम्। श्रीमस्य भगवत्पार्षदत्वेन व्यासादिवद् ऋषित्वात् अप्रत्याख्येयप्रामाण्याच्चेति भिन्नप्रसङ्गः। किञ्च, साक्षाज्जगज्जननी श्रीसारदादेवी कथामृतकृतिं प्रशंसितवती। श्रीमद्विवेकानन्दस्वामिपादोऽपि कथामृतप्रामाण्यं चतुरस्रवचसा व्याजहार। (पृ.4, प्रथमभागः)।

अत्र 395 पुटपरिव्याप्ते प्रथमभागे प्रतिविषयं विद्यन्ते केचन भागाः, कुत्रापि विंशत्यधिकाः क्वचिच्च एक एव। अत्र मुख्यतः 1883वर्षीयं कथामृतं वर्तते। अस्य द्वितीयभागे 220 पुटाः सन्ति। अत्राष्टशीर्षकेषु 58 भागाः लसन्ति। अस्य तृतीयभागः 607 पुटात्मको वर्तते। अत्र 1884 ख्रीष्टवर्षस्य कथामृतं वर्तते। अयं भागः 04.08.2015 दिनाङ्के प्रकाशितो वर्तते। अत्र जनवरीद्वितीयदिनाङ्कस्य कथायां 33 भागाः सन्ति।

प्रायः द्विसहस्रपुटमितस्यास्य महाग्रन्थस्यानुवादः न सुकरः। अस्य चतुर्थभागः 1.10.2016 दिनाङ्के प्रकाशितः। इतः ज्ञायते यत् अस्य प्रकाशनाय प्रायः पञ्चवर्षाणि अतीतानि। तथापि अन्ततोगत्वा अयं महाग्रन्थो सुन्दरसुरवाचा अनूदितः इति नितरां प्रशंसनीयं वर्तते अस्य अनुवादकद्वयम्। अधुना अनेन अज्ञातहिन्द्याङ्ग्लानां संस्कृतपण्डितानां महान् उपकारो जातः।

2.42. षष्टितन्त्रम्

गिरिवाला-शरच्चन्द्रयोः पुत्रः क्षितीशचन्द्रचट्टोपाध्यायः १८९६ ईशवीयसंवत्सरे नभेम्बरमासस्य चतुर्विंशतिदिनाङ्के कलिकातायां जोडासाङ्को इत्यत्र जातः। १९१८ ईशवीयसंवत्सरे कलिकाताविश्वविद्यालयात् स्नातकोत्तरपदवीं प्राप्य संस्कृतव्याकरणे प्रकृष्टाध्ययनार्थं डि.लिट् उपाधिमपि अवाप। कानिचन दिनानि दक्षिणसुवर्वनकलेजे (अधुना आशुतोषकलेज) कार्यं कृत्वा कलिकाताविश्वविद्यालये अध्यापकरूपेण नियुक्तस्तत्रैव पञ्चत्रिंशद्वर्षाणि असेवत। भाषाविज्ञाने व्याकरणे चास्य अगाधपाण्डित्यमासीत्।

अस्य प्रकाशितो कथाग्रन्थ आसीत् 'षष्टितन्त्रम्' यत्र षष्टिः कथाः सन्ति। एतासु काश्चन मौलिक्यः काश्चन अनूदिताः। (अनूदिताः यथा- स्वर्णमृगः, शकुन्तला, समाप्तिः, अध्यापकः, यज्ञेश्वरस्य यज्ञः, मुक्तेरभ्युपायः, विहगयुगलम्)। एतासु काश्चन संस्कृतसाहित्यपरिषत्-

पत्रिकायां मञ्जूषायां च प्रकशिताः। कानिचन रवीन्द्रकाव्यानि अप्यनेन अनूदितानि। अस्य सम्पादनेन 'Calcutta Oriental Journal' मञ्जूषापत्रिका च निरन्तरं प्रकाशिते भवतः स्म।

2.43. सप्तपदी

शङ्करझावर्यस्य सप्तमैथिलीकथात्र अनूदिताः सन्ति नारायणदाशेन। इति कथासङ्ग्रहे मूलमैथिलीभाषातः अनूदिताभिः सप्तकथाभिः पुस्तकशीर्षकं समर्थ्यते, यत्र स्थितया एकया कथया सप्तपदीत्यनया तत् प्रगुणीक्रियते च। अन्ततः अत्र एका कथा "सप्तपदी" इति वर्तते। तस्या अनुरोधेन एवात्र कथासङ्ग्रहस्य नाम सप्तपदी इति।

कथानां विषये अनुवादकस्याभिमतमेवमस्ति- "विविधभावानाम-भावानाञ्च चारुचित्रशालानिर्माणे सुदक्षस्यास्य कथाकारस्य भिन्नस्वादानां कथानामत्र अनुवादः कृतोऽस्ति मया। यथा शीर्षककथायां सप्तपदीप्रतीकेन आधुनिकयुगेऽपि अवहेलितनारीणां चित्रं लभ्यते। एवमेव 'कृपणो हस्त' इति कथायां कथानायकस्य ग्राम्यप्रीतिः, पित्रोरवहेलना, 'रक्तिमचायं' कथायाम् उत्कोचभ्रष्टसमाजस्य वैपरीत्येन दुग्धं विना चायपाने सन्तुष्टस्य कथानायकस्य भावाः, 'सन्धिसमास' कथायां राजनीतिकैः सृष्टस्य ग्राम्यविवादस्य सफलसमाधानं, 'रॉकी वा बबलूर्वा' कथायां यन्त्रविज्ञानस्य वैफल्यं, 'गर्दभवेला' कथायां शिशूनां मनस्तात्त्विकभावाः, 'दोलकः' कथायाम् अत्याधुनिकसभ्यताया वैफल्यं, सेवानिवृत्त्युत्तरजीवनस्य साफल्यमिति कुसुमसदृशा भावबन्धा इतस्ततो विक्षिप्ताः सन्ति। तथा विक्षिप्तेषु विविधभावेषु सप्तभावानां सफलतया प्रातिनिध्यं करोति सप्तपदीति अनूदितकथासङ्ग्रह इति कथनीयमेव नास्ति।(मनाङ्मनोगतम्,पृ.2)।" अनुवादशैलीविषये वदति अनुवादकः "अर्वाचीनभाषासाहित्येन सह तुलयितुं संस्कृतभाषासाहित्यं तदैवालं भविता, यदा अत्रापि स्वभावरम्यानां युगोपयोगिनीनां कल्पनानां विलासो भविता! परन्तु क्व तथा सौभाग्यं पारम्परिकपण्डितानाम्! आधुनिकभावविश्वस्य सङ्ग्रहणेन संस्कृतसाहित्यस्य वैश्विकफलकमपि सुविस्तृतं भविष्यति। तदर्थमनुवाद एव शरणमिति मम सम्मतम्। अत्र मुख्यतया भावानुवादप्रक्रिया एव स्वीकृता मया। तथापि बहुषु स्थलेषु मूलपदानि यथावत् स्थापयितुं प्रयतितवान्। तेन कदाचित् संस्कृतभाषामर्यादा सर्वथा शतं प्रतिशतं न पालिता अनुवादसौकर्याय सरलतया भावावगमनाय च। दीर्घकथानां केचन प्रलम्बसंवादाः अत्र मया

त्यक्ताः सन्ति, नामानि संस्कृतीकृतानि वर्तन्ते, मूललेखकस्यानुमतिपुरस्सरम्।(मनाङ्मनोगतम्, पृ.2)।"

प्रथमायां "कृपणो हस्तः"इति कथायाम् उदरताडनया नगरे चटर्जीमहोदयस्य गृहे कर्मकररूपेण नियुक्तः भुवनः कदाचित् ग्रामानीतम् आम्रबीजं रोपयति। वर्धिते वृक्षे नितरां स्निह्यति, प्राप्ते समये तत्रागत्य उपविशति सौन्दर्यमुग्धश्च भवति। नगरे वृक्षेण सह तस्य सम्बन्धमित्थं निरूपयति कथाकारः- "अस्मिन् प्रासादमहालयाट्टालिकामये नगरे अद्वितीयोऽयमाम्रवृक्षो यो भुवनमहोदयस्य स्वकीय आसीत्। वृक्षोऽयं तस्य जीवनकथया सह सम्मिलित आसीत्।(पृ.1)" किन्तु एकदा चटर्जीबाबोः लघुबालकः तं वृक्षमुत्पाटयति। तदा नितरां दुःखितं त्यक्ताहारं भुवनं कथमपि बोधयित्वा चटर्जीमहोदयः वृक्षं पुना रोपितवान्। स मध्ये ग्रामं गत्वा गृहकार्यकुशलां संस्कारवतीम् अचलां परिणीतवान्। परन्तु गृहहीनस्य पत्युः विषये तस्याः चिन्ता भवति स्म। "अचलायास्तथा चिन्ताऽऽसीदेव। स्वकीयदेशरहित-पतिना सह कथं स्थास्यति सा? स्वसंस्कृतिसंस्कारज्ञानशून्यं पतिं विहाय किं वा सा प्राप्नुयात्? निर्धनः पिता स्वकन्याविवाहमेकेन गृहसेवकेन सह सम्पाद्य स्वशिरसो भारमुत्तारितवान्। पृ.4।" बहुवर्षेभ्यः परमधुना ग्रामजनैः सह मिलितस्य तस्य बाल्यस्मृतिः स्मरणपथे आयाति। परन्तु इतोऽपि कटु सत्यं तेन प्रत्यक्षीकरणीयमासीत्। यावत् कोऽपि विदेशे परिश्रम्य गृहं धनं प्रेरयति, तावत् स उत्तमः। ग्रामे स स्वीयं गृहं निर्माय स्थास्यति चेत् न भविष्यति। अतः शुभारम्भे एव तस्य गृहे पितृव्यौ विचारालयं गतवन्तौ। एवं परिजनैः भृशं पीडितः भुवनः अन्ततो ग्राममेव त्यक्तवान्। दिवङ्गते चटर्जीमहोदये गृहं विक्रीय स्वदेशं गच्छन्त्या गृहस्वामिन्या भूमिखण्डं भुवनाय दत्तम्। पत्न्या अचलया पुनः मातृभाषायाः रक्षणं जातम्। गृहे निर्बाधं प्रचलिता मैथिलीपरम्पराः इति सम्यक् वर्णितं कथाकारेण मैथिलीगीतानां संस्कृतच्छायां कल्पयता - "आगे माइ ! कओने भैया लओता आलरि-झालरि, कओने भैया लओता पटोर .. ..। (अये मातः! कोऽपि भ्राता आनयति बहुमूल्योपहारशाटिकाम्। कोऽपि भ्राता आनयति वाराणसेयीं शाटिकाम्.. ..। इति छाया। पृ.6)" प्रवृद्धपरिवारस्य मुख्यस्य भारोऽपि वर्धितः। तस्य उद्योगो गतः। शेषे पुत्रोऽपि प्रासादं निर्मातुं वृक्षमेव कर्तयितुमिष्टवान्। कलहं कृत्वा गतौ पुत्रपुत्रवध्वौ। तस्य गर्वोक्तिरासीत्- "यः छेत्तुमागमिष्यति, प्रथमप्रहारं ममोपरि दास्यति।

उत्थाप्य कर्तरीं मां छिनत्तु प्रथमतस्ततो मनसि यदागमिष्यति तत् करिष्यति। पृ.10।" एकदा वात्यासारेण भूपतितो वृक्षः। भुवनस्यापि गतः संसारमोहः। कथाकारः सम्यक् तोलयति आम्रस्य भुवनस्य च जीवनगतिम्। गृहं विक्रीय कन्यायाः विवाहमङ्गलं सम्पादितवान्।

एवमत्र सप्तकथासु रॉकी बबलूर्वा, गर्दभवेला इति कथाद्वये बालमनसः, सप्तपदी-दोलक-कृपणहस्तकथासु परिवारसङ्घात-सङ्घर्ष-विघट्टनानां, सन्धिसमासे सामाजिकविघट्टनस्य रक्तिमचायमित्यत्र नैतिकाधःपतनस्य कथा वर्णिता इति वक्तुं शक्यते। संस्कृतनिष्ठः अनुवादः श्लाघ्य एव सर्वदा, येन मूलादपि सुन्दरः प्रतिभाति अनुवादः यथा- "धनेश्वरबाबू जहिया पढिते रहथि तँ बियाह भऽ गेल छलनि। जगतारणि देखबामे बड़ सामान्य, पढल-लिखल साफे नहि। मुदा मुँहक बड़ जोरगरि। द्विरागमनमे बाप एक खण्ड साड़ी पहिरा कऽ विदा कऽ देने रहथिन। सासुरमे अबिते कनियाँ डंका बजबऽ लगलथिन। दुधगरि गायक लथाड़ो नीक, मुदा नट्टा गायक लथाड़ के सहओ! सासु-पुतोहुमे टेनामानी होअऽ लगलनि।(मैथिलीमूलम्)।" अनुवादकः पूर्णतया संस्कृतीकरोति यथा- "धनेश्वरबाबुः यदा पठन्नासीत्, तदैव तस्य विवाहः सम्पन्नः। जगत्तारिणी आकृत्या सामान्या, निरक्षरा च। किन्तु मुखस्य बलमधिकम्। द्विरागमने पिता एकामेव शाटिकां परिधाप्य प्रेषितवान्। श्वसुरालयमागत्य एव तस्या मुखमुद्घाटितम्। अभ्यसमानो गायकः पराजयं सहेत, किन्तु परिणतो गायकः कथं सहेत! आरब्धानि श्वश्रूपुत्रवध्वोः मुखामुखि, हस्ताहस्ति, केशाकेशि इति व्यतिहारबहुव्रीहेः उदाहरणानि। पृ.23।" एम्.वि.ए(प्रबन्धनशास्त्रं, 25), फ्रेञ्चकट्(सुकर्तितश्मश्रुधारिणा, 25), पार्टी(सग्धिः,) जी.पी.एफ्. (भविष्यनिधिधनं,27) दृष्ट्याबद्ध(नजरवन्दि) इति नूतनपदानि, पत्नी तस्य स्फोटके लवणं प्रक्षिपति(26), न स्थास्यति वंशः, न नदिष्यति वेणुः,(34) आदि आभाणकाः कथागुणान् वर्धयन्ति। क्वचित् मुद्रात्रुटयः नेत्रातिथ्यं गताः पीडयन्ति। सुन्दरं मुखपुटं शोभनं मुद्रणं तु संस्कृतभारतीप्रकाशनस्य अपरं वैशिष्ट्यमिति पुनः वक्तव्यं नास्ति एव।

2.44. सप्तवर्णचित्रपतङ्गः

अयं कथाग्रन्थः मङ्गलपुरस्य बालकेन्द्रस्य बालैः सह भेनुस् उपाध्यायेन निर्मितायाः Rainbow Butterfly इति कथायाः सम्पदानन्दमिश्रेण कृतः संस्कृतानुवादरूपः, संस्कृतबालपरिषदा प्रस्तुतः

श्रीअरविन्दाश्रमस्य अरोपब्लिकेशन् द्वारा प्रकाशितो वर्तते। वने भ्रमन्तः चत्वारः बालाः जलाशयकूले हस्तिनं विलोक्य भयभीताः भवन्ति। अनन्तरं मैत्रीं सम्पाद्य मित्रस्य श्वेतहस्तिनः पृष्ठे उपविश्य स्वप्नकल्पितं स्थानं गत्वा शुककीटेन मिलन्ति। तदानीं हठात् एका पिपीलिका श्वेतहस्तिनः शुण्डमध्ये प्राविशत्। निःसहायं श्वेतहस्ती छिक्कितुं प्रारभत। आच्छू .. इति उच्चैः अछिक्कत् श्वेतहस्ती। तेन सा पिपीलिका बहिरागच्छत्। किन्तु आश्चर्यम्। सा पिपीलिका बहिरागत्य एकः सप्तवर्णचित्रपतङ्गः अभवत्।9, 10। रुचिरायां पृथिव्यां नेतुं सः अनुरोधं करोति। ते बालाः पुष्पोपरि तम् आरोप्य श्वेतहस्तिनः पृष्ठे उपविश्य पृथिवीं प्रति तमानीय तं पृथिव्याः सर्वं सुन्दरं वस्तु प्रदर्शयन्ति। अनेन लघुना एव कथा समाप्ता। परन्तु नितरां बालमनोनुकूला वर्तते। अनुवादः मूलानुगः उत्तमः चास्ति-

Once, four children went for a walk through a forest and came across a beautiful lake. Pink, white, red, green and blue lotuses filled the entire lake. The children were very happy.

अस्य संस्कृतानुवादो यथा- एकदा चत्वारः बालाः वने भ्रमन्ति स्म। तत्र ते एकं सुन्दरं जलाशयम् अपश्यन्। सः जलाशयः विविधवर्णपद्मपुष्पैः पूर्णः आसीत्। बालाः नितान्तम् आनन्दिताः अभवन्। 1। अत्र lake इत्यस्य कृते जलाशयपदस्य प्रयोगः कृतो वर्तते। तत्र ह्रदस्य प्रयोगः योग्य आसीत्। Pink, white, red, green and blue lotuses इति स्थाने विशिष्टवर्णानां नामोच्चारणं विना केवलं विविधवर्णपद्मपुष्पैः इति लघुना अनुवादः कृतः।

2.45. सार्थः

कन्नडसाहित्ये बहुश्रुतं नाम सन्तेशिवर लिङ्गणय्य भैरप्पवर्यस्य, यस्य धार्मिकसंस्काराः, सनातनसंस्कृतिनिष्ठचिन्तनं, महाभारतीयभावनाश्च प्रतिपदं प्रत्युपन्यासं विलसन्ति। विशेषतः अयमुपन्यासः भारतस्य अष्टमशतकदेशीये परिवेशे रचितो यस्य प्रत्येकं चरित्रस्य सम्बन्धः संस्कृतेन संस्कृतज्ञेन च वर्तते। हिन्दुधर्मस्तथा तस्यावान्तरशाखानां परस्परं संवादं विना नितरां वर्धमानो विवादोऽस्योपन्यासस्य मूलविषयो वर्तते। तस्य मध्ये त्यागपूतजीवनस्य अन्तःसलिला धारापि प्रवहति, या अस्मिन् विवदमाने परिवेशेऽपि स्वारस्यं स्थापयति।

उपन्यासस्य नायको नागभट्टो मण्डनमिश्रस्य भारतीदेव्याश्च प्रमुखशिष्यो भागिनेयोऽपि, यः प्रत्येकं विषयं साक्षात्कृत्य प्रकाशयति। स पठनशेषे बाल्यमित्रस्य अमरुकमहाराजस्य अनुरोधेन सार्थस्य निगूढतत्त्वं ज्ञातुं नवोढां पत्नीं परित्यज्य प्रस्थितः। वर्षद्वयात्परं तेन संवादः प्राप्तः- अमरुकेन तस्य पत्नी वशीकृता, तच्चिन्तया मातापि दिवङ्गता। नितरां खिन्नो नागभट्टस्ततः कृष्णकथाभिनये प्रसिद्धिं प्राप्य "कृष्णानन्द"नाम्ना प्रसिद्ध्यति, नायिकायां चन्द्रिकायां स्निग्धो भवति। किन्तु, व्रतचारिणी सा अस्य कामाग्निं न शमयति। ततः प्रतिनिवृत्तः कृष्णानन्दः योगाभ्यास-तन्त्रसाधना-बौधधर्माध्ययनेष्वपि असफलो भवति। कुमारिलभट्ट-मण्डनमिश्र-शङ्कराचार्यविवादस्य चन्द्रिकायाः पूर्वाश्रमकथायाः च श्रवणेन नितरां खिन्नः स पुनः कृष्णकथाभिनये प्रत्यागच्छति। ततः पारसिकैराक्रान्ते उत्तराञ्चले धर्मप्रचारार्थं नवजागरणार्थं च गतं तेषां दलं दण्डितं भवति। चन्द्रिका कथमपि देहदानेन कृष्णानन्दं मोचयति, गुरोराज्ञया सा कृष्णानन्दं परिणयति, कृष्णानन्दश्च तस्य पापमपि गर्भं स्वीकरोति। अन्तिमे कृष्णानन्दः स्मरति गुरुपत्न्याः मातुलान्याः भारतीदेव्याः अन्तिमं वचनम्, यदुपन्यासस्यास्य भरतवाक्यायते- "वैवाहिकजीवनमेकं व्रतम्।"

अत्याकर्षकं विषयचयनं पात्रनिर्वाचनं चोपन्यासमुच्चकोट्यां स्थापयतः। हिन्दुधर्मस्य तथा तदङ्गभूतजैनबौद्धादिधर्माणां तन्त्रयोगादिपद्धतीनां सारोपस्थानरूपं मूलविषयं स्वीकृत्य तत्र सार्थानां व्यवहारं, चन्द्रिकाकृष्णानन्दयोः प्रणयकथां संयोज्य लेखको नीरसे धर्मव्याख्याने स्वारस्यं सृजति, वारं वारं पठनस्य मोहमुपजनयति। उपन्यासं पठता मया चिन्तितं कदाचित् प्रथमोऽमुपन्यासः, यो धर्मस्य व्यवहारपक्षं पुनः लोकलोचनं प्रापयति। कुमारिलस्य धर्मभीरुत्वं, मण्डनमिश्रस्य कर्मकाण्डपक्षपातित्वं च तयोः ज्ञानालोकं भस्माच्छादितं करोति, प्रच्छन्नबौद्धस्य शङ्कराचार्यस्य अद्वैतकल्पनं, विष्णोरवताररूपेण बौद्धस्य ग्रहणञ्च सनातनधर्मस्य औदार्यं द्योतयति। वादे विजयिनोऽपि शङ्कराचार्यस्य जीवनं ज्ञानं वा अपूर्णमेव गार्हस्थ्यं विना इति सम्यक् निरूपयति कथाकारः। अत्र स्मरणीयं खलु श्रीमद्भागवतवचनम्-"धर्मार्थकामाः सममेवसेव्याः ...।" नवोढां परित्यज्य देशान्तरप्रस्थानं न समीचीनमिति कथयति कथानायकः। परस्त्रीसम्भोगसमयेऽपि तस्य मनसि वर्तते- "धर्मे चार्थे च कामे च नातिचरितव्या त्वया इयम् ...।" "कामातुराणां न भयं न लज्जा ...।"

इत्यादिसंस्कृतवाक्यानामुद्धरणं, तन्त्रपूजनसमये उद्धृताः मन्त्राः मूलकन्नडेऽपि संस्कृतेन सन्ति इत्यनुमीयते। तथा चेद् अयमुपन्यासः केवलं संस्कृत-संस्कृतिसम्पन्नानां संस्कृतज्ञानां कृते एव लिखित आसीदिति कथनं दुःसाहसो न स्यात्। एतादृशस्यापि उपन्यासस्य लेखनं विक्रयणञ्च प्रान्तीयभाषायां भवतीत्याश्चर्यमेव। यावदनुवादस्य प्रश्नः, अनुवादकः डॉ.नागराजरावः कश्चन प्रतिष्ठितः कथाकारः, यस्य सातत्येन प्रवहमाना लेखनी अनुवादेऽपि दक्षा एव। यद्यपि संस्कृतभारत्याः सरलीकृता संस्कृतशैली अत्र नास्ति, तथापि प्रान्तीयभाषाप्रभावाः क्वचित् क्लिष्टशब्दानां प्रयोगाश्चात्र विलसन्त्येव।

2.46. सिद्धार्थः

सिद्धार्थ इति मूलग्रन्थस्य लेखनं जातं १९२३ संवत्सरे जर्मनभाषायां दार्शनिकेन नोबेलप्रशस्तिभाजा हरमानहेसवर्येण। स स्वयं, तस्य पितृ-मातृ-मातामहाश्च भारते क्रैस्तधर्मप्रचारका आसन्निति पाश्चात्त्यदर्शनं तेषां सहजमासीत्। अपि तु सर्वमपि भारतीयदर्शनं तैः सर्वैः पठितमासीदिति तस्य साहित्ये प्राच्यदर्शनप्रभावः सर्वत्र लक्ष्यते। बह्वीभिः भाषाभिरस्य अनुवादो जातोऽस्ति। ९० वर्षेभ्यः परं बहुविलम्बेन वा भवतु नाम अस्य संस्कृतानुवादं प्रस्तुवन् मुनिकल्याणकीर्त्तिविजयः संस्कृतमात्मानञ्च पुनीते।

अत्र द्वौ विभागौ स्तः। प्रथमविभागे चत्वारो भागाः सन्ति– ब्राह्मणस्य पुत्रः, श्रमणैः सह, गौतमः, जागरणम्। द्वितीयविभागे अष्टौ भागाः सन्ति– कमला, प्राकृतजनमध्ये, संसारः, नद्यास्तीरे, नाविकः, पुत्रः, नुँ, गोविन्दः। प्रथमे विभागे द्वौ बान्धवौ सद्ब्राह्मणपुत्रौ सिद्धार्थः गोविन्दश्च स्वात्मप्रकर्षं साधयितुं यतेते। एवमारम्भो भवति अनुसन्धित्सायाः, "यद्यपि स्नानानि शुभान्यासन् तथापि तान्यङ्गान्येव क्षालयितुमलं न तु पापानि, नापि च व्यथितहृदयं शमयितुम्। यज्ञबलिदानादयो देवानां पूजाप्रार्थनाद्याश्च श्रेष्ठा एवासन् परन्तु किमेत एव सर्वस्वमासीत्, किं तैः सत्यं सुखमानन्दश्च प्राप्तुं शक्यो वा?" पृ.५। तदनु द्वावपि बान्धवौ पित्रनुमतिं बलात् प्राप्य श्रमणैः सह साधनां कृत्वा अणिम-लघिम-परकायाप्रवेश-त्राटक-वशीकरणादिसिद्धीः प्राप्य अपि ततः निर्गतौ गौतमं प्राप्तौ। तत्र गोविन्दः बुद्धस्य शरणं गतः। परन्तु सिद्धार्थ आत्मनो मोक्षार्थं ततः निर्गतः। बुद्धं प्रति तस्य वचनम्, "अतोऽहं विचारयामि यद् न कोऽपि जनः केवलमुपदेशश्रवणेनैव निर्वाणं प्राप्नुयात्, तथा हे भगवन्! भवच्चित्ते यदा ज्ञानप्रबोधो जातस्तत्क्षणीयां परिस्थितिं भवानपि न कमपि जनं शब्दैरुपदेशैर्वा विवरीतुं शक्तः। ... ...

स्वमार्गे एव गमिष्यामि, नान्यं श्रेष्ठं वा सिद्धान्तं धर्मं वा मृगयितुं, यतोऽहं जानामि यत्, – स नास्त्येव – किन्तु, सर्वान् सिद्धान्तान् गुरूंश्च परिहर्तुं तथैकाक्येव मम ध्येयं प्राप्तुं मर्तुं वा ... ...।" पृ.३७। स वारं वारं स्मरति स्म, नायमात्मा प्रवचनेन लभ्यः। एवं प्रथमविभागे सिद्धार्थस्य आत्मविकासो वर्णितः। द्वितीयभागे आत्मविकासनाम्ना स आत्मनाशं साधयति। समाजेन वारं वारं प्रवञ्चितः स प्रकृतितः शिक्षां लभते। अत्र आत्मान्वेषणतत्परस्य बुद्धदेवस्य समान्तरालेन सिद्धार्थस्य चरित्रं विकसितम्, यः स्वरीत्या आत्मविकासं साधयति, यस्य प्रधानसहायिका भवति प्रकृतिरेव। अन्ततः सः अवगच्छति– धर्मः अन्तःकरणादेव समुच्छलति, तं न कोऽपि शिक्षितुं शिक्षयितुं वा प्रभवति। उपदेशाज् ज्ञानं भवति, न तु प्रज्ञा। सत्यं स्वयमेव गवेषणीयम्। पूर्णसत्यं वक्तुं भाषायाः सामर्थ्यं नास्ति। मौनव्याख्यानमपि शिष्याणां संशयं दूरीकरोति। प्रेम एव सर्वश्रेष्ठम्। स्वमार्गः स्वयमन्वेषणीयः।

कमलां प्राप्तुं प्राकृतजनमध्ये कामस्वामीत्यादिभिः सह स सांसारिकव्यवहारैः नितरां भ्रष्टः पञ्चमकारान् असेवत। मद्यं द्यूतं वा तस्य सर्वस्वं जातम्। जीवितमूल्यं किमपि नावशिष्टम्। क्रोध-द्रोहासूया-हिंसापूरितः स एकदा पुनः संसारं त्यक्त्वा निर्गतः नद्यास्तीरे उपविश्य अतीतं स्मृत्वा आत्मावज्ञया मरणेच्छां प्राप्तवान्। "इदानीं स मृत आसीत् तत्स्थाने च गाढनिद्रातो जागृतोऽन्य एव सिद्धार्थ उद्भूत आसीत्। सोऽपि वृद्धो भूत्वा मरिष्यति। यतः सिद्धार्थो नश्वर आसीत्, सर्वाण्यपि स्वरूपाणि नश्वराणि आसन्। एवं सत्यपि अद्य स तारुण्येऽथवा बाल्ये वर्तमानो नूतनः सिद्धार्थ आसीत्, सर्वथा च सन्तुष्टः।" (पृ.१०९)

क्रमेण स्वस्थः स नद्यां मुग्धः सन् स्वात्मनः ध्वनिं श्रोतुं समर्थः अभवत्। नदीं ध्यायन् शृण्वन् स विश्वं प्रणवमयमशृणोत्। अनन्तरं नद्यां नाविके वासुदेवे च नितरां प्रीतिमान् स तत्रैव नाविकेन सह उषित्वा नौचालने तस्य सहायकः अभवत्। तदा बुद्धदेवस्य अन्तिमकालः सन्निहित आसीदिति तस्य शिष्याः अन्तिमदर्शनार्थं समागच्छन्ति स्म। तेन क्रमेण कमला पुनः तत्रागता मृता च लघुं पुत्रं विहाय। अधुना पुनः पुत्रप्रेम्णा मूढः स चिन्ताकुलो जातः। परन्तु सम्पन्नपरिवारे लालितः स कथमपि अस्य दरिद्रस्य पार्श्वात् पलायितः। तमन्विष्यन् पुनः नगरं प्राप्तः पुनः पुरातनानि दुःखानि नवीनतया अनुभूतवान्। तदा पुनः वासुदेवेन सह मिलित्वा प्रत्यागतवान्। पुनरेकदा पुत्रान्वेषणाय नद्याः पारं गत्वा स्वस्य प्रस्थानकाले अपि पितुरेवमेव

दुःखमभवदिति आत्मनानुभवति। वासुदेवः श्रवणकलानिपुणः। स्वदुःखं निवेद्य स शीतलतां प्राप्तवान्। तस्य मनसि सर्वं खल्विदं ब्रह्मेति भावना नरीनृत्यते स्म। स नद्यां प्रीणातीति सर्वं नदीमयं पश्यति। यो यच्छ्रद्धः स एव सः। निपुणं निरूपितं कथाकारेण– "तस्य सर्वा अपि व्यथाः चिन्ता दुराशाश्च यथा वासुदेवं प्रति प्रवहिताः पुनरपि च तं प्राप्ताः सन्तीति सोऽनुभूतवान्। स्वीयशल्यस्य तदग्रे निवेदनं नाम सर्वथा शीतलीभवनं यावन्नद्यां स्नानं, प्रान्ते च नद्यैक्यमेव। यथा यथा स कथितवान् आत्मनिवेदनं च कृतवांस्तथा तथा तेनानुभूतं यदयं नास्ति सम्प्रति वासुदेवः, नास्ति चायमितः परं कश्चन श्रवणनिरतो मनुष्यः, प्रत्युत सः अनुभूतवान् यदेष निश्चलः श्रोता, तस्यात्मनिवेदनं, वृक्षो वर्षाजलमिव, प्रतिलवं निपिबन्नस्ति, यदयं निःस्पन्दो जनः स्वयमेव नद्यस्ति ननु।" पृ.१४९। अत्रैव लेखकः वासुदेवस्य पात्रत्वं समाप्यं वनं प्रेषयति। तदनु पुनः गोविन्देन मेलनं भवति। सिद्धार्थः स्वजीवनसारं तस्मै निवेदयति– प्रज्ञायाः सङ्क्रमणं सर्वथाशक्यमस्ति। ... ... प्रत्येकं सत्यस्य विपर्ययोऽपि समानतयैव सत्यमेवास्ति।... ... कालः सद् द्रव्यमस्तीति– भ्रम एव कारणम्।... ... प्रत्येकं वस्तु पूर्णमेव, शुभमेव, ब्रह्मैव। अस्तित्वयुतं प्रत्येकं वस्तु शुभमेवास्ति– मरणं जीवनं चापि, पापं च पुण्यं च, वैदुष्यं च मूर्खत्वं चापि। पाषाणपूजनस्य मार्मिकीं व्याख्यां प्रस्तौति– "परिवर्तमाने जगति कदाचिदेष मनुष्यत्वं ब्रह्मत्वं चापि प्राप्तुं समर्थः, अत एव चास्य महत्त्वमस्तीति। किन्त्वधुनाहमेवं चिन्तयामि यदेष पाषाणखण्डः पाषाणस्त्वस्त्येव, एष पशुर्देवो बुद्धश्चाप्यस्ति। अहं तमेतदर्थं नैव पूजयामि प्रीणामि वा यदेष पुरा कश्चनासीत् भविष्ये चान्यविधः कश्चन भविष्यति, किन्तु स पूर्वमेव सर्वरूपोऽस्त्येव सर्वकालं चापि सर्वरूपोऽस्ति।" (पृ. १६०)

अत्रैव अवसितोऽयमुपन्यासः विश्वस्य सर्वमपि दार्शनिकं तत्त्वं कान्तासम्मित्ततया उपायनीकृत्य। अत्र प्रत्यध्यायं योजितानि आहत्य ३२ चित्राणि अध्यायवस्तु सम्यक् प्रतिपादयन्ति। अनुवादकेन प्रथमत उक्तमेवास्ति अयं भावानुवाद इति। तथापि साधुभाषया अनूदितोऽयं ग्रन्थ इति अनुवादकं धन्यवादैर्विभूषयामः। इतोऽपि विसन्धिं कृत्वा सारल्येन अनूदितश्चेदितोऽपि सुखपाठ्यमभविष्यत्।

2.47. सिंहावलोकनम्

सिंहावलोकनम् इत्यस्य कन्नडमूललेखकः डा.पि.एस्.रामानुजम् महोदयः, संस्कृतेन जनार्दनहेगडेवर्येण अनूदितं सम्भाषणसन्देशे

२०००संवत्सरे मार्चतः परस्मिन् वर्षे जनवरीपर्यन्तं प्रकाशितम्। मूलकथाकारः स्वयम् आरक्षिणां पुनः गुप्तचरविभागे कार्यं करोति, अतः तस्य कथासु औत्सुक्यादिगुणाः पूरिताः सन्ति। अनुसर्जकस्तु सरलतरलभाषया मूलानुगमनुवादं प्रस्तौति सकलजनबोधसौकर्याय। कथाकारस्य कथाश्रावणकौशलमत्र द्रष्टुं शक्या यत्र कथाकारस्य जीवनशैली निरूपिता प्रथमभागे-

1966तमवर्षस्य जुलैमासस्य चतुर्थः दिनाङ्कः मम जीवने अतिमहत्त्वोपेतः। यतः तस्मिन्दिने मया आदेशः प्राप्तः आसीत् यत् ऐ.पि.एस्.पदप्राप्त्यर्थम् अभ्यर्थित्वेन शिक्षणप्राप्तुं मस्सूरिं प्रति आगन्तव्यम् इति। ग्रामे जातेन मया दिल्लीम् अपि अतिक्रम्य मस्सूरिः प्राप्तव्या आसीत्! कन्नडपरीक्षाम् उत्तीर्य संस्कृतस्नातकोत्तरपदवीं प्राप्य पि.एच्.डि.पदव्यर्थम् आगन्तव्यम् इति आदेशः प्राप्तः आसीत्यत्तत्। विश्वासानर्हविषयत्वेन भासते स्म। अतिसम्प्रदायनिष्ठे परिवारे जातः अहं ग्राम्यः आसंव्यवहारेण नारिकेलवृक्षारोहणं, नारिकेलफलस्य त्वग्विमोचनं, नारिकेलकृषिः इत्यादिषु सर्वेषु कृषिव्यवहारेषु अहं निपुणः आसम्। तत्समकाले एव पितुः सकाशात् काव्यानि, काव्यमीमांसा, दर्शनानि, पाणिनीयव्याकरणं, प्राचीन-कन्नड-काव्यानि इत्यादीनि पठित्वा 'पण्डित'जीवनार्थम् आत्मानं सज्जीकुर्वन् अपि आसम्। एतदवसरे एवम् ऐ.पि.एस्.पदवी प्राप्तव्या इति महत्त्वाकाङ्क्षाम् अपि हृदये वहन् अपि आसम्। तेषु दिनेषु ऐ.पि.एस्.परीक्षायाः विषये विवरणं दातुं समर्थः कोऽपि न आसीत्मैसूरुनगरे। परीक्षा नाम का, सा कैः कुत्र चाल्यते, तदर्थं कीदृशः सन्नाहः करणीयः इत्यादिकं कोऽपि न जानाति स्म। ज्ञाता कदाचित्स्यात् अपि, किन्तु संस्कृतस्नातकोत्तरपदवीं पठन् अहं तादृशं कमपि न जानामि स्म। अतः तस्याः परीक्षायाः विषये मम मनसि विलक्षणा कल्पना आसीत्। तस्याः परीक्षायाः उत्तीर्णतायै बुद्धेः अपि मांसखण्डशक्तिः एवं अधिकोपकारकारिणी इति भ्रमः कश्चन मयि आसीत्। अतः मल्लयुद्धम्, खड्गचालनम् इत्यादिषु श्रमसाध्येषु व्यापारेषु दशाधिकवर्षाणि आत्मानं प्रवर्तितवान् अहम्।

कदाचित्मार्गे गच्छन् अहं प्राचीनपुस्तकापणं कश्चित्दृष्टवान्। ऐ.पि.एस्.परीक्षाविवरणम् अन्विष्यता मया तत्र यु.पि.एस्.सि.परीक्षापुस्तकम् एकं दृष्टम्। तत्र ऐ.पि.एस्.परीक्षाविवरणम् अपि आसीत्। अहं सन्तोषेण नृत्यं कृतवान्। "किं मूल्यम् एतस्य?" –आपणिकः पृष्टः मया। "षड्रूप्यकाणि" –

इति उक्तम् आपणिकेन। महत्याः चर्चायाः अनन्तरं रू.४-५० दत्त्वा तत्क्रीतं मया। गृहं गत्वा तत् आन्तं पठितम्। परीक्षासम्बद्धानि सर्वाणि विवरणानि ज्ञातानि। ततः यु.पि.एस्.सि.केन्द्रतः आवेदनपत्रम् आनायितम्। ततः ज्ञातं यत्केषाञ्चित्मासानाम् अनन्तरं परीक्षा सम्भविष्यति इति। (सम्भाषणसन्देशः-फेब्रुवरी-२०००, पृ.२०)

2.48. सृष्टिः

कथाकार(1970ई.) इति पत्रिकायाः सफलसम्पादकः, श्रीचन्द्रशेखरदासवर्मा(1945ई.) अर्वाचीन-ओडिआसाहित्ये दशकत्रयात् लेखनीं व्यापारयति। 15 कथाग्रथानां 5 नाटकानां 5 अनूदितग्रन्थानां प्रणेता अयमर्वाचीनेषु लब्धप्रतिष्ठेषु उत्कलीयकथाकारेषु अन्यतमो वर्तते। 1999 ईसवीयसंवत्सरे केन्द्रसाहित्येकादम्या अनुवादपुरस्कारेण सभाजितोऽयं विविधसंस्थाभिरपि सत्कृतो वर्तते। "अन्यमणिष" इति अस्य प्रथमकथासङ्ग्रहः प्रकाशितः 1983ई.संवत्सरे। अस्य केचन ग्रन्थाः हिन्दी-आङ्ग्ल-वङ्गला-अहमीया-संस्कृतभाषाभिरनूदिताः सन्ति। तस्य "पाषाणीकन्या" तथा "वोमा" इति कथासङ्ग्रहद्वयात् 12 कथाः चित्वा अस्मिन् सङ्ग्रहे श्रीदाशेन अनूदिताः सन्ति। एताः कथाः प्रथमतः कथासरितः द्वितीयतरङ्गे (अक्तुवर, 2005ई.) प्रकाशिताः। अनन्तरं पुस्तकाकारेण प्रकाशयति 2005ई. ब्रह्मपुरात्, वासन्ती इति प्रकाशनसंस्था।

अत्र प्रथमायां "दिग्हीनः" इति कथायां कथानायकः प्रकाशः पत्न्याः जन्मोत्सवे कार्यालयात् शीघ्रमेव प्रत्यागन्तुं प्रतिश्रुत्य मार्गे मित्रस्य राजेशस्य आग्रहेण द्यूतक्रीडायां मग्नो भवति। अन्ततोगत्वा स पणेन पराजितः सर्वस्वं त्यजति तत्र। एवं धनस्याभावेन पत्न्यै उपहारप्रदानाभावेन जायमानैः मानसिकसन्तापैः, पश्चातापैः, वेदनाभिश्च संयुक्तायामस्यां कथायां वर्णनात्मकशैल्या कथाप्रसङ्गानां दृश्यात्मकताः यथार्थताश्च चित्रिताः सन्ति। आत्मकथनात्मकशैल्या लिखितायाः "आहतमूर्च्छना" इत्यस्याः कथायाः प्रारम्भः मनोवैज्ञानिकयथार्थेन सह कुर्वता लेखकेन कथायाः विकासः वर्णनात्मक-संवादपरकशैलीभ्यां कृतः। कथानायिका लक्ष्मीः ग्रामस्य प्रदूषणमुक्तस्वच्छप्राकृतिकपरिवेशं नगरापेक्षया श्रेयस्करं कथयन्ती ग्रामे एव निवासस्याकांक्षां प्रकटयति। परिवारं प्रति पूर्णतः समर्पिता वधूः लक्ष्मीरेव अस्य गृहस्य सुखसमृद्धिसौहार्दानाम् आधाररूपाऽस्ति। निःसन्ताना सा मिश्रमहोदयेन प्रस्तावितं पत्युः शिवस्य पुनर्विवाहमनुमोदते। परन्तु अनेन

प्रस्तावेन कुपितो भवति शिवः। एवमेव परिवर्तनशीलानां पारिवारिकपरिस्थितीनां स्वाभाविकं चित्रणमत्र लक्ष्यमस्ति। "अग्नि"रिति तृतीया कथा व्यक्तिपरकतया कस्याश्चिद् विवाहितायाः गर्भवत्याः युवत्याः मनोवैज्ञानिकं यथार्थं प्रस्तौति। "शिशुगृहम्" इति कथायामनाथाश्रमसम्बद्धानां विविधपक्षाणां रुचिपूर्णं वर्णनं लभ्यते। "द्वौ बान्धवौ" इति कथा नैतिकपतनेन कथं चिरकालिकी मित्रतापि समाप्ता भवति इति निर्दिशन्ती प्रभावपूर्णान्तेन सफला दृश्यते। वेश्यावृत्त्या जीवनं निर्वहन्तीनां नारीणां जीवनचर्य्याम् उद्घाटयन्त्यां "सप्ताहस्य सप्त दिनानि" इत्यस्यां कथायां प्रत्येकं पात्रस्य भिन्नभिन्नजीवनपरिस्थितयः वर्णनात्मकशैल्या अङ्किताः सन्तिः। तस्मिन् वर्गे सहजसंवेदनां प्राप्तवान् लेखकः। "सृष्टिः" इति ग्रन्थशीर्षकीभूतकथायां ग्रामीणपरिवेशस्य निम्नवर्गीयजीवनस्य च वर्णमयचित्रणं दृश्यते। कथानायको विशुनिः क्षेत्रे परित्यक्तं कस्यचन सद्योजातं शिशुपुत्रं नीत्वा विविधाभिराशङ्काभिः सह गृहं प्रविशति। घटनाप्रधानायामितिवृत्तात्मककथायां "जीवनदर्शनम्" इत्यस्यां हिन्दु-महम्मद-प्रतिवेश-परिवाराणां परस्परं मित्रता नैकैः प्रसङ्गैः समर्थिता। नियमिततया छागकर्तकस्य मुशिरमिआँ इति महम्मदीयस्य चरित्रस्य हृदयपरिवर्तनं मार्मिकतया वर्णयति कथाकारः। अनाथाश्रमे पालितस्य पोषितस्य च प्रशासनिकाधिकारिणः श्रीनायारस्य निरलसा जीवनगाथा प्रस्तुतास्ति "अनाथाश्रमः" कथायाम्। एकस्मिन् पक्षे तस्य कर्तव्यपरायणतायाः अनुशासनस्य प्रशंसा कृता, अन्यत्र मानवीयमृदुस्वभावस्य वर्णना विहिता। अत्र स्वीकृता पत्रशैली श्लाघनीया एव। आत्मकथात्मकशैल्या रचितायां "मतदानम्" कथायां स्वार्थवशात् दलपरिवर्तनं कुर्वतां नेतृणामुपरि व्यङ्ग्यं वर्तते। कुतूहलभावपूरितायां "सनातनश्चिन्तयति स्म" इति कथायां कथानायकस्य कर्मठतां निरूपयति कथाकारः। सर्वोपरि उत्तमानुवाद एव अस्य सङ्ग्रहस्य स्वारस्यं प्रगुणीकुर्वति इति पुनर्वक्तव्यं नास्ति।

2.49. सौन्दर्यस्रोतस्विनी नर्मदा

सौन्दर्यस्रोतस्विनी नर्मदा अमृतलालवेगडकृता प्रवीणपण्ड्यानूदिता। यद्यपि कविचित्रकरयोर्मध्ये महान् भेदो नास्ति, तथापि कविकल्पितमितोऽपि रेखाङ्कितं प्राणयुतं कर्तुं शक्नोति चित्रकरः स्वीयप्रलम्बशब्दाङ्कनीभिः वर्णमयं कान्तिमत्खण्डमेकं पाठकस्य नेत्रयोः

पुरतो निरूपयद्भिरात्मतोषं लभते इति वक्तुं शक्यते। शान्तिनिकेतने नन्दलालवसोः शिष्यः, महान् गान्धिवादी, लब्धसाहित्येकादमी-काकाकालेरकरपुरस्कार-महापण्डित-राहुलसांकृत्यायनपुरस्कार-मध्यप्रदेशशिखरसम्मानः, नाट्यकारः, लेखकः हिन्दीगुर्जरभाषी, जबलपुरवासी अमृतलालवेगडवर्यः (१९२८) "सौन्दर्य नी नदी नर्मदे" इति भ्रमणकथाग्रन्थं लिखित्वा तदेव प्रमाणितवान्। अयं ग्रन्थः प्रवीणपण्ड्यामहोदयेन अनूदितः साहित्येकादम्या च प्रकाशितः। मूललेखकेन कृतायाः नर्मदापरिक्रमायाः अयं द्वितीयो भाग इति उत्तरनर्मदाचरितम् इति नाम्ना प्रसिध्यति। वस्तुतः श्रद्धावन्तो जनाः, देवीज्ञानेन नदीमातृकां गङ्गायाः अपि ज्येष्ठां नर्मदां पूजयन्ति, प्रणमन्ति, तस्याः जलेन जीवन्ति, मृत्युकाले अपि तज्जलं स्वीकुर्वन्ति, तस्याः नियमपूर्विकां परिक्रमामपि कुर्वन्ति। लेखकस्य तथा नियमबद्धता नासीत् तथापि सौन्दर्यपिपासुरयं परिक्रमां त्यक्तुं न शक्तवान्। सप्तत्युत्तरवयःक्रमेऽपि सः क्रमशः खण्डशः परिक्रमार्थं निर्गतः। तद्भावास्तच्छब्दैर्यथा – शतेभ्यः समाभ्यः सहस्रं श्रद्धालवो नर्मदां परिक्रामन्ति। ... ... प्रायः २६०० किलोमिटरमितदीर्घायाः यात्रायाः मध्ये १८०० किलोमिटरमितयात्रायाः वर्णना मया मदीये प्रथमपुस्तके – परिक्रमां नर्मदा मैयानी – इत्याख्ये कृता। शिष्टायाः ८०० किलोमिटरमितायाः यात्राया वर्णनमस्मिन् पुस्तकेऽस्ति। ... ... तन्नाम नर्मदासौन्दर्यस्य सांस्कृतिकः संवाददाता। पदादस्माच्च्यावनं मे दुष्करं ननु। पदेऽस्मिंस्तु यावज्जीवनं स्थास्यामि, कदाचिन्मरणान्तरमपि।(पृ.९)। नर्मदायाः स्वलेखनस्य च वैशिष्ट्यं प्रतिपादयन् मूलकथाकारो वदति, नर्मदाया अन्या विशिष्टता यदियम् अत्यन्तरमणीया नद्यस्ति। गङ्गाऽपि रमणीया, परं हरिद्वारं यावदेव। ततः पश्चात्तु सा समतले प्राङ्गणे कुल्येव वहति। नर्मदा तु वहति पर्वतेभ्यः, काननेभ्यः, गर्तेभ्यः सुन्दरातिसुन्दराणां च प्रपातानां रचनां कुर्वती। कदाचिदपि नदीनां सौन्दर्यस्य प्रतियोगिता समायोजयिष्यते, तर्हि सर्वोत्तमः पुरस्कारो नर्मदयैव प्रापयिष्यते। अतो मम हिन्दीपुस्तकस्य नामास्ति – सौन्दर्य की नदी नर्मदा। ... ... न हि मया नर्मदापुराणं किमुत रेवामाहात्म्यं लेखनीयमिति आदावैव निश्चयः कृत आसीत्। युगेऽस्मिन् तस्य आवश्यकताऽपि नासीत्। मया नर्मदाया जीवनचरितं लेख्यम् – सचित्रं प्रामाणिकं च जीवनचरितम्। एतदर्थं मया सा पद्धतिरवलम्बिता,

याऽद्यतनस्य जीवनचरितलेखकैः प्रायराश्रीयते। यस्य चरितं लेख्यं, तेन सह पौनःपुन्येन मेलनं, साक्षात्काराः, टिप्पणलेखनं, प्रवासाः, तत्सर्वैण लब्धतथ्यानुसारेण लेखनमिति। मयाऽपि एतदेव कृतमस्ति। नर्मदासौन्दर्यं मया स्वयं दृष्टमस्ति। अतो मम नर्मदा न खलू कर्गदलिखिता, परम् अक्षिभ्यां दृष्टाऽस्ति।पृ.१७७-८।

लेखको मध्ये मध्ये विविधोदाहरणैः साम्प्रतिकविषयैः प्रत्यग्रीकृतां सामग्रीं निवेदयति – आङ्ग्लभाषाया विख्यातलेखकेन आर.एल.स्टीवेन्सेन फ्रान्सदेशे पार्वतगर्दभेन सह लघ्वी पदयात्रा कृताऽऽसीत्। तद्वर्णनं तेन तत्पुस्तके ट्रावेल्स विथ ए डङ्कि इत्याख्ये प्रदत्तमस्ति।पृ.३७। अयं जनो गवा सह नर्मदायाः परिक्रमेति पुस्तकं लिखेत्, नूनं रोचकं भविष्यति। अस्य पुस्तकस्य प्रकरणानि कानिचन इत्थं भवितुमर्हन्ति – गौः किं चिन्तयति यदा भिल्लैर्लूण्ठिता गौः, परिक्रमावासिनी गौर्नौकायाम्, इत्यादीनि।... ... तदैव गोः स्वरः कर्णगोचरतां गतः। मया गन्तव्यम्। मम गौर्मामाकारयति। एतच्चारणाय समयो जातोऽस्ति।पृ.३७। इतः यात्राकथालेखकस्यापि बहुश्रुतत्वस्य बहुपाठित्वस्य च कियद् ज्ञानमपेक्ष्यते इति स्पष्टं ज्ञायते। शैली तस्य नितान्तं मनोहारिणी। उदाहरणार्थं काककथा तस्य प्रस्तूयते।

अस्माभिः अस्मत्सम्भारं गृहीत्वा चलितम्। (अधुना न तद्वयोऽस्ति, नो चेन्मया काकानधिकृत्य पी.एच.डि. क्रियेत। विषयः स्यात्- काकेषु बुद्धिचातुर्यम्: उत्थानं पतनं च। रामायणकालात् काकभुशुण्डित आरभ्य पञ्चतन्त्रपर्यन्तं काकानां सुवर्णकाल आसीत्। युगेऽस्मिन् काका विहगानां मुकुटायमाना अभूवन्। Crow शब्दादेव Crown शब्दो निस्सृतः स्यात्। नाद्यतनकाकेषु प्राग्वत् पाण्डित्यमवशिष्टम्। सम्प्रति तु ते केवलं काकध्वनिं कर्तुमेव जानन्ति। प्रत्यभासद् यदेकस्य अज्ञातकुलशीलस्य काकस्य व्यवहरणान्न मया इदमित्थं वक्तव्यम्। अन्यं ग्रामं गत्वा तत्रत्येषु काकेषु मयैषैव वार्ता प्रसारणीया। परम् अन्ते स विचारो निरस्तीकृतः। प्रतीतं यत्काकास्तु सर्वत्रैव कृष्णा एव।(पृ.९६)।

अत्र मूलतः २४ अध्यायाः सन्ति। परिशिष्टे अध्यायद्वयम्। अस्य अनुवादकलापि दर्शनीया। प्रथमाध्याये परिक्रमार्थं स्वीयाकर्षणमित्थं निरूपयति- छेस्सा थोडा समयथी बुद्धि खने भावना वह्ये हुं भींसाढ रह्यो हतो। भावना कहेती हती- नर्मदाकांठामी छेस्सी पदयात्रा कर्ये मव नव वर्षना वहासां वीती गयी। याह छे छेस्सी यात्रा वेजा तें नर्मदाने शुं कहेसुं? कहेसुं के

सजवुं भे के खहीं पूरुं करुं छुं, वनशे तो वाकीनी परिक्रमा पूरी करीश। कहेसुं के नहीं? खने हवे साव भूली गयी? भरा शरमा खने घरथी जहार नीकज।(गुर्जरमूलम्-पृ.1)। व्यतीतात् कस्माच्चित् कालाद् अधिबुद्धिभावनं खल्वहं द्वैतदष्टोऽभवम्। भावनया प्रौद्यत, नर्मदातटस्य तेऽन्तिमयात्राया वत्सराणां नवस्य कालो व्यतीयाय। किन्नु स्मर्यते नर्मदां प्रति तत्काले त्वत्कृतो वाच्छपथः? भणितमभूद् यल्लेखनमत्रैव समाप्यते, परं सत्यां शक्यतायां शिष्टा परिक्रमा पूरयिष्यते। भणितं वा न वा? अथ च सम्प्रति सर्वथा विस्मरसि। किञ्चिल्लज्जताम्, गृहाच्च बहिर्निगम्यताम्।(संस्कृतम्,पृ.११)

जबलपुरे सोपानपथं क्रममाणोऽत्युच्छ्वासोऽभवम्, अत्र पीठे भारमूढ्वा नर्मदाया दण्डायमाने तटान्ते समुच्चभूखण्डेषु च बहुवारं रोहणावरोहणं करोमि, परं नाल्पीयानपि अत्युच्छ्वासः। ममाभाद् यदत्राहं वृद्धाद् गोर्युववत्सो जातः। आभाणक एकः स्मृतः–

चलता फिरता ना मरे, बैठड़ा मर जाए।
और बैठड़ा भी ना मरे, जो थोड़ा थोड़ा खाय॥
(नाप्नोति निधनं गच्छन्, तिष्ठन् मृत्युं नरो याति।
तिष्ठन्नपि मृतिं नैति, योऽल्पमल्पं हि खादति॥) (पृ.१८)।

परिक्रमा यात्रा वा भवति कार्यशीलतायाः प्रतीकभूता। तया नवोत्साहो जायते। यथा कथाकारो मन्त्रयते स्वयं- यात्रायामस्याम् अष्टसु दिनेषु किलोमीटरस्य अशीतिं यावत् पदयात्रा कृता। तापाऽऽतपयोरुपेक्ष्य रिक्त उदरे चलितम्। यात्रयाऽनया मनसि नवोत्साहः सृष्टो यदहमद्यावधि जराजीर्णो नास्मि। अस्मिन् वयस्यपि नर्मदातीरस्य यात्रां विधातुं क्षमे। यात्राया इयं परम्परा न स्थगयितव्या। बुद्धेराज्ञामनुपाल्य गृहसंस्थित एवाभविष्यं चेदेतादृशान्महत्सुखाद् वञ्चितमभविष्यम्। बरमानघट्टस्य विशाला घट्टाः, छोटा-धुआँधारस्य प्रीतप्रीता नर्मदा, पुतलीखोहस्य (पुत्तलिकागुफायाः) प्रागैतिहासिकानि चित्राणि, गुरुगुफाया अद्भुतं शैलशिल्पम्, आश्रमस्य महात्मानो, व्यापके पट्टे पार्श्वं परिवर्तयन्ती नर्मदा, अस्यास्तटा, अगवाक्षः सम्पूर्ण आकाश, आकाशं च लालयन् गतरात्र्याश्चन्द्रः – एतत्सर्वं मम च्युतमभविष्यत्। यात्राया अस्या एकः पाठो महार्घो मयाऽभिज्ञातः, बुद्धेर्नितान्तावलम्बो दुष्ठु। अस्मत्स्वप्नान् साकारयितुं बुद्धिर्बाधेत चेत्तस्यै द्वाद्र्शयितुं सङ्कोचो न करणीयः, बुद्धेरप्रतिहतशासनं न

मन्तव्यम्। जीवने किञ्चित्तु स्यादेव, यद् बुद्ध्याऽतिक्रान्तं तिष्ठेत्, तर्कमुक्तं भवेत्। (पृ.२६-२७)।

तटान्ते शीतलसमीरे पान्थः लेखकः कथमात्मवञ्चनया रात्रिं यापयतीति श्रोतव्यमेव आकबरकथाव्याजेन – पर्यन्त एक उपायः प्रत्यभात्। निर्जनं रहश्चासीत् स्थानम्। रात्रिश्च तमसाच्छादिता। अतो दीपिका ज्वलन्ती स्थापिताऽभूत्। उपरि स्थापितां मृत्तैलदीपिकामवतार्य पार्श्वे किञ्चिद् दूरे स्थापिता, यतो हि अग्निभयं न भवेत्, किञ्चिद् औष्ण्यमनुभूतम्। तस्माद्धि एका सिक्थकवर्तिकाऽपि ज्वालिता। अहो आश्चर्यम्! क्षणे गते हि निद्रा मां व्याप्नोत्।... ... कृषकः क्षेत्रे चञ्चाः संस्थाप्य विहगान् परावर्तयति। मया दीपिकाया सिक्थकवर्तिकायाश्च चञ्चा विधाय शीतं परावर्तितम्। खरतरं सत्यं त्विदमस्ति यत्, चञ्चाः शीताय न, मत्कृतेऽभूवन्। एतेषां साहाय्येन मया मे मनस्तः शैत्यभीतिर्निस्सारिता। स्यान्नाम यत्किमपि, परं निद्रा मे समागता। शीतर्ता आनिशं तटागे स्थितं जनम् अकबरबादशाहो निजगाद यत्तेन दूरस्थदीपस्य ऊष्मणा रात्रिर्व्यपगमिताऽस्ति। ऐदम्प्रथमतयाऽद्य तत्कथने कश्चित् सारो मेऽभात्। पृ.२१।

धावडीकुण्डस्य वर्णनं त्यक्त्वा अग्रे समीक्षकेणापि मया गन्तुं न शक्यते - ध्वनिना गत्या च कियत् सजीवीकृतमस्ति कुण्डमिदम्। प्रपातेष्वेव नर्मदा द्रष्टुं शक्यते तत्सकलसौन्दर्येणान्विता। प्रपातस्तन्नाम नद्या तुषार-कणानां रूपे दीयमानोऽर्घ आकाशाय। प्रपातस्तन्नाम नद्या रणदुन्दुभिः। प्रपातस्तन्नाम नद्या यौवनम्। प्रपातस्तन्नाम जीवनस्य कल्लोलः! पृ.35। ... .धावडीकुण्डं तन्नाम प्रपातानां -डिपार्टमेंटल स्टोर्- वर्तते। स्वरुचेः प्रपातश्रीयताम्, तत्प्रचण्डप्रवाहो विलोक्यताम्, तद्गर्जनं श्रूयताम्, तज्जलकणप्रक्षेपेषु आर्द्रीभूयताम्, स च प्रपातः स्वीक्रियताम्। ... ... धावडीकुण्डतोऽपि एतादृश्येव दूरे नर्मदा वहति, परमत्रत्याः शिलाः कृष्णवर्णीया सन्ति। खिलः परिवेशस्तादृश एव, यादृशो भेडाघट्टे वर्तते। उच्यते, इतिहासः स्वात्मानमावर्तयति। एष एव चमत्कारो भूगोलेन दर्शितोऽत्र। यदा प्रपातानां स्मृतिर्भविता, द्रष्टुं मनो भविता, तर्हि धुआँधारं गन्तास्मि। विचारेणामुना प्रपातेभ्यो वियोगस्य दंशो न्यूनीजातः। एवं सत्यपि इतः प्रयाणवेलायां भूयोभूयो ग्रीवाभङ्गपुरस्सरं पश्यता मया न्यगद्यत, इतोऽप्येकवारं पश्यामि, इतोऽप्येकवारम्। पृ.३९।

ममाभात्- अद्य नभसि चन्द्रो राजस्नानं कुरुते। एकल एव। पूर्णिमाया रात्रिस्तन्नाम चन्द्रमसो राजस्नानस्य शर्वरी। नान्यः कश्चन ग्रहो नक्षत्रं तारको वा स्नातुमर्हति। चन्द्रमसो बहुदूरं, क्षितिजसमीपे कश्चन तारकश्चौर्येण स्नायाच्चेत् सा भिन्ना कथाऽस्ति। पृ.४३।

यद्यपि प्रवीणपण्ड्यावर्यस्य संस्कृतमर्यादया परिनिष्ठिता अनुवादकला अशोच्या एव तथापि बहुत्र सा अनुवादच्छटा मूलादुत्कृष्टतरा संस्कृतमूलमिव प्रतिभाति। किञ्चिद्दर्शनीयं तर्हि – ... ... प्रभाते याता अग्रे। पदवी यवप्रियङ्गुक्षेत्राणां मध्याद् गच्छति। हस्तिनो लूताः स्युः, तादृशाः प्ररोहाः सन्ति। परिपूर्णां शस्यधानीं वीक्ष्य मनः प्रीतप्रीततरं जायते, परं भूयान् मार्गस्तु नद्यास्तटे तटे, अधस्तात् नदीपटे भूत्वा। पृ.१४। ... ... तादृक् शैत्याधिक्यं यन्निद्रा नायात्येव। पार्श्वपरिवर्तनानि कृतानि, जानुनि भूयः समर्पितं चिबुकम्, आनखशिखं धृतम् आच्छादकम्, परं व्यर्थायितं सर्वम्। यद्यपि मूलकथाकारः मूलतः चित्रकारो वर्तते, यः खलु न केवलं पट्टचित्रमपितु शब्दचित्रमपि निर्मातुं शक्नोति, तस्य ग्रन्थे पदे पदे चित्राणि आसन्। अत्र तेभ्यः केवलं १६ चित्राणि स्वीकृतानि सन्ति। हन्त, अत्रापि सर्वाणि चित्राणि आगतानि चेत् कियत् सुन्दरमभविष्यत्।

2.50. स्वामी विवेकानन्दः

लिओटालष्टाय-रोमारोलाँ-रवीन्द्रनाथादिभिरयं विश्वविश्रुतश्चिन्तकः स्वामिविवेकानन्दो बहुधा वर्णितः। पारम्परिकतया सह आधुनिकतायाः मधुरं मिश्रणं स्वामिनः चरित्रं प्रगुणयति। वङ्गभाषया निमायिसाधनबोसवर्येण १९९४ संवत्सरे लिखितः अयं जीवनीग्रन्थः स्वामी विवेकानन्द इति विंशतिवर्षेभ्यः परं सफलतया अनुवादिकया डॉ.सरिताकृष्णशास्त्रिणा २०१४ संवत्सरे अनूदितः, साहित्य-अकादेम्या च प्रकाशितः। ग्रन्थगौरवविषये मूललेखकस्य मतमस्ति यत्- स्वामिनो विवेकानन्दस्य जीवनस्य बहुमुखसिद्धीनां च वर्णनं परिमितशब्दैः करणम् इत्येतद् आह्वानपूर्णं कार्यम् अस्ति। .... एतस्मिन् लघुजीवनचरित्रे तस्य प्रमुखप्रमाणभूतजीवनचरित्राणां तथा च तत्सम्बन्धानाम् अनुसन्धानानां निष्कर्षान् समावेशयितुम् अहं प्रायते। अहम् आशासे यत् विवेकानन्दस्य वर्णमयजीवनस्य तथा च राष्ट्रनिर्माणे तस्य भूमिकायाः व्यापकं चित्रं सामान्यवाचकाः प्राप्स्यन्ति। (प्रस्तावना, पृ.५)। अत्र अनुवादिकायाः अभिमतं नास्ति। अतः अनुवादशैलीज्ञानार्थं पठनमेव शरणं प्रतिभाति।

अत्र अष्टादशप्रसङ्गा उल्लिखिता, ये भागद्वयेन विभाजयितुं शक्याः। पृष्ठभूमिकातः उपसंहारं यावद् एकादशखण्डेषु स्वामिनो विवेकानन्दस्य जीवनचरित्रं निरूपितम्। गुरुः आरम्भः च, भारतस्य अन्वेषणम्, पश्चिमे लक्ष्यसाधनं, साहित्यिककृतयः, दृष्टिः लक्ष्यं च, राष्ट्रस्य पुनारचनायाः निमित्तम् आह्वानम् इत्यादिषु प्रसङ्गेषु लेखकः विविधग्रन्थान् विमृश्य स्वमतं प्रतिपादयति। अन्तिमे परिशिष्टरूपेण स्वामिनो विशिष्टं मतं पृथक् पृथक् सप्तविषयेषु अनूदितं वर्तते। स्वामिनो विवेकानन्दस्य लेखनेभ्यः उद्धृतांशाः, अन्तिमसत्रे कृतम् उद्बोधनम्, स्वदेशमन्त्रः, पूर्वा पश्चिमा च इत्यादयः तत्र प्रमुखाः सन्ति।

सत्यमेव लेखकेन प्रतिपादितम्- रामकृष्णविवेकानन्दान्दोलनेन भारतीयसाहित्यस्य इतिहासे विशेषतया वङ्गसाहित्यस्य इतिहासे नूतनस्य युगस्य आरम्भः कृतः अस्ति। विवेकानन्दः एव तस्य आदर्शरूपस्थापकः वेगवर्धकः च आसीत्। विवेकानन्दस्य स्वीयानि लेखनानि, श्रीरामकृष्णविवेकानन्दयोः विषये अन्यैः लिखितानि पुस्तकानि, तयोः कृतयः, कल्पनाः च अनेकभारतीयभाषाभिः प्रकाशितानि। सङ्ग्रहरूपेण तस्य साहित्यस्य निर्देशः रामकृष्णविवेकानन्दसाहित्यम् इति क्रियते। (पृ.७७)। विख्यातः साहित्यसमीक्षकः डॉ.श्रीकुमारवेनर्जी अलिखत्, यथा बङ्किमचन्द्रचटर्जी, माइकेलमधुसूदनदत्तः, रवीन्द्रनाथठाकुर इत्येतेषां तथैव विवेकानन्दस्य अपि एकः पादः स्वदेशस्य भूमौ दृढमूलः आसीत् तथा च अपरेण पादेन स पाश्चात्त्यरिक्थस्य समृद्धानि वैविध्यमयानि क्षेत्राणि चरति स्म। चिन्तनसंस्कृत्योः युगलमण्डलयोः आदर्शपरिपूर्णमाध्यमरूपेण स कार्यम् अकरोत्। तस्मिन् ये पाश्चात्यप्रभावाः आसन् तेषां तस्य मूलसर्जकशक्तिभिः सह सम्मिश्रणस्य परिणामः आसीत् तस्य आङ्ग्लभाषाप्रभुत्वम्। (पृ.७८)।

दृष्टिः लक्ष्यं च, राष्ट्रस्य पुनारचनायाः निमित्तम् आह्वानम्, उपसंहारः इति भागेषु स्वामिनो व्यक्तित्वं कार्यमाह्वानं लक्ष्यं च वर्णितानि सन्ति। सत्यमेव भारतीयपद्धतेः अथवा श्रद्धायाः मूलम् उपनिषत्सु, बुद्धोपदेशेषु, भक्त्यान्दोलनस्य सत्पुरुषेषु, अन्येषु दष्टृषु ऋषिषु च अस्ति। रामकृष्णविवेकानन्दयोः जीवनाभ्याम् उपदेशैः च आधुनिकभारते पूर्वोक्तैः मूलभूतांशैः नूतनाः आयामाः, नूतना प्रभा, नूतना शक्तिः च प्राप्ता।

(पृ.१११)। अन्तिमे भागद्वयेन सन्दर्भरूपेण ३० पुस्तकानां सूची वर्तते। अत्युत्तमानुवादेन ग्रन्थोऽयं महीयते।

2.51. हिन्दस्वराज्यम्

हिन्दस्वराज इति ग्रन्थः महात्मना गान्धिना १९०९ संवत्सरे लिखितो यत्र तस्य तात्कालिका विंशतिः विचारा देशपरका विदेशपरकाः संस्कृतिनिष्ठाश्च विलसन्ति। बहवो गुणदोषाश्चात्र विवेचिताः, तत्सर्वमाचरणीयमिति। स्वयं गान्धी ग्रन्थविषये वदति, "पुस्तकेऽमुष्मिन् आलेखितकार्यक्रमस्य एक एवांशः सम्प्रति आचर्य्यते, स च अहिंसायाः। परं सखेदमहं स्वीकरोमि यदेतस्य आचरणं, यथाऽस्मिन् वर्णितं, तद्भावनया न भवति। तथा स्याच्चेद् हिन्दुस्थानम् एकस्मिन्नेव दिवसे स्वराज्यं प्राप्नुयात्। हिन्दुस्थानं यदि प्रेम्णः सिद्धान्तं तद्धर्मस्य एकेन सक्रियांशरूपेण स्वीकुर्यात्, स्वीयायां च राजनीतौ तत्समावेशं विदध्यात्, तर्हि हिन्दुस्थाने स्वराज्यं स्वर्गाद् अवतरेत्।" पृ.१८।

स्वयमनुवादको वदति- सभ्यतायाः, स्वराज्यस्य, राष्ट्रियतायाश्च ये प्रश्नाः संवत्सराणां शतादपि पूर्वं महात्मना उत्थापिताः, विचारिताः, निर्णीताः, तेऽधुनापि नः पुरतो वर्तन्ते। ... ... आङ्ग्ला गताः। आङ्ग्लानां सभ्यता तु न गता। अर्थमोहः, हिंसकवृत्तिः, वैचारिकक्षुद्रता, स्वार्थलिप्सा – इत्येता मानवानां दुर्बलताः सन्ति। ... ... दुर्बलतानां पोषणकर्त्र्याः सभ्यताया अल्पीयसीं व्याप्तिं दृष्ट्वा चिन्तामापन्नो महात्मा सः। सत्यं प्रत्याग्रहः किञ्चिदपि स्याच्चेद् वयं स्पष्टमनुमातुं शक्नुमो यत्तस्या व्याप्तिरस्माकं काले वृद्धिं गताऽस्ति। ... ... गान्धिनः प्रामाण्येन वैश्वीकरणमिदं बुभुक्षाऽस्ति – महाविकरालबुभुक्षा। यत्र कुत्रापि धनं स्यात्, तत्सर्वं निगलितुं लालां पातयन्ती नित्यम् अतृप्ता बुभुक्षा। ... ... वस्तुतो हिन्दुस्थानस्य संस्कृतिं केन्द्रीकृत्य विश्वस्य कृते समुपयोगि दर्शनं नामैव हिन्दस्वराज्यमस्ति। (अनुवादकीयम्, पृ.१०)

ग्रन्थे विंशतिलेखेषु ग्रन्थकारः पाठकसम्पादकयोः संवादेन विषयं परामृशति। अत्रत्याः मुख्यविषयाः सन्ति- वङ्गविभाजनम्, स्वराज्यं नाम किम्, इंग्लैण्डस्य दशा, हिन्दुस्थानं कथं पारतन्त्र्यं यातम्, हिन्दुस्थानस्य दशा(पञ्चभागैः), हिन्दुस्थानं कथं स्वतन्त्रं स्यात्, सत्याग्रहः, शिक्षा, यन्त्राणि, विमुक्तिः इत्यादयः। यथा स्वराज्यं विवृणुते- अस्वार्थो यदस्मभ्यम् आङ्ग्लानां राज्यं त्वभीष्टं, परं ते न। भवन्तो व्याघ्रस्य स्वभावं कामयन्ते, परं

व्याघ्रं नैव। अर्थोऽयं जातो यद् भवन्तो हिन्दुस्थानमाङ्ग्लं कर्त्तुं समीहन्ते। यदा हिन्दुस्थानमाङ्ग्लं सम्पत्स्यते, तदा तद् हिन्दुस्थानं न कथयिष्यते। परं तद् यथार्थम् आङ्ग्लस्थानं कथयिष्यते। नेदं मे कल्पनायाः स्वराज्यम्। (पृ.३१)

अस्य मूलानुगं शिष्टमनुवादं प्राप्य अनुवादकस्य प्रवीणपण्ड्यावर्यस्य नितरां स्वागतं व्याहरामः अनूदितसंस्कृतस्वराज्ये, प्रशास्महे सः अनूदितसाम्राज्यमेव प्रतिष्ठापयत्विति।

2.52. हेमकुटात्प्रत्यागमनस्य अनन्तरम्...

श्रीनिवासः(दिवङ्गतः मास्तिवेङ्कटेशअय्यङ्गार्) कन्नडभाषायाः सुप्रसिद्धः लेखकः। कन्नडसाहित्ये तु सः लघुकथासाहित्यस्य आरम्भकर्ता इत्येव प्रसिद्धः। स्वकीयस्य साहित्यस्य निमित्तं ज्ञानपीठप्रशस्त्या सम्मानितः अस्ति सः। प्रगाढः जीवनानुभवः, सुसंस्कृतं चिन्तनं, सरलं निरूपणं च तस्य सर्वासु अपि कथासु दृश्यन्ते। "हेमकुटात्प्रत्यागमनस्य अनन्तरम्..." तेन लिखिता काचित्दीर्घकथा। अभिज्ञानशाकुन्तलस्य अनन्तरं कथा तेन अत्र विनूतनतया कल्पिता अस्ति। इयं कथा जनार्दनहेगडेवर्येण अनूदिता धारावाहिनीरूपेण सम्भाषणसन्देशे 1998संवत्सरे सितम्बरतः नवम्बरपर्यन्तं प्रकाशिता, अनन्तरम् 2011 संवत्सरे अङ्कुशः इतिग्रन्थे (29-43 पुटेषु) स्थानिता। कथाकारस्य कथाश्रावणकौशलमत्र द्रष्टुं शक्या-

मालिनीनदीतीरे कण्वाश्रमात् अनतिदूरे हस्तिनावतीमार्गे उभे तरुण्यौ वार्तालापं कुर्वत्यौ गच्छन्त्यौ स्तः। ''एतावता अपि ते न आगताः। न ज्ञायते- ते आगच्छेयुः वा न वा इति। एतावता तैः आगन्तव्यम् आसीत्"- उक्तवती एका। तदा अपरा उक्तवती-''किमपि कार्यगौरवं स्यात् कदाचित्। महाराज्ञ्याः प्रस्थानं तावत् सुलभतया न भवति खलु? अद्य आगन्तुं न शक्यं चेत् श्वः वा आगच्छेत् एव सा।" "दर्शनाकाङ्क्षा माम् उत्कण्ठयति। शकुन्तला सप्तभ्यः वर्षेभ्यः पूर्वं खलु अस्माभिः दृष्टा? न जाने, अद्य सा कथम् अस्ति इति। तस्याः पुत्रः तु अस्माभिः न दृष्टः एव। तस्याः दर्शने ममापि महती उत्कण्ठा अस्ति। सप्तवर्षावधौ मया सा कतिवारं स्वप्ने दृष्टा इति तु भगवान् एव जानाति। शकुन्तला अपि अस्मान् बहुधा स्मृतवती स्यात् एव। (पृ.29, अङ्कुशः, सम्भाषणसन्देशे 1998 सितम्बरे, पृ.20)

कथामध्ये अतीतस्मृतिस्मरणम महाराजस्य दुष्यन्तस्य गान्धर्वविवाहः, दुर्वाससः अभिशापः, पत्नीत्वेन स्वीकर्तुं निराकरणं, पुत्रजन्म,

मुद्रिकाप्राप्तिः, साम्राज्ञीपदेन अभिषेकः, कार्यस्य गुरुभारः इत्यादिसर्वं सुष्ठु निरूपितं दृश्यते। अनसूया-शारद्वतयोः, प्रियंवदा-शार्ङ्गरवयोः विवाहादिकं वर्णयित्वा परिवारं वर्णयति। सम्यगुक्तम्- पूर्वं तया एतस्मात् आश्रमात् कथं गतम् आसीत् इति सर्वें स्मरन्ति स्म। पूर्वं या पादाभ्यां गतवती आसीत् सा इदानीं रथेन गच्छति। पूर्वं यः गर्भावस्थायाम् आसीत् सः इदानीं प्रतिपच्चन्द्रः इव तस्याः पार्श्वे उपविष्टः। ... शकुन्तलायाः मनः तु पूर्वं यथा तथैव इदानीम् अपि उत्कण्ठितम् एव आसीत् । उत्कण्ठायाः कारणं स्फुटतया न जानाति स्म सा। पुनः कदाचित् पत्या सह एव आगन्तव्यं मया। अत्र आगतया मया हस्तिनापुरं प्रति न गन्तव्यम् इति भावः प्राप्तः तया। ... वास्तविकं सुखम् एतावता अपि मया न प्राप्तम्, प्राप्तव्यम् अस्ति तत् इति विचिन्तयन्ती सा रथम् आरुह्य हस्तिनावतीं प्रति प्रस्थितवती।

(पृ.43, अङ्कुशः, सम्भाषणसन्देशे 1998 नभेम्बरे, पृ.22)



तृतीयोऽध्यायः

उपसंहारः

अनूदितकाव्यालोकः कस्य नाम सचेतसः मनः नोद्भासयति, न वा प्राणान् पुलकितान् कारयति। अनूदितसाहित्ये कवीनाम् अनुवादकानां भूमिकां विहाय पत्त्रिकासम्पादकानामपि भूमिका अनल्पा नास्ति। जानीमो वयं यत् सर्वमपि अनूदितसाहित्यं प्रथमतः पत्रिकासु प्रकाशितम्। क्वचित् सामान्यसंशोधनेन सह द्विवारं प्रकाशितम्। अतः अनूदितसाहित्ये सागरिका-प्रणवपारिजात-सत्यानन्द-संस्कृतप्रतिभा-संस्कृतसाहित्यपरिषत्पत्रिकामञ्जूषा-मित्रगोष्ठी-संस्कृतमञ्जरी-भारतमुद्रा-दूर्वा-भारती-नन्दनवनकल्पतरु-पद्यबन्धा-कथासरित्-पत्रिकाणां योगदानमपि बहुधा प्रेरणादायकमासीत्। अप्पाशास्त्रिराशिवडकरे-हृषीकेशभट्टाचार्य-वे.राघवन्-भट्टमथुरानाथशास्त्रि-कालीपदतर्काचार्य्य-फटिकलालदास-राधावल्लभत्रिपाठि-सदृशैः सम्पादकैः समृद्धासु पत्रिकासु कस्यापि तथ्यस्य नैयून्यं नास्ति। काशीविद्यासुधानिधि-संस्कृतचन्द्रिका-विद्योदय-सुनृतवादिनीत्यादयः संस्कृत -पत्रिकाः शासनस्य विरोधं कुर्वत्यः अपि यथा मौलिकं साहित्यं प्रकाशयन्ति स्म तथा अनूदितसाहित्यम्। तासु वङ्किमचन्द्रस्य शरच्चन्द्रस्य च उपन्यासाः अनूदिताः सत्यः प्रकाशिताः आसन्। देवी कुमुद्वती(1903), इन्दिरा(1904), लावण्यमयी(1906), कृष्णकान्तस्य निर्वाणम्(1907) उपन्यासाः संस्कृतचन्द्रिकायां प्रकाशिताः। रेणुदेव्या अनूदिताः राधा(1922), दुर्गेशनन्दिनी(1922-23), रजनी(1928-29), राधारानी(1930-31), संस्कृतसाहित्यपरिषत्पत्रिकायां प्रकाशिताः। काञ्चीवास्तव्येन शैलताताचार्येण दुर्गेशनन्दिनी, क्षत्रियरमणी(1908) इति उपन्यासौ अनूद्य प्रकाशितौ। हरिचरणभट्टाचार्येण कपालकुण्डलम्(1918) शीर्षकेण कपलाकुण्डला-उपन्यासः अनूदितः। एतदतिरिच्य वङ्किमचन्द्रस्य कथाः तदा तदा अनूदिताः सन्ति। तस्य विडालः इति कथा अरिजिद्गुप्तेन, वृष्टिः कथा सुदीप्तमुन्सिना च अनूदिते कथासरितः 19-20-21 अङ्केषु प्रकाशिते। पुरतनाः अनुवादाः अधुना सुलभतया न लभ्यन्ते। तेषां पुनः प्रकाशनं नितरामपेक्ष्यते। संस्कृतेन लिखितस्य प्रथमोपन्यासस्य शिवराजविजयस्य प्रकाशनसौभाग्यमपि

संस्कृतचन्द्रिकाया एव। स्व.अच्युतानन्ददाश-वनमालिविश्वाल-नारायणदाश-राकेशदाशैः सम्पादिता षाण्मासिकी कथासरित्पत्रिका 2005ई. मार्चमासात् निरन्तरतया प्रकाश्यते। अत्र तदा तदा अनूदितकथाः तु प्रत्यङ्कं प्रकाश्यन्ते, क्वचित् सम्पूर्णतरङ्गः अनूदितकथाविशेषाङ्करूपेण प्रकाश्यते। प्रायः अद्यावधि अत्र शताधिकाः कथाः अनूदिताः सन्ति। तथैव निरन्तरं प्रकाशितायां संस्कृतसम्भाषणसन्देश इति मासपत्रिकायां द्विशताधिकाः कथाः, पञ्चविंशत्यधिकाः धारावाहिनीरूपेण प्रकाशिताः उपन्यासाः सन्ति।

अतः उपसंहारमुखेन एतत् वक्तुं शक्यते यत् मौलिकसाहित्यस्य प्रकाशने संस्कृतपत्रिकाणां सम्पादकानाञ्च यथा सहयोगः आसीत् ततोऽधिकः सहयोगः आसीत् अनूदितसाहित्यप्रकाशने। किं बहुना, पत्रिकाणां योगदानादेव अन्ततो गत्वा केन्द्रसाहित्येकादेम्यादिसंस्थाः अनूदित-साहित्यमपि सृजनकलान्तरं स्वीकृत्य सबहुमानं पुरस्कृतवत्यः। परन्तु परस्परसंवादाभावात् स्वस्थसमीक्षाभावात् वा तत्तदनूदितं साहित्यं सीदति कपाटिकासु। भारतीयभाषाभ्यः तथा विश्वभाषाभ्यः कदा किं किं संस्कृते अनूदितमिति ज्ञानं सुकरं नास्ति, तेषां सङ्ग्रहाणां प्राप्तिरपि सुशक्या नास्ति। अतः समकालिकसाहित्यात् यावत् लब्धं तावदेवात्र समीक्षासीमापरिसरम् आगतमिति क्षमायाचनां पूर्वकं प्रकाशयामि।

अनुवादेन ज्ञानसम्पत्तिः शब्दसम्पत्तिः वैश्विकीसाहिती च स्फूर्त्तिं गताः। आंग्लेयचन्द्रिका(1801)इतिहासतमोमणिः(1813) क्षेत्रतत्वदीपिका(1823) क्षेत्रतत्वदोहिका(1839) मधुसूदनतर्कालङ्कारकृतः इंग्लैण्डीयव्याकरणसारः (1835), इंग्लैण्डीयव्याकरणम्(1847), ख्रीष्टसङ्गीतम्(1842), पौलचरितम् (1850) ख्रीष्टधर्मकौमुदी(1859), ख्रीष्टधर्मकौमुदीसमालोचनम्(1894) इत्यादिग्रन्थाः गणितेतिहाससाहित्यविनिमयस्य प्रामाण्यं वहन्ति, ये खलू अनुवादस्य पराकाष्ठया एव सम्भूताः सन्ति। एवंप्रकारेण ज्ञानविज्ञानस्य आनन्त्यं परस्परं सहिष्णुतया स्वीकरणस्य शिक्षामयच्छत्।

अनुसर्जकः आचार्यः राधावल्लभत्रिपाठी अर्धकथानके ३६ प्रकारान् शूद्रान् अनुवर्णयति, यत् खलू समाजस्य साहित्यस्य च प्रौढिमानं प्रख्यापयति। यथाकाचपात्रनिर्मातारः -, तुन्तुवायाः, ताम्बूलिकाः, रङ्गकाः, गोपालाः, तक्षाः, प्रस्तरकुट्टकाः, तैलिकाः, रजकाः, पिङ्गारकाः, मिष्ठान्ननिर्मातारः, शिबिकावाहकाः, शाकविक्रेतारः, मदिराविक्रेतारः, कुम्भकाराः, मालाकाराः, वस्त्रधावकाः, कर्गदकाराः, कृषकाः, तन्तुवायाः,

चित्रकाराः, मुक्ताच्छेदकाः, पत्रलकराः, लाक्षाकाराः, पित्तलकाराः, स्थपतयः, तन्त्रीकाराः, छदिकाराः, नापिताः, भ्राष्टकाः, स्वर्णकाराः, लौहकाराः, धारकराः, आग्नेयक्रीडनककराः, मत्स्यजीविनः, चर्मकाराश्च।

विश्वासवर्यो नवनिर्मितया शब्दसंपदा पुष्कलीकरोति संस्कृतभारतीम् आवरणग्रन्थे। काचमयाः स्खलद्द्वारकपाटाः .पृ)35(, जीवहरम्.पृ)जौहर् -69(, बन्धनादेशः.पृ)265(, निरीक्षणप्रतिभूत्वं .पृ)265(। वरं गान्धिकेन सह हस्ताहस्ति, न गोमयवाहकेन सह सरससंलापः .पृ)245(यथा लौकिकसूक्तिमपि सम्यक् अनुवदति।

जनार्दनहेगडेवर्यः कश्चन सिद्धः अनुवादकः। विशेषत आधुनिकग्रन्थानां तत्रत्यानां शब्दानाञ्च संस्कृतानुवादे महान् प्रयत्नः कृतः तपस्विना अनुवादकेन कनकावरणे। स्थालीपुलाकन्यायेन कानिचन उदाहरणानि स्थापयामः अत्र- ईपत्रं, मुद्रणाज्ञां, विशालदर्शनं, सञ्चिका, सञ्चिकागुच्छे, भूतलगणस्य, अङ्कसङ्गणकं(पृ.३३), सङ्केतपत्रं, सचक्रयानपेटिका (५७), आन्तरदूरवाण्या (५९), विद्युत्कोषसङ्ग्राहकस्य, भूगर्भाट्टाः रहःशेवधयः (१३४)। अतिप्रचलितानामाङ्ग्लेयशब्दानां यथावद् ग्रहणमपि तेन कृतम्। यथा– सोफासनं(७), किलोमीटरदूरस्य(२०), रायल म्यूसियम् इत्यादिषु(२४), हलौ, चेक् इन्, बोर्डिङ्ग, झूमव्यवस्थया (१००), रूक्षस्यूतयोः(रक् स्याक्) (१००), सैकलरिक्षाचालकं १११, हेलिकाप्टरयानम् १७१। क्वचिदनुवादेनापि अर्थः प्रकरणं विना स्पष्टरूपतां न याति। यथा– उत्प्रेरकसाहाय्येन(४), असंविभाज्यवस्तुयुते, तन्तुमालां, स्मृतिशलाका, ईपत्रमाध्यमेन सम्भाषणं(चाट्), उपलभ्य-आहारावली(मेन्यू,६१), अमृतशिला, संवाहकाः(सेन्सार्स्,८६), दृश्यफलकोपेतं(एल्.सि.डि.) (१०४), चित्रदर्शकात् (एल्.सि.डि.प्रोजेक्टर) (१२०)।

स्वशास्त्रस्वतन्त्राः एकतन्त्रपोषकाः संस्कृतज्ञाः किंचिदेव अन्यग्रन्थान् परिशीलयन्ति। परन्तु संस्कृतानुवादहेतोः तेषां तेषां ग्रन्थानां सुखपाठः पारम्पारिकपण्डितानामपि अभवत्। ते गीताञ्जलितः अमीनां यावत्, रूमीतः ओहेन्रीं यावत्, तस्लिमातः रस्किन्वण्डपर्यन्तं निखिलं साहित्यं संस्कृतेन पठित्वा साहित्यस्य परस्परविनिमयेन बिम्बालङ्कारशब्दसम्पदां लाभं प्राप्य आत्मानं पुनानाः इतरान् पावितवन्तः। संस्कृतभाषायां तेन जातं सौभ्रातृत्वं समृद्धिं वैशद्यं च विलोक्य एव अष्टादशीति कार्यक्रमे आधुनिक-शास्त्रीयग्रन्थानाम् अनुवादस्य प्रकल्पः स्वीक्रियते। 

प्रमुखसन्दर्भग्रन्थसूची

- अङ्कुशः, (अनूदितः), जनार्दनहेगडे, संस्कृत भारती, मातामंदिर गली, झण्डेवालान्, नई दिल्ली, २०११।
- अमीना, (अनूदितः उपन्यासः) मू. मोहम्मदकबीरउमरः, संस्कृतानुवादः- डा.रमाकान्तशुक्लः, संस्कृतभारती, मातामंदिर गली, झण्डेवालान, नवदेहली, २०११।
- आधुनिकसंस्कृतसाहित्यसन्दर्भसूची, प्रकाशकःगिरिः.सी.डा-, कुलसचिवः, राष्ट्रिय-संस्कृतसंस्थानम्, ५६५७-, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली५८-, २०१०।
- आनन्दमठः, (अनूदितम्) मू. ले. वङ्किमचन्द्रचट्टोपाध्यायः, अनु. डा. शिवचरणशर्मा, संस्कृतभारती, मातामंदिर गली, झण्डेवालान, नवदेहली,२०११।
- आन्ध्रकाव्यकथा, (अनूदितम्) सन्निधानम् सूर्यनारायणशास्त्री, सिकन्दराबाद, १९७२।
- उद्वेजिनी गोस्वामीहरिकृष्णशास्त्री रवीन्द्रनाथठाकुरः -वांलामूलम् -चोखेरबाली
- कणः लूप्तः गृहं ददाति (अनूदितम्) कृष्णसोमयाजी गुंटूर ५०५५ कलि।
- कथाञ्जलिः हिन्दीमूलम्– डायोगेन्द्रनाथशुक्लः. संस्कृतानुवादिका– डाअर्चनाजोशी. प्रकादेववाणीपरिषद् . दिल्ली ५९- प्र२०१२ .सं . मू-/२००. १डेम्मी ८/ पृ। १४४+२८.
- कनकावरणम्, कन्नडमूलम्– डागणेशय्यः .एन्.के., संस्कृतानुवादः - जनार्दनहेगडे, प्रकासंस्कृतभारती ., २५, दीनदयाल उपाध्यायमार्गः, राउस् एवेन्युः, नईदिल्ली २-, प्र२०१४ .सं ., मू-/७०., १डेम्मी ८/, पृ। १९६+४.
- कवीन्द्रकथाकल्लोलिनी, वङ्गीयमूलम्रवीन्द्रनाथठाकुरः-, संस्कृतानुवादकाः - राकेशदाशः-नारायणदाश -तन्मयकुमारभट्टाचार्य, प्रकासंस्कृतभारती ., नवदेहली।
- चन्द्रगुप्तः, (अनूदितकाव्यम्) मूल-दीनदयालउपाध्यायः, सरिताकृष्णशास्त्री, संस्कृत भारती, महल, नागपुर, १९९९।
- चन्द्रमसः मृत्युः ,ओडियामूलम् -चन्द्रर मृत्यु ,गोकुलानन्दमहापात्रः , प्रकाशकः ,1966 -प्रथमसंस्करणम् ,ओडिशा ,कटक ,ग्रन्थमन्दिरम् - 8-1 ,217.पृ ,1999-षष्ठसंस्करणम्डिमाईसंस्कृतानुवादिका ,70.00-मूल्यम् , ,2009 ,संस्कृतभारती ,पराम्बा श्रीयोगमाया .कु -मूल्यम्- ५० रूप्यकाणि , - पुटसङ्ख्याIV + 139। पुस्तकस्य ISBN क्रमांकः -978-81-87276-47-9।
- जन्मान्धस्य स्वप्नः, ओडियामूलम्अरुणरञ्जनमिश्रः-, संस्कृतानुवादकः - बनमालिबिश्वाल, २०१२

- ज्वाला तथा जलम्, हिन्दीमूलम्हरिशङ्करपरसाई-, संस्कृतानुवादकः - रवीन्द्रकुमारपण्डा, प्रकाशिकाअर्वाचीनसंस्कृतसाहित्यपरिषद्-, वडोदरा, प्रथमसंस्करणम्मार्च -, २०१४, पुटाः८०+४-, मूल्यम्- १५०।-/
- टालस्टायकथासप्तकम्, (अनूदितम्) भागीरथप्रसादत्रिपाठी, चौखम्बा विद्याभवनम्, वाराणसी, १९७०।
- धर्मपदम्, (अनूदितम्) मूल-ओडिआ- गोपबन्धुदासः, हरेकृष्णशतपथी, अमृतवाणी सेवा प्रतिष्ठानम्, दामोदरपुरम्, बालेश्वर, २००१।
- निर्मला, (अमूदितउपन्यासः) (मुंशी प्रेमचन्द के उपन्यास निर्मला, का अनूवाद) श्रीरामदवे, राष्ट्रिय संस्कृत साहित्य केन्द्र, जयपुर, २००४।
- भगवान् परशुरामः(प्रथमभागः), हिन्दीमूलम्– डामुनशी .एम्.के., संस्कृतानुवादः– डाशान्तला ., प्रकातीसंस्कृतभार ., २५, दीनदयाल उपाध्यायमार्गः, राउस् एवेन्युः, नईदिल्ली २-, प्र२०१४ .सं ., मू-/७०., १ ८/ डेम्मी, पृ।२००+४.
- मेघमल्लारः, (अनूदितवङ्गीयकथासङ्ग्रहः(, कथाकारःविभूतिभूषणवन्द्योपाध्यायः -; अनुवादकः राकेशदाशः, संस्कृतभारती नवदेहली, २०१३, पृ११२+८., मूल्यम्-
- याज्ञसेनी, भागीरथिनन्दः, राष्ट्रियसंस्कृतसंस्थानम्, ५६५७-, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली५८-, २००६।
- रूमीपञ्चदशी, (अनूवादः), रूपान्तरकार-राधावल्लभत्रिपाठी, संस्कृतभारती, माता मंदिर गली, झण्डेवालान, नवदेहली, प्र. सं. २०११।
- रूमीरहस्यम् (अनुवादः) राधावल्लभत्रिपाठी, संस्कृतभारती, माता मंदिर गली, झण्डेवालान, नवदेहली, २०११।
- लिपिका वङ्गीयमूलम् रवीन्द्रनाथठाकुरः-, अनुवादकः नारायणदाशः संस्कृतभारती , नवदेहली५५-, २०१३।
- वात्यासारः चन्द्रशेखरदासवर्मा-ओडियामूलम् -, अनुसर्जनम्नारायणदाशः - तीसंस्कृतभार-प्रकाशिका, मातामन्दिरगली, झण्डेवाला, नवदेहली५५-, Jan, २०११ . VIII+८०, Rs : ३०.००.।
- विज्ञानं समाजश्च, (अनूदितगद्यम्) मू, सरयूप्रसादगुप्तः, अनु.रामचन्द्रमिश्रः, कामेश्वरसिंहसंस्कृतविश्वविद्यालय, दरभंगा, १९८२।
- शरत्सप्तकम्, शरच्चन्द्रचट्टोपाध्यायः, अनु.बिहारीलालमिश्रः, पुस्तक सदन, गया महाविद्यालय के पीछे, गया, बिहार, १९९६।

- शेरलाकहोम्सस्य स्पशकथाः ,रमेशः मुधोळकरः -मराठीमूलम् , संस्ृकृतानुवादःनीलेशः बाबासाहेवेः -शिन्देनवदे ,संस्कृतभारती ,हली , 2011।
- शैवलिनी, (अनूदितम्)के. राजगोपालचक्रवर्ती, जनालय प्रेस, मैसूर, १९१७।
- श्रीमान् विन्स्टन् चर्चिलः, (अनूदितम्) वासुदेवशास्त्री, औदुम्बरकर शारदा कार्यालय, ४२५ सदासिव पेठ, पुणे, १९६४।
- श्रीराधा, (अनूदितकाव्यम्) गोविन्दचन्द्रउद्गाता, प्र. इलाहाबाद सङ्ग्रहालय, आजादपार्क, इलाहाबाद, २००१।
- षष्टितन्त्रम्, क्षितीशचन्द्रचट्टोपाध्यायः कलिकाता
- संस्कृतरवीन्द्रम्, सम्पादकःराघवः.वे -, साहित्येकादमी, नवदेहली, १९६६।
- संस्कृतसाहित्य विसवीँ शताब्दीः, त्रिपाठी राधावल्लभ, दिल्ली, राष्ट्रियसंस्कृतसंस्थान, १९९९।
- संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्, सम्पादकः नारायणदाशः, मान्यताप्रकाशन, दिल्ली, २०१२।
- सप्तपदी शङ्करदेवझा-मैथिलीमूलम् -, अनुसर्जनम्-नारायणदाशः प्रकाशिका-संस्कृतभारती, मातामन्दिरगली, झण्डेवाला, नवदेहली
- सान्द्रक्षीरपाञ्चालिका, वङ्गीयमूलम् अवनीन्द्रनाथठाकुरः -, अनु . कल्पिकामुखोपाध्यायः, साहित्य अकादेमी, नवदेहली१-, २००६, मू
- सिद्धार्थःहरमानहेसः-। जर्मनमूलम्(उपन्यासः), संस्कृतानुवादः–मुनिकल्याणकीर्त्तिविजयः, प्रकाशकःश्रीभद्रङ्करोदयशिक्षणट्रस्ट -, गोधरा, २०१३, मूल्यम्- १५०-/, पृ१६९+६ ., १क्राउन। ८/
- सुबोधसंस्कृतलोकमान्यतिलकचरितम् ,कृष्णवामनचितले, मुंबई, १९५६।
- सूक्तिसुधा, (अनूदितम्) अरविन्दाश्रम, पांडिचेरी, १९५३।
- सौन्दर्यस्त्रोतस्विनी नर्मदा, गुजरातीमूलम्अमृतलालवेगडः-, संस्कृतानुवादः -प्रवीणपण्ड्या, प्रकाशिकाअकादेमी-साहित्य -, नई दिल्ली, प्रथमसंस्करणम्-
- स्वर्गीयप्रहसनम्, (रवीन्द्रनाथटैगौरस्य व्यङ्ग्यकौतुकानुवादः) यादवेन्द्रनाथरायन्यायतर्कतीर्थः, संस्कृतसाहित्यपरिषद् पत्रिका,
- हिन्दस्वराज्यम्, गुजरातीमूलम्महात्मागान्धी-, संस्कृतानुवादकः -प्रवीणपण्ड्या, प्रकाशिकाराजस्थानसंस्कृतअकादमी-, जयपुरम्, २०१३।

लेखकपरिचयः

२००९ ईशवीयसंवत्सरे भारतस्य महामहिमराष्ट्रपतिना "महर्षि-बादरायण -व्यास"सम्मानेन, 2009 ईशवीयसंवत्सरे लक्षनउस्थ-भाऊरावदेवरससेवान्यासेन "पण्डितप्रतापनारायणमिश्रस्मृतियुवसाहित्यकार" सम्मानेन 2014 ईशवीयसंवत्सरे केन्द्रसाहित्येकादम्याः अनुवादप्रशस्त्या, विविधसंस्कृताकादेमीनां विविधसंस्थानाञ्च विविधसम्मानैः सभाजितस्य डॉ.नारायणदाशस्य जन्म 1972 संवत्सरे जुनमासस्य पञ्चविंशतिदिनाङ्के, उत्कलप्रदेशस्य गञ्जामजनपदे चढियापल्लीग्रामे अभवत्। मातुर्नाम श्रीमती मञ्जुलादाशः। पितुर्नाम श्रीमङ्गुलूचरणदाशः। आधुनिकसंस्कृतसाहित्ये रुचिमतोऽस्य कवेः, कथाकारस्य, समीक्षकस्य, सम्पादकस्य च संस्कृतक्षेत्रे महद्योगदानं वर्तते।

मौलिककृतयः-

- शाकुन्तलनिबन्धसङ्गमनी
- कार्गिल्लहरी, संस्कृतखण्डकाव्यम्
- गङ्गे च यमुने चैव, संस्कृतकथासङ्ग्रहः
- वह्निवलय, संस्कृते उपन्यासः
- हत्याकारी कः, संस्कृतस्पशकथासङ्ग्रहः
- लज्जा, संस्कृतकथासङ्ग्रहः
- नरेन्द्रपुरीयं रेलस्थानकम्, संस्कृतत्रासदकथासङ्ग्रहः
- त्रिरङ्गपताकातले, संस्कृतकाव्यसङ्ग्रहः
- श्रावणस्य प्रथमदिवसे, संस्कृतकथासङ्ग्रहः

शोधग्रन्थाः-

- संस्कृतभाषाविज्ञानम्, (1995)
- सङ्गणकदृष्ट्या शृङ्गारप्रकाशस्य नाट्यविषयकाध्यायानामध्ययनम्, (2002)
- समयस्य पृष्ठोपरि तव हस्ताक्षरम्, (2011)
- तुलनात्मकं संस्कृतभाषाविज्ञानम्, (2012)
- संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्, (2013)
- संस्कृतेऽनूदितं रवीन्द्रसाहित्यम्, (2013)
- संस्कृतसाहित्ये स्वामी विवेकानन्दः, (2017)
- संस्कृतसाहित्ये रामकृष्णमठस्य योगदानम्, (2017)
- अनूदितं संस्कृतसाहित्यम्, (2019)